

A

DESCRIPTIVE CATALOGUE

OF THE

SANSKRIT MANUSCRIPTS

IN THE

GOVERNMENT ORIENTAL MANUSCRIPTS LIBRARY. MADRAS

BY

S. KUPPUSWAMI SASTRI, M.A.

CURATOR, GOVERNMENT ORIENTAL MANUSCRIPTS LIBRARY, AND PROFESSOR OF SANSKRIT AND COMPARATIVE PHILOLOGY, PRESIDENCY COLLEGE, MADRAS

Prepared under the orders of the Government of Madras

Volume XXVI—Supplemental

MADRAS

PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS

1927

CONTENTS.

A DESCRIPTIVE CATALOGUE

OF THE

SANSKRIT MANUSCRIPTS.

VOLUME XXVI.

SUPPLEMENTAL.

No. **14561.** अष्टाध्यायीव्याख्या (शब्दकौस्तुभः).

ASṬĀDHYĀYĪVYĀKHYĀ (ŚABDAKAUSTUBHAḤ).

Pages, 88. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 1305.

Contains the third Āhnika of the fourth Pāda in the sixth Adhyāya to the end of the second Āhnika of the first Pāda in the seventh Adhyāya ; but wants some leaves in the middle.

Same work as that described under Nos. 1324 to 1332 ante.

Beginning :

स्यसिच्सीयुट्तासिषु भावकर्मणोरुपदेशेऽज्झनग्रहदृशां वा चिण्वदिट् च । अधिकृतमार्धधातुकपदं सीयुटोर्विशेषणं नेतरेषाम्, अव्यभिचारात; सीयुट्शब्देन तदादिर्लिङ् गृह्यते केवलस्यानार्धधातुकत्वात्, चिणीव चिण्वत् तत्र तस्येवेति सप्तम्यन्ताद्वतिः, तासिष्विति प्रकृतिप्रतियोगिनि सप्तमीदर्शनात्, भावकर्मणोरिति विषयसप्तमी, उपदेशेऽजन्तानामङ्गानां हनग्रहदृशां च चिणीव कार्यं वा स्यात् स्यादिषु परतः भावकर्मणोर्गम्यमानयोः ।

End :

एतच्च सूत्रं पूर्वसूत्रभाष्ये प्रत्याख्यातम् । तथाहि—पूर्वसूत्रे सादेरिति नानुवर्तते वृतादीनां पञ्चानां वलादेरार्धधातुकस्य इण्ण । तेन क्लृपेस्तासावपि इण्णिषेधो भवति । नचैवं वृतादीनामपि स्यादिति वाच्यम् । तेभ्यस्तासेः परस्मैपदपरत्वाभावात्, अत एव वर्तिता वर्तितुमिति वृतादौ नेण्णिषेधः । तत्रापि परस्मैपदापरत्वात् । अत्र कैयटः—परस्मैपदेष्विति परसप्तमीविज्ञाने हेत्वेकि कृतिवचनः स्यादिति । न वृध्य इति साम.

No. **14562.** जैनाचार्यविजयः.
JAINĀCĀRYAVIJAYAḤ.

Pages, 2. Lines, 16 on a page.

Begins on fol. 1*a* of the MS. described under No. 1530.

Wants the beginning and the end.

A work in prose and verse describing the leading incidents in the lives of the foremost preceptors of the Jains, such as Malliṣēṇa, Ajitasēna, Vādirāja, etc.

Beginning:

. . . . प्यग्रेसरो योगिना-
माश्चर्याय कथं न नाम चरितैः श्रीमल्लिषेणा मुनिः
यः पूज्यः पृथिवीतले यमनिशं सन्तस्स्तुवन्त्यादरा-
द्येनानङ्गधनुर्जितं मुनिजना यस्मै नमस्कुर्वते ॥
यस्मादागमनिर्णया यमभृतां यस्यास्ति जीवे दया
यस्मिन् श्रीमलधारिणि व्रतिपतौ धर्मोऽस्ति तस्मै नमः ।
धवलसरसतीर्थे सैष धन्या सधन्या परिणतिमनुतिष्ठन्मुक्तिमान्निष्ठितात्मा ।
व्यसृजदनिजमङ्गं भङ्गमङ्गोद्भवस्य ग्रथितुमिव समूलं धावयन् भावनाभिः ॥

चूर्णि.—तेन श्रीमदजितसेनपण्डितदेवदिव्यश्रीपादकमलमधुकरीभूतभावेन महानुभावेन जैनागमप्रसिद्धसल्लेखनाविधिविसृज्यमानदेहेन समाधिविधिविलोकनोचितकरण . . . . सङ्घसन्तोषनिमित्तमात्मान्तःकरण . . . . निरवद्यपद्यमिदमात्माविराचिनम् ।

* * * *

वाग्देवीसुचिरप्रयोगसुदृढप्रेमाणमप्यादरा-
दाधत्ते मम पार्श्वतोऽयमधुना श्रीवादिराजो मुनिः ।
भो भोः पश्यत पश्यतैष यमिनां किन्धर्मे इत्युच्चकै-
रब्रह्मण्यपराः पुरातनमुनेर्वाग्वृत्तयः पान्तु वः ॥
गङ्गावनीश्वरशिरोमणिबद्धसन्ध्यारागोल्लसच्चरणचारुनखेन्दुलक्ष्मीः ।
श्रीशब्दपूर्वविजय . . . . . धीमानमानुषगुणोऽस्तमतः प्रमांशुः ॥

चूर्णि.—स्तुतो हि स भवानेष श्रीवादिराजदेवेन ।

यद्विद्यां तपसोऽप्रशस्तमुभयं श्रीहेमसेने मुनौ
रागासीत्सुचिराभियोगबलतो नीतं परामुन्नतिम् ? ।

प्रायश्श्रीविजये तदेनदखिलं तत्पीठिकायां स्थिते
संक्रान्तं कथमन्यथाननिचिरोद्दिचैदृगीदृक्तप. (?) ॥

* * * *

विजितमदनदर्पः श्रीदयापालदेवो विदितसकलशास्त्रो निर्जिताशेषवादी ।
विमलतरयशोभिर्व्याप्तदिक्चक्रवालो जयति नतमहीभिर्मौलि . . . . ॥

* * * *

श्रीमुल्लूरविड्ड(दू)रसारवसुधारत्नं सनाथो गुणे-
नाक्षुण्णेन महीक्षितामुरुमहःपिण्डाश्शिरोमण्डनः ।
आराध्यो गुणसेनपण्डितमुनिस्स स्वास्थ्यकामैर्जना
यत्सूक्तागदगत्त(त्व)तोऽपि गलितग्लानिं गतिं लम्बिताः ॥

वन्दे वन्दितमादरादहरहस्स्याद्वादविद्याविदां
स्वान्तध्वान्तवितानधूननविधौ भास्वन्तमन्यं भुवि ।
भक्त्या त्वाजितसेनमानतिकृतां यत्सन्नियोगान्मनः-
पद्मं सद्म भवेद्विकासविभवस्सोन्मुक्तनिद्राभरम् ॥

मिथ्याभाषणभूषणं परिहरेदौद्धत्योन्मुञ्चत (?)
स्याद्वादं वदतान्मनेत विनयाद्वादीभकण्ठीरवम् ।
नोचेत्तद्गुरुगर्जितश्रुतिभयभ्रान्ताः स्वयूथं यतः
तूर्णं निग्रहजीर्णकूपकुहरे वादिद्विपाः पातिताः ॥

End :

त्रैलोक्यदीपिका वाणी द्वाभ्यामेवोदगादिह ।
जिनराजत एकस्मादेकस्माद्वादिराजतः ॥

* * * *

निष्काण्डं डिण्डिमः पर्यटति पटुनटौ वादिराजस्य जिष्णोः
जह्युद्यद्वादिदर्पो जहिहि गमकतां गर्वभूमा जहाहि ।
व्याहारेर्ष्यो जहीहि स्फुटमृदुमधुर . . . . .
. . . . विदितं यस्य जिह्वासहस्रम् ।
निर्गन्ता स्वर्गतोऽसौ न भवति धिषणो वज्रभृद्यस्य शिष्यः ।
जीवेतां तावदतौ निलयत्रलवशाद्वादिनः केऽत्र नान्ये
गर्वं निर्मुच्य सर्वं जयिन . . . . ॥

No. **14563.** ऋक्संहिता.

RKSAMHITĀ.

Page, 1. Lines, 13 on a page.

Begins on fol. 42*a* of the MS. described under No. 1530.

Contains only 12 Rks as found in the first Astaka of the **first Mandala.**

Same work as that described under No. 1 ante.

No. **14564.** पुराणसङ्ख्याकथनम्.

PURĀNASANKHYĀKATHANAM.

Page, 1. Lines, 6 on a page.

Begins on fol. 100*b* of the MS. described under No. 1978.

Wants the beginning and the end.

Purports to give the names of the Purāṇas and the Upapurāṇas in their order.

Beginning:

. . . . भक्त्या सम्यक् प्रपूज्यते ।
शृणोति वा व्याकरोति न तस्य नरकागमः ॥
ब्राह्मं[ण]पुराणं प्रथमं द्वितीयं पाद्ममुच्यते ।
तृतीयं वैष्णवं चैव (तुर्यं वायव्य)मुच्यते ॥
तथा भागवतं प्रोक्तं पञ्चमं षष्ठमुच्यते ।
भविष्यन्नारदीयं च सप्तमं परिकीर्तितम् ॥

End:

आद्यं सनत्कुमाराख्यं नारसिंहमतः परम् ।
तृतीयं चाण्डमुद्दिष्टं दौर्वा(सस)मथैव च ॥
नारदीय.

No. **14565.** स्मृतिवचनानि.

SMRTIVACANĀNI.

Pages, 2. Lines, 6 on a page.

Begins on fol. 101*a* of the MS. described under No. 1978.

Wants the beginning and the end.

A few stanzas taken from various Smṛtis dealing with several subjects, such as the performance of Sandhyāvandana, etc.

Beginning:

मक्षिकासन्ततिर्धारा तैलपकं वेदबिन्दवः ? ।
इक्षुखण्डतिलारसोमं नोच्छिष्टं मनुरब्रवीत् ॥

कटिभिग्नस्तु यो भुङ्क्ते . . . . . ।
. . . . . संवदता चैव त्रिधा श्राद्धं प्रयत्नतः ।
तुलसी वर्षमात्रेण षण्मासं बिल्वपत्रकम् ॥
कमलं सप्तरात्रं स्यात्करवीरैर्दिने दिने ।
अष्टाक्षरं नवपदं पदादि ब्रह्महा भवेत् ॥
पदान्ते मार्जनं कुर्यात् सोऽश्वमेधफलं लभेत् ।

End:

अच्युतं जठरं स्पृष्ट्वा हृदये तु जनार्दनम् ।
उपेन्द्रं शिरसि स्थाने भुजौ तु हरिकृष्णतः ॥
गण्डूषकरणात्पूर्वं हस्तं प्रक्षालये . . . ।
. . . . पित्र्यं च आत्मानं नरकं व्रजेत् ॥
पुर[त]ः तिष्ठन्ति देवाश्च दक्षिणे पितरस्तथा ।
पश्चिमे च . . . . गण्डूषमुत्तमम् ॥

No. 14566. व्याकरणविषयः.
VYĀKARAṆAVIṢAYAḤ.

Pages, 2. Lines, 8 on a page.

Begins on fol. 92*a* of the MS. described under No. 2307.
Wants the beginning and the end.
Similar to the work described under No. 1583 ante.

Beginning:

अत एव स्त्रियामिति सूत्रे "(सर्वपदार्थ)व्यापिनी[य]त्वात्प्र(त्वं प्र)वृत्तेरिति कैयटः । पुंयोगादिति सूत्रे स्त्रियाः पुंवत् । संविधात्रीत्वा"दिति कैयटश्च सङ्गच्छते। अत एव "पत्युर्नो यज्ञसंयोगे" इति सूत्रे पत्न्याः फलप्रतिग्रहीतृत्वादिति वृत्तिग्रन्थमुपादाय हरदत्त आह—कर्तृत्वमात्रं विवक्षितं न तु स्त्रीत्वमिति ङीप् न कृत इति ।

End:

व्यवस्थितविभाषात्वा(दिदा)देशे स(ड)तौ च न । सुगन्धिः प्रियकवि-(ति)वेश्या । तथा च—

परिशि इ(ष्यक्त)तोक्त्यर्थादनादेशाद्वा अकृतेरिति ।

इह पर्य(ड्ड)तीति पठ्यते ।?

No. 14567. यतिलिङ्गलक्षणम् , कर्णाटकटीकासहितम्.
YATILINGALAKṢAṆAM WITH KANARESE MEANING.

Pages, 2. Lines, 13 on a page.

Begins on fol. 47*a* of the MS. described under No. 2365.

Wants the beginning and the end.

On the personal characteristics of Sannyāsins with a brief description of the size, dimensions of the different things, such as bowl (Kamaṇḍalu), stick (Daṇḍa) kept by them for their use.

Beginning :

ओमाप इति मन्त्रेण मन्त्रितं वारि शोधितम् ।
पूरयेत्प्रणवेनैव गुरुमुद्राविचक्षणः ॥

* * * *

व्याघ्राजिनश्चेत्प्रथमं कृष्णाजिनमतः परम् ।
वस्त्रासनं कम्बलकं सिद्धानां चतुरासनम् ॥

* * * *

End :

मुखं द्व्यङ्गुलविस्तारं दैर्घ्यमष्टाङ्गुलं तथा ।
गलं त्र्यङ्गुलविस्तारमुदरं द्वादशाङ्गुलम् ॥
पादं त्र्यङ्गुलमानं स्यात् द्रोणमङ्गुलमानकम् ।
अधोमुखन्तु कर्तव्यं रन्ध्रं यतचतुष्टयम्? ॥

No. 14568. वैश्यसन्ध्यावन्दनविधिः.
VAIŚYASANDHYĀVANDANAVIDHIḤ.

Pages, 5. Lines, 5 on a page.

Begins on fol. 4*a* of the MS. described under No. 2543.

Incomplete.

On the details for the performance of the morning, midday, and evening prayers by the twice-born among the Vaiśya caste of people.

Beginning :

सन्ध्याकर्म प्रवक्ष्यामि नानावेदानुसारतः ।
वैश्यानां कर्मसिद्ध्यर्थं ब्रह्मेभ्यो(ह्मणा) परिकल्पितम् ॥

प्रातस्सन्ध्या—

भूतप्रेतपिशाचादिविघ्नकर्तॄ(र्तृ)निवारणम् ।
सकृदेतन्मन्त्रमुच्चार्यासनं परिकल्पयेत् ॥

प्राणायामलक्षणम्—

भूम्यादि चोर्ध्वलोकश्चोपर्यस्थो दिवाकरः ।
दशप्राणेन संयुक्तं त्रिरावृत्तं पुनः पुनः ॥
अङ्गुल्यग्रे नासिकाग्रं संपीड्यं पापनाशनम् ।
प्राणायामविधिः प्रोक्त ऋषिभिः परिकल्पितः ॥
मम समस्तदुरितनिवृत्त्यर्थं प्रातस्सन्ध्यामुपास्ये ।

End :

माध्याह्निकम्—पूर्ववदासनं, प्राणायामं, मार्जनं, जलप्राशनं, जलं पुनातु जगतीं जगती तु पुनातु माम् ।

अभोज्योच्छिष्टदुर्वृत्तिदुरितनाशिने नमः । पुनराचम्य मार्जनार्घ्यप्रदक्षिणक्रियादिकम् । आपोशनमन्त्रः । अमृतहारोऽस्तु, प्राणाय नमः, अपानाय नमः, व्यानाय नमः, उदानाय नमः, समानाय नमः, उत्तरापोशनम् ।

नरके मज्जिता यस्तु अद्भुतान्यद्भुतान्यपि ।
इमं जलं पिब तृषार्थाय तुष्ट्यर्थं पीयते मया ॥

Foll. 6*a* – 8*a* contain Gōtrapravara in Telugu language.

No. 14569. महाशान्तिः.

MAHĀŚĀNTIḤ.

Pages, 4. Lines, 5 on a page.

Begins on fol. 141*a* of the MS. described under No. 2503.

Contains the Śāntisūkta as found in Ṛks 1 to 15 of 35th **Sūkta in** the third Adhyāya of the seventh Maṇḍala of the Ṛgvēda.

Same work as that described under No. 1 ante.

No. 14570. भोजचरित्रम्.

BHŌJACARITRAM.

Pages, 5. Lines, 9 on a page.

Begins on fol. 1*a* of the MS. described under No. 2501.

Wants the beginning and the end.

Same work as that described under No. 12202 ante.

No. 14571. चाटुश्लोकाः.

CĀṬUŚLŌKĀḤ.

Page, 1. Lines, 7 on a page.

Begins on fol. 63*a* of the MS. described under No. 2151.

Similar to the work described under No. 12015 ante.

Beginning and the **End:**

सतां धनं साधुभिरेव भुज्ञ(ज्य)ते दुरात्मभिर्दुश्चरितार्जितं धनम् ।
शुकादिभि(द्य)श्चूतफलानि भुञ्जते अवन्ति निम्बाः (खलु काक) भोजनम् ॥

अत्युष्णात्सवृनादन्नादच्छिद्राच्चैव वाससः ।
अपरप्रेष्यभावाच्च भूय इच्छन् पतत्यधः ॥

(गुणवद्गुणवद्वा)वा कुर्वता कार्यजातं परिणतिरवधार्या यत्नतः कोविदेन।
अतिरभसकृतानां कर्मणामाविपत्ते(र्भवति) हृदयदाही शल्यतुल्यो विपाकः ॥

सूर्योदयप्रभृतिहन्ति तमिस्रजालं सद्बन्धुजातसुखदर्शनहानि दुःखम् ।
. . . . क्षपतनावधि पुंसि धैर्यं नारायणस्मरणपर्यवसायि पापम् ॥

No. 14572. श्रीरङ्गमाहात्म्यम्.
ŚRĪRAṄGAMĀHĀTMYAM.

Page, 1. Lines, 9 on a page.

Begins on fol. 23*b* of the MS. described under No. 2478.

Contains the seventh Adhyāya without the beginning and the end.

Similar to the work described under No. 2559 ante.

Beginning:

रामसेतोः पुण्यहेतोः उत्तरे त्य(त्र्य)ष्टयोजने ।
सप्तयोजनपर्यन्ते पूर्वसागरपश्चिमे ॥
कावेर्यामन्तरद्वीपे सप्तप्राकारमध्यमे ।
चन्द्रपुष्करणीतीरे नैरृत्यां रङ्गमन्दिरे ॥

End:

कोटिमन्मथलावण्यं साक्षात् ब्रह्माण्डवल्लभम् ।
श्रीरङ्गनाथो रङ्गेशो रङ्गरङ्गेतिनामतः ।

Colophon:

इति ब्रह्माण्डपुराणे ब्रह्मनारदसंवादे श्रीरङ्गक्षेत्रनिर्णयो नाम सप्तमोऽध्यायः ॥

चन्द्रपुष्करणीं गत्वा स्नात्वाचम्य यथाविधि ।
अर्चावताररङ्गेशं पूजयित्वा सभक्तितः ॥
. . . . पतिं देवं नारायणमनामयम् ।

No. **14573.** तृचकल्पविधिः.
TṚCAKALPAVIDHIḤ.

Pages, 7. Lines, 10 on a page.

Begins on fol. 26*a* of the MS. described under No. 2446.
Incomplete.
Same work as that described under No. 7851 ante.

No. **14574.** आवरणपूजा.
ĀVARAṆAPŪJĀ.

Page, 1. Lines, 10 on a page.

Begins on fol. 29*b* of the MS. described under No. 2446.
Wants the beginning and the end.
Similar to the work described under No. 5428 ante.

Beginning:

पुष्यमासाधिपत(ति)ये विष्णुः(ष्णुं) सनातनमावाहयामि । सप्तमावरणदेवताभ्यो नमः । साङ्गाय ।

असिताङ्गो रुरुश्चण्डक्रोध उन्मत्तभैरवः ।
कपालभैरवश्चैव संहारश्चाष्टभैरवः ॥

अष्टभैरवैरष्टमावरणम्—असिताङ्गभैरवमावाहयामि । रुरुभैरवमावाहयामि । चण्डभैरवमावाहयामि ।

End:

मेषमावाहयामि । वृषभमावाहयामि । मिथुनमावाहयामि । कर्कटकमावाहयामि । सिंहमावाहयामि । कन्यामावाहयामि । तुलामावाहयामि । वृश्चिकमावाहयामि । धनुमावाहयामि । मकरमावाहयामि ।

No. **14575.** गणेशाष्टकम्.
GAṆEŚĀṢṬAKAM.

Pages, 4. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 1850.
Almost complete.
Same work as that described under No. 9407 ante.

No **14576.** सरस्वतीस्तोत्रम्.
SARASVATĪSTŌTRAM.

Page, 1. Lines, 4 on a page.

Begins on fol. 2*b* of the MS. described under No. 1850.

Similar to the work described under No. 11299 ante.

Beginning and the **End** :

सरस्वति नमस्तुभ्यं वरदे कामरूपिणि ।
विद्यारम्भं करिष्यामि सिद्धिर्भवतु मे सदा ॥
पद्मपत्रविशालाक्षि(क्षी) पद्मकेसरवर्णिनि(नी) ।
नित्यं पद्मालया देवि(वी) सा मां पातु सरस्वती ॥

No. **14577.** गणेशाष्टकम्.

GANĒŚĀṢṬAKAM.

Pages, 6. Lines 5 on a page.

Begins on foll. 1*a*, 13*a* and 19*a* of the **MS.** described under **No.** 1864.

Complete.

Same work as **that** described under No. 9407 ante. The **Mantra** is written thrice.

No. **14578.** रामसहस्रनामस्तोत्रम्.

RĀMASAHASRANĀMASTŌTRAM.

Peags, 10. Lines, 6 on a page.

Begins on fol. 98*a* of the MS. described under No. 1865.

Incomplete.

Same work as that described under No. 8965 ante.

No. **14579.** पञ्चाङ्गम् (प्रभवादि).

PAÑCĀṄGAM (PRABHAVĀDI).

Pages, 5. Lines, 4 on a page.

Begins on fol. 135*a* of the MS. described under No. 1865.

Incomplete.

Same work as that described under No. 13135 ante.

No. **14580.** प्राणाग्निहोत्रविधिः.

PRĀṆĀGNIHŌTRAVIDHIḤ.

Pages, 3. Lines, 6 on a page.

Begins on fol. 135*a* of the MS. described under No. 11652.

Complete.

On the procedure of taking food conceiving it as a sacrifice for the five kinds of vital airs, viz., Prāṇa, Apāna, Vyāna, Udāna, and Samāna. It is stated that a person who takes food in the manne indicated above becomes fit for salvation.

Beginning:

नारद उवाच—

विनयेनोपसङ्गम्य ब्रह्माणं नारदोऽब्रवीत् ।
प्राणाग्निहोत्रं विधिवद्वद लोकपितामह ॥

पितामह उवाच—

प्राणाग्निहोत्रं वक्ष्यामि सर्वयज्ञेषु दुर्लभम् ।
यज्ज्ञात्वा मुच्यते जन्तुः जन्ममृत्यु(भ)यादिभिः ॥
परिज्ञातेन मुच्यन्ते नराः पातककिल्बिषैः ।
विधिना भुज्यते येन मुच्यते च ऋणत्रयात् ॥

* * * *

ओं अमृतोपस्तरणमसि स्वाहा । रुक्मवर्णः क्षुधाग्निः ऋषिः । आदित्यो देवता । गायत्री छन्दः । ओं प्राणाय स्वाहा । क्षुधाय आदित्याय इदं न मम ।

End:

ज्ञात्वैतद्विधिवद्भुक्त्वा ब्रह्मभूयाय कल्पते ।
एतद्धीशान्यतद्भागे भोक्तव्यं च प्रयत्नतः ॥

Colophon:

इति प्राणाग्निहोत्रविधिः ॥

No. **14581.** दुर्मरणप्रायश्चित्तम्.
DURMARAṆAPRĀYAŚCITTAM.

Pages, 3. Lines, 6 on a page.

Begins on fol. 127*a* of the MS. described under No. 11652.

Wants the beginning and the end.

Similar to the work described under No. 3474 ante.

Beginning:

इह दुर्मृतौ सति(त्याम्) अवश्यं नियमेन नारायणबलिर्भवेत् ।
प्राजापत्ये(च)गामेकां स्वयं सान्तपने तथा ।
पराके तप्तकृच्छ्रे तु निस्रस्तिस्रस्तदा स्मृताः ॥
अष्टौ चान्द्रायणे चैव दक्षिणास्तु विशेषतः ।

* * * *

एवंगुणतिथौ गोत्रस्य शर्मणः प्रमादात् चण्डालाद्यैर्हतस्य दुर्मरणजनितपापापनोदकं प्रायश्चित्तं परिषदुपस्थानपुरस्सरं करिष्यामीति सङ्कल्प्य, दक्षिणां गृहीत्वा परिषदं त्रिः प्रदक्षिणीकृत्य दक्षिणां दत्वा प्रदक्षिणीकृत्य नमस्कृत्य,

ये मृताः पापमार्गेण तेषां संवत्सरात्परम् ।
नारायणबलिं कृत्वा कुर्यादूर्ध्वक्रियादिकम् ॥

End:

प्रधानहोमो मुखरोमकृन्तनं . . . संस्कारमथाभिषेचनम् ।
* * * *
. . . . ग्रन्थिविमोक्षणञ्च ॥

Fol. 128*b* contains Jyautiṣaviṣaya.

No. **14582.** मलमासश्राद्धविषयः.
MALAMĀSAŚRĀDDHAVIṢAYAḤ.

Pages, 2. Lines, 5 on a page.

Begins on fol. 96*b* of the MS. described under No. 14513.

Wants the beginning and the end.

Similar to the work described under No. 14522 ante.

Beginning:

मलमासमृतानान्तु यच्छ्राद्धं प्रतिवत्सरम् ।
मलमासे तु कर्तव्यं नान्येषान्तु कदाचन ॥
शुद्धमासमृतानान्तु मलिने प्रथमाब्दिके ।
मलमासमृतानान्तु मले स्यादाब्दिकात्परम् ॥

End:

कालमाधवीये भृगुः—

मलमासमृतानान्तु यच्छ्राद्धं प्रतिवत्सरम् ।
मलमासे तु कर्तव्यं नान्येषान्तु कदाचन ॥
* * * *
वर्षे वर्षे तु यच्छ्राद्धं मातापित्रोर्मृतेऽहनि ।
मलमासे न कर्तव्यं व्याघ्रस्य वचनं यथा ॥

No. **14583.** नलोदयः, सव्याख्यः.
NALŌDAYAḤ WITH COMMENTARY.

Pages, 6. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 11525.

Contains the eight stanzas of the first Āśvāsa.

A commentary on the Nalōdaya of Kālidāsa, which work has been described under No. 11843 ante. The name of the commentator is not given.

Beginning:

ज्ञानानन्दमयं देवं (. . .) हयग्रीवमुपास्महे ॥
हृदयसदा यादवतः (. .) स्मरेण दायादवतः ॥

अत्र कविराद्यश्लोकचतुष्टयेनेष्टदेवतां प्रणमति । हे हृदय हे चेतः, यादवतः यदुकुलोद्भवात् पुरुषोत्तमात्, सदा सन्ततम्, (मा गाः) मा निवर्तस्व तत्रैव रमस्वेत्यर्थः । इण् गतावित्यस्माद्धातोर्लुङि गादेशः ।

End:

अतिदूरा अजात् इति आश्रिताल्पभेदा एव भूः स राजादित्यो येन सराजादित्यात त्रिदिवात संयुक्तशत्रुराजादित्या ।

खलसेनानावेद्य स्वांहोऽर्थौ भुवि च(यस्य)नानावेद्यः ।
स्निग्धजनानावेद्य प्रयतेस्य सुकाव्यविरचनानावेद्य ॥

No. **14584.** शिवकृष्णस्तुतिः, सव्याख्या.

ŚIVAKṚṢṆASTUTIḤ WITH COMMENTARY.

Pages, 2. Lines, 5 on a page.

Begins on fol. 23*a* of the MS. described under No. 11872.

Incomplete.

A eulogy addressed to Śiva and Kṛṣṇa, the stanzas being composed so as to be applicable to both at the same time. The work is followed by a commentary.

Beginning and the **End:**

सत्यासक्तमनाः प्रवृद्धनरकच्छेदी द्विजेन्द्राश्रयो
युक्तानेकमुखोद्भवास्पदमलं श्रीर्यत्र संराजते ।
योऽगङ्गाश्च सदा बिभर्ति सशिवो यः कामदेहाश्रयः
सङ्घस्साम्यमयं प्रयातु भवतां कृष्णेन रुद्रेण वा ॥

नरो वेदी शम्भुरज इत्यमरशेषः ।

नह्यम्मयानि तीर्थानि न देवा मृच्छिलामयाः ।
ते पुनन्त्युरुकालेन दर्शनादेव माधवः ॥

अयं सङ्घः साधु . . . रत्वात ब्रह्मशिरश्छेदक इत्यर्थः । द्विजराजश्शशधर इत्यमरेण । आस्पदशब्दस्य नित्यनपुंसकत्वात् आस्पदमित्युक्तम् । एते सभा(र)सिकजनाः वेदवेत्तारः ब्रह्मजनकत्वात् । उग्रः कपर्दी श्रीकण्ठइत्यमरेण । कण्ठे श्रीः हालाहलः । यः कृष्णः, एङः पदान्तादति इति

शब्दसूत्रण, शिवेन सह वर्तत इति सशिवः समङ्गल इत्यर्थः, 'श्वश्श्रेयसं शिवं भद्रं कल्याणं मङ्गलं शुभम्' इत्यमरेण। यः सः सरुद्र इत्यर्थः। यत्र कृष्णस्तत्र रुद्र इति विष्णुपुराणे उक्तत्वात्। 'शिवा भवानी रुद्राणी शर्वाणी सर्वमङ्गला' इत्यमरेण। दो अवखण्डन इति धातुना।

No. 14585. चतुश्श्लोकी.

CATUŚŚLOKĪ.

Page, 1. Lines, 6 on a page.

Begins on fol. 16*b* of the MS. described under No. 11874.

Incomplete

Same work as that described under R. No. 160(*a*) of the Triennial Catalogue of the Sanskrit MSS., Vol. I, Part I-A.

No. 14586. शब्दमञ्जरी.

ŚABDAMAÑJARĪ.

Page, 1. Lines, 6 on a page.

Begins on fol. 17*a* of the MS. described under No. 11874.

Incomplete.

Same work as that described under No. 1554 ante.

No. 14587. ब्रह्मकूर्चपञ्चगव्यविधिः.

BRAHMAKŪRCAPAÑCAGAVYAVIDHIḤ

Pages, 5. Lines, 4 on a page.

Begins on fol. 77*b* of the MS. described under No. 11724

Almost complete.

Similar to the work described under No. 3739 ante.

Beginning:

अथातो ब्रह्मकूर्चविधिं व्याख्यास्यामः, चतुर्दश्यामुपोषणं कृत्वा पौर्णमास्यां स्नातश्शुचिर्भूत्वा पुण्याहं वाचयित्वा नदीतटे गोष्ठादिशुचौ देशे स्थण्डिले विधिनाग्निं प्रतिष्ठाप्य,

गोमूत्रं गोमयं क्षीरं दध्याज्य(ञ्च)कुशोदकानि ब्रह्मकूर्चद्रव्याणि। तत्र कृष्णवर्णाया गोमूत्रं, श्वेतवर्णाया गोमयं, ताम्रवर्णायाः क्षीरं, रक्तवर्णायाः दधि, कपिलाया घृतम्। एवमलाभे कपिलायास्सर्वं तदलाभ एकवर्णाया वा गृहीत्वा पञ्चगव्यादि मध्यदेशे गोमूत्रं, तत्पुरस्ताद्गोमयं, प्रतीच्यां क्षीरं, (दक्षिण)तश्चैव दध्युदीच्यामाज्यमीशान्यां कुशोदकमेवं क्रमेण संस्थाप्य।

End:

माषचतुष्टयमितकुशोदकम् । सार्धपणद्वयमानं माषमित्युच्यते । एवं विधिना सङ्गृह्य ।

No. **14588.** ब्रह्मसूत्राणुभाष्यम्.
BRAHMASŪTRĀṆUBHĀṢYAM.

Page, 1. Lines, 6 on a page. Character, Kanarese.

Begins on fol. 65*a* of the MS. described under No. 11568.

Contains the first Adhyāya only.

Same work as that described under No. 4816 ante.

Fol. 61*b* contains the third stanza of the first Skandha in the Bhāgavata with Kanarese poems, fol. 63*b* contains a few Kanarese sentences and fol. 65*b* contains Aṇuvāyustuti in Sanskrit with Kanarese meaning.

No. **14589.** धर्मशास्त्रश्लोकाः.
DHARMAŚĀSTRAŚLŌKĀḤ.

Page, 1. Lines, 4 on a page.

Begins on fol. 88*a* of the MS. described under No. 11729.

A few stanzas on the taking of Pañcagavya, etc.; the stanzas being taken from various texts.

Beginning and the **End:**

यत्त्वगस्थिगतं पापं देहे तिष्ठति मामके ।
प्राशनं पञ्चगव्यस्य दहत्यग्निरिवेन्धनम् ॥
लशुनं विड्वराहं च पलण्डुं ग्रामकुक्कुटम् ।
गृञ्जनं शशकञ्चैव भक्षयित्वा नरः पतेत् ॥
आपोशनममृतोपस्तरणमसि, उत्तरापोशनममृतापिधानमसि ।
अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः ।
प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम् ॥

No. **14590.** वीररामस्तोत्रम्.
VĪRARĀMASTŌTRAM.

Page, 1. Lines, 6 on a page.

Begins on fol. 5*a* of the MS. described under No. 11465.

Incomplete.

A eulogy addressed to God Rāma describing His valour.

Beginning:

नानादिव्यास्त्रतेजाः स्थिरत(म)हितभुजे(जः) शत्रुसंहारधीरः
कौटिल्योद्योतमानभृगु(भ्रुकु)टिशरमुखं भ्रामयन्तं . . . ।

. . . . ताडयित्वा
वीरश्रीबन्धुराङ्गस्त्रिदशपतिनुतः पातु मां वीररामः ॥

End :

हत्वा युद्धे दशास्यं त्रिभुवनविषमं वामहस्तेन चापं
भूमौ विष्टप्य(भ्य) तिष्ठन्नितरकरधृतं भ्रामयन् . . . . ।
. . . . कोटिसूर्यप्रकाशो
वीरश्रीबन्धुराङ्गस्त्रिदशपतिनुतः पातु मां वीररामः ॥
सन्नद्धकौ(कव)ची खड्गी[च]चापबाणधरो युवा ।

No. **14591.** राममङ्गलश्लोकव्याख्या.
RĀMAMAṄGALAŚLŌKAVYĀKHYĀ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 18*a* of the MS. described under No. 11492.

Incomplete.

A commentary on a stanza wishing benedictions on Rāma. At the end of the MS. there is an unconnected stanza applicable both to God Śiva and Kṛṣṇa at the same time.

Beginning :

जानक्या इति । विवाहस्य इमा वैवाह्यः वैवाह्या एव वैवाहिकाः श्रीरामचन्द्रस्य वैवाहिकाः ताः मुक्ताः । तत्पादारविन्दभक्तियुक्तानां भवतां शुभदास्सकलकल्याणदायका भवन्त्वित्याशीराशास्यते । यत्तदोर्नित्यसंबन्धात् तच्छब्दस्य यच्छब्दाकाङ्क्षायामाह— या इति । याः मुक्ताः । जनकस्यापत्यं स्त्री जानकी तस्यास्सीतायाः ।

End :

क्षालयामि तव पादपङ्कजे नाथ दारुदृषदोः किमन्तरम् ।
मानुषीकरणचूर्णमस्ति ते पादयोरिति कथा प्रथीयसी ॥

श्रीरामवैवाहिकाः ताः मुक्ताः भवतां शुभदाः आयुरारोग्यपुत्रार्थराज्यबन्धुसमृद्धिप्रदा भवन्त्वित्याशीर्वादः ।

सत्यासक्तमनाः प्रवृद्धनरकच्छेदी द्विजेन्द्राश्रयो
युक्तानेकमुखोद्भवास्पदमलं श्रीयत्र संराजते ।
योऽगङ्गां च मुदा बिभर्ति सशिवो यः कामदेहाश्रयः
सङ्ग(स्साम्यमयं प्रपातु भवतां कृष्णेन रुद्रेण वा) ॥

No. **14592.** किरातार्जुनीयम्.
KIRĀTĀRJUNĪYAM.

Pages, 20. Lines, 5 on a page.

Begins on fol. 109*a* of the MS. described under No. 11546.

Contains the Sargas two (46th to 58th stanza), three (1 to 14), four (complete) and five (1 to 32) only.

Same work as that described under No. 11464 ante.

No. 14593. श्रुतबोधः.

ŚRUTABŌDHAḤ.

Pages, 12. Lines, 5 on a page.

Begins on fol. 89*a* of the MS. described under No. 12959.

Complete.

Same work as that described under No. 1800 ante; but the index of the names of the metres is given in the beginning.

No. 14594. अलङ्कारविषयः.

ALAṄKĀRAVIṢAYAḤ.

Pages, 8. Lines, 5 on a page. Character, Telugu and Grantha.

Begins on fol. 95*a* of the MS. described under No. 12959.

Incomplete.

Defines the various kinds of Śabdālaṅkāra. Similar to the work described under No. 12977 ante.

Beginning :

शब्दालङ्काराः षड्विधाः—वक्रोक्तिः, अनुप्रासः, यमकम्, श्लेषः, पुनरुक्तवदाभासः ।

ते च वक्रोक्त्यनुप्रासौ यमकं श्लेष इत्यपि ।
चित्रं च पञ्चमष्षष्ठोऽप्याभासः पुनरुक्तवत् ॥

वक्रोक्तिर्द्विविधा—श्लेषवक्रोक्तिः, काकुवक्रोक्तिः ।

यदुक्तमन्यथा वाक्यमन्यथान्येन योज्यते ॥
श्लेषेन काका वा ज्ञेया सा वक्रोक्तिस्तथा द्विधा ॥

End :

एकार्थता भ्रान्तिकरानेकशब्दनिबन्धने ।
पुनरुक्तवदाभासं प्रवदन्ति विपश्चितः ॥
शब्दाश्रयस्तथा शब्दार्थाश्रयोऽयं द्विधा मतः ।
सभङ्गाभङ्गभेदेन द्विधा शब्दैकसश्रयः ॥

No. 14595. शृङ्गारसारविषयानुक्रमणिका.

ŚṚṄGĀRASĀRAVIṢAYĀNUKRAMAṆIKĀ.

Pages, 6. Lines, 5 on a page.

Begins on fol. 100*a* of the MS. described under No. 12959.

Incomplete.

Contains the table of contents of the six Ullāsas in Śṛṅgārasāra, described under No 12958. along with the index of each Ullāsa.

Beginning:

(1) काव्यनिरूपणम्, (2) लक्ष्यलक्षणविभागः, (3) दोषगुणालङ्कारविवेकः, (4) रसभावस्वरूपनिरूपणम्, (5) चतुर्विधशृङ्गारप्रदर्शनम्, (6) नाटकस्वरूपनिरूपणम्। I उल्लासे काव्यलक्षणम् 1; पत्रे, काव्यप्रयोजनम् 2; क्षुद्रप्रबन्धाः 3; कविलक्षणम् 4; अर्थलक्षणम् 5; काव्यसामग्री वैदर्भीरीतिः।

6 उल्लासे नाटकप्रकरणम्– तल्लक्षणम्—इतिवृत्तं, बिन्दुः, प्रकरी, बीजं, पताका, कार्यम्, आरम्भः, यत्नः, प्राप्त्याशा, नियताप्तिः, फलागमः।

No. 14596. पद्मावतीस्तोत्रम्.
PADMĀVATĪSTŌTRAM.

Page, 1. Lines, 7 on a page.

Begins on fol. 73*a* of the MS. described under No. 11542.

Wants the beginning; otherwise complete.

A eulogy addressed to Goddess Padmāvatī, who is the same as Lakṣmī: by Śrīmalliṣēṇa.

Beginning:

चतुर्भुजा पाशफलप्रदानंद्विपेन्द्रवश्याङ्कितचारुहस्ता।
त्रिलोचना रक्तसरोजपीठा पद्मावती . . . . ॥

* * * *

यन्त्रं लिखित्वागरुचन्दनाद्यैः प्रपूजयेदुत्तरदिङ्मुखस्थः।
दशाक्षरं मन्त्रमिमं जपेद्यः किं वर्ण्यते तस्य फलं तु पद्मे॥

End:

पद्मावतीस्तोत्रमिदं त्रिसन्ध्यं श्रीमल्लिषेणेन कृतं पठेद्यः।
स सिद्धवाक् सर्वजनानुरागी सर्वार्थकामांश्च तदा लभेत॥

Fol. 73*b* contains two stanzas relating to medicine.

No. 14597. क्षमाषोडशी.
KṢAMĀṢŌḌAŚĪ.

Pages, 4. Lines, 7 on a page.

Begins on fol. 68*a* of the MS. described under No. 12150.

Complete.

Same work as that described under R. No. 173(*o*) of the Triennial Catalogue of Sanskrit MSS., Vol. I, Part I-A.

Fol. 70 contains a small portion of the Raṅganāthaprapatti and the Prārthanāpañcaka.

No. 14598. पेरुन्देवीस्तोत्रम्.
PERUNDĒVĪSTŌTRAM.

Pages, 8. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 3890.

Incomplete.

Same work as that described under No. 11424 ante; but wants three stanzas in the beginning.

No 14599. षोडशकलानामानि.
ṢŌḌAŚAKALĀNĀMĀNI.

Page, 1. Lines, 8 on a page.

Begins on fol. 51*a* of the MS. described under No. 3890.

Complete.

Gives the names of sixteen Kalās in accordance with the Kāmaśāstra.

Beginning and the **End**:

अङ्कुष्ठ इत्यादिषोडशकलानामानि लिख्यन्ते—

श्रद्धा प्रीति(ती)रतिश्चैव धृतिः कान्तिर्मनोरमा ।
मनोहरा मनोरामा मदनोन्मादिनी प्रिया ॥
मोहिनी दीपिनी चैव दोषिणी च वशङ्करी ।
रञ्जिनी सुभगा देवी षोडशी प्रियदर्शना ॥
षोडशस्वरसंयुक्ता एताः कामकला यजेत् ।

No. 14600. क्रियागोपनरामायणम्.
KRIYĀGŌPANARĀMĀYAṆAM.

Pages, 3. Lines, 8 on a page.

Begins on fol. 52*a* of the MS. described under No. 3890.

Contains only 16 stanzas in the beginning.

Same work as that described under R. No. 7, Vol. I, Part I-A.

Beginning:

क्रियागुप्तिश्लोकाः—

अथ वाल्मीकिना पृष्टं नारदो रामवैभवम् ।
विज्ञातोवादविद्यानां सङ्क्षेपेण मनोहरम् ॥ उवाद ।
नारदस्य वचः श्रुत्वा वाल्मीकिर्मुनिपुङ्गवः ।
सम्यगाराध्यसन्तोष(गभीर)जलधेस्तटम् ॥ आर ।

End:

व्रतस्नानादिकं कृत्वा प्रणिपत्याष्ट दिक्पतीन् ।
सभां वैवाहिकीं रामः कृतकौतुकमङ्गल[विग्रह]ः ॥ आष्ट ॥

No. **14601.** चतुरङ्गक्रीडाश्लोकाः.

CATURAṄGAKRĪḌĀŚLŌKĀḤ.

Pages, 3. Lines, 8 on a page.

Begins on fol. 54*a* of the MS. described under No. 3890.

Incomplete.

A few stanzas explaining the method of playing at the chess.

Beginning:

चतुरङ्गक्रीडायां निखिलगृहाणां च चारिताश्वस्य ।
सम्भवति दर्शनेन श्लोकयुगस्येह पश्यतां नणाम् ॥
आतं प्रकनवाप्पङ्के रमा नेह नुने तदे ।
शिष्यशीनाम्नृपुङ्कस्य खातरत्र पवापव ॥
अनेन तव पुत्रेण प्रसुप्तस्य वनान्तरे ।
शिखामाक्रम्य पादेन खड्गेनापहृतं शिरः ॥
पदातिबन्धननिबन्धनेयं किञ्चित् क्रीडा ना(म)लिख्यते ।
कठिकरिखटणेतागारराजे भसाहा गततुरगवरीयान् चण्डमर्त्यो बलीयान् ।
गलसुबलमहीपो चारुले दन्तिचक्रीच्छणमनुजजनैस्संमान्त्रिवर्योरिदेता ॥
जितबलानि षट् जेतृबलानि पञ्च—क्रीडाक्रमः आरम्भे चक्री घटेमन्त्री ।

End:

कदमहिसुखसेना डेशमर्त्यो चटेशे भभटभरतुरङ्गो जारवेश्मापभूपः ।
खरशागजहयौग्योतोष्ट्रनाधावसाने भनङ्लदनचक्रीच्चेन छेवाशभूमाः ॥
[१२ १९ डेमः गजः ।

Foll. 56*a*—61*a* contain the Auṣadhayōga in Sanskrit, Telugu and Tamil languages

No. 14602. पूर्णपुरुषार्थचन्द्रोदयकथाविषयः.
PŪRṆAPURUṢĀRTHACANDRŌDAYAKATHĀVIṢAYAḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 45*a* of the MS. described under No. 12541.

Gives very briefly in verse the purport of the drama described under No. 12540 ante.

Beginning and **End:**

अध्यात्मार्थप . . . . . येन श्रीमता इदम् ।
दशेन्द्रियतरङ्गाढ्यं जीवं कश्चन मायया ॥
मोहितं परमेशस्य विप्रदेहमुपाश्रितम् ।
बुद्धेरुदयतः पश्चात् सुखं मे स्यात् सदा मम ॥
मा भूद्दुःखं कदापीति चिन्तयन्तं स्वभावतः ।
तत्रानेकजनानां हि दृष्ट्वा विषयकौतुकम् ॥
अन्वयव्यतिरेकाभ्यां सुखदान् विषयांस्तथा ।

* * * *

इदानीं सूत्रधारोऽयं नायकं सूत्रयत्यमुम् ।
गणिकाविषयांश्चान्यान् परित्यज्याद्यनायकः ॥

* * * *

अथवा नाटके देहस्तस्य चापाद्यते मृषा ।
वेदान्ताध्ययने पूर्वं दर्शने या दशाभवत् ॥

No. 14603. विष्णुभुजङ्गः.
VIṢṆUBHUJAṄGAḤ.

Pages, 5. Lines, 7 on a page.

Begins on fol. 52*a* of the MS. described under No. 12580.

Complete.

Same work as that described under No. 10350 ante.

No. 14604. सूर्यशतकम्.
SŪRYAŚATAKAM.

Pages, 8. Lines, 7 on a page.

Begins on fol. 55*a* of the MS. described under No. 12580.

Contains 7 to 31 stanzas only.

Same text as that described under R. No. 139(*b*) of the Triennial Catalogue of Sanskrit MSS., Vol. I, Part I-A.

Fol. 57*b* contains the Pādaghaṭikāpramāṇavacanas.

No. 14605. गुलिकाचूर्णप्रयोगः.

GULIKĀCŪRṆAPRAYŌGAḤ.

Pages, 3. Lines, 7 on a page.

Begins on fol. 118*a* of the MS. described under No. 12223.

On details connected with the preparation of gunpowder for use in the manufacture of fire works of different kinds.

Beginning:

अथोपा(य)प्रयोगार्थमौषधं प्रतिपाद्यते ।
लवणानां दशपलं गन्धकस्य पलत्रयम् ॥
इङ्गालश्च(श्चार्क)काष्ठस्य पलत्रयमुदाहृतम् ।
स्नुहीपत्ररसेनैव पेषयेत्सम्यगौषधम् ॥
पादाधिकं पट् पलानि लवणं गन्धकं पलम् ।
अङ्गारस्य पलं प्रोक्तमशीतिः कुट्टयेद्दृढम् ॥

End:

इङ्गालस्तावदेव स्यात्पञ्चमांशश्च लोहकम् ।
जलपा(बा)णस्य योगोऽयं कीर्तितो बाणवेदिभिः ॥

No. 14606. धर्मशास्त्रवचनानि.

DHARMAŚĀSTRAVACANĀNI.

Pages, 10. Lines, 4 on a page.

Begins on fol. 101*a* of the MS. described under No. 12537.

Wants the beginning and the end.

Extracts from various works on Dharmaśāstra laying down the undesirability of the marriage of the younger brother or sister while the elder is unmarried and stating the exceptions to this rule.

Beginning:

अखण्डादर्शे यमः—

ज्येष्ठे . . . . विधीयते ।
निविष्टश्चानिविष्टे तु परिवेत्ता स उच्यते ॥

अत्र गौत(म):— ज्येष्ठेऽनिविष्टे कनीयान्निविशन् परिवेत्ता भवति । परिवित्तो

ज्येष्ठः । परिवेदिनी कन्या । परिदाता उपकर्ता । ते सर्वे पतिता इति । एवमेकमातृप्रसूतानां कन्यानामपि दोषः । भिन्नमातृप्रसूतानां पुरुषाणां च स्त्रीणां च न दोषः । तथाहि—भिन्नमातृप्रसूतानां ज्येष्ठस्य ज्येष्ठाया(ः) पतिक्रमविवाहे तु न दोष इति औद्दालो(लेनो)क्तम् ।

End:

रम्भाविवाहं त्वथवाप्यन्यस्यैव यथोदितम् ।
अग्रजश्चेदनग्निस्स्यादनुजश्श्रद्धया यदि ।
आधातुमग्रजानुज्ञां प्राप्य कुर्वन्न दोषभाक् ।
पुत्रोऽपि पित्रानुज्ञात आदधीतेति शङ्खवाक् ॥

Fol. 187 contains a few portions of Hōmaprayōga.

No. 14607. प्रवरनिर्णयः.

PRAVARANIRṆAYAḤ.

Pages, 2. Lines, 4 on a page.

Begins on fol. 108*a* of the MS. described under No. 12537.

Wants the beginning and the end.

Similar to the work described under No. 2918 ante.

Beginning:

जमदग्निर्भरद्वाजो विश्वामित्रात्रिगौतमाः ।
वसिष्ठः कश्यपोऽगस्त्यो मुनयो गोत्रकार(काः) ॥
एतेषाञ्चान्वपत्यानि तानि गोत्राणि मन्वते ।
त्र्यगाणतया वापि सत्तया वानुवर्तनम् ॥
एकस्य दृश्यते यत्र तद्गोत्रं तस्य कथ्यते ।
समानमुनिमूयस्थ(स्त्व)मेकप्रवरतामपि ॥
समानप्रवरत्वञ्च द्वेधा बोधायनोऽब्रवीत् ।

End:

उक्तास्सप्त भृगोर्वंशाः वर्ध्दन्त्यङ्गिरसो गणाः ।
गौतमास्सप्तचायास्यः शरद्वन्तः तथापरे ॥
कौमण्डा दीर्घतमसः ततः कारेणुपालयः ।
वामदेवा औशनसा गोत्रैणैक्यान्वया (मताः) ॥

No. 14608. वैद्यविषयः.

VAIDYAVIṢAYAḤ.

Pages, 2. Lines, 5 on a page.

Begins on fol. 109*a* of the MS described under No. 12537.

Wants the beginning and the end.

Similar to the work described under No. 13219 ante.

Beginning :

शुद्धरसं घनसारं पत्रं जातीफलं लवङ्गञ्च ।
अम्बुधिशेषं फेनं बीजं हेमस्य वाक्करक्षीरम् ॥
प्रत्येकं निष्कमिदं निष्पेष्य च नालिकेरफलमध्ये ।
क्षिप्त्वा गव्ये पयसि द्रोणे क्षीरावशेषमाशोष्य ॥
डोलायन्त्रेण घृतं नालीकेरञ्च खण्डशः छित्त्वा ।
छायाशुष्कं कृत्वा सायाह्ने भक्षयेद्रात्रौ ॥
सघृतगुलक्षीरयुतं भुञ्जीयात् सं . . येच्छुक्रम् ।

End :

विधाय चार्कफलप्रमाणा वटीं नियुञ्ज्यात् कदलीफलेन ।
सम्मोहनञ्च प्रमदाजनस्य संस्तम्भनं स्याच्चरमस्य धातोः ॥
टङ्कणं नवसारञ्च कर्पूरं केतकीरजः ।
अर्का . . . . ॥

No. 14609. सङ्कल्पसूर्योदयव्याख्या.
SAṄKALPASŪRYŌDAYAVYĀKHYĀ.

Substance, palm-leaf. Size, $12\frac{1}{4} \times 1\frac{3}{8}$ inches. Pages, 145. Lines, 7 on a page. Character, Nandināgarī. Condition, fair. Appearance, old.

Begins on fol. 1*a*. The other work herein is Karṇāṭaka-vyākaraṇa 74*a*.

Contains the first Act only.

Similar to the works described under Nos. 12713 to 12718 ante. By Nārāyaṇa, son of Hastigirinātha of Śrīvatsa family and pupil of Vādhūla Varadācārya.

Beginning :

हृदयं दधातु सदयं यदूद्वहं शरणागतार्तिहरणाय दीक्षितम् ।
नवनीरदाभमवनीरजश्रियैः परिधूसराङ्गमवधूतकल्मषम् ॥
जयति श्रीमहाचार्यो वेदान्तार्थप्रकाशकः ।
कुहनाबद्धसिद्धान्तश्रद्धाध्वान्तदिवाकरः ॥
वाधूलवरदाचार्यं विद्यासाम्राज्यदीक्षितम् ।
ऐहिकामुष्मिकार्थानां दातारम निशं भजे ॥

वाधूलश्रीनिवासार्यकृपालब्धोपलब्धिना ।
वाधूलवरदाचार्यदयोपाचितबुद्धिना ॥
ततश्श्रुत्वैव सङ्कल्पसूर्योदयसमाह्वयम् ।
नाटकं विदुषां प्रीत्यै विशदीक्रियते मया ॥
त्रय्यन्तदेशिकोक्तिः क्व क्व चाहमतिमन्दधीः ।
तथाप्यत्र प्रवेशो मे भेकस्येवोचितोऽर्णवे ॥

इह खलु परमकारुणिको भगवान् वेदान्ताचार्यः श्रीरङ्गनाथस्वामिसेवाधुरन्धरैः परमैकान्तिभिः तदीयदिव्यास्थानाभिनयोचितदिव्यनाटकप्रबन्धनिर्माणाय प्रार्थितः तत्प्रीतये भगवत्प्रीतये वेदान्तसिद्धान्तरक्षणाय च काव्यं यशसे

* * * *

परब्रह्मपरवेदान्तमार्गानुसारितया ज्ञानावतरणरूपं सङ्कल्पसूर्योदयाख्यं दिव्यं नाटकं चिकीर्षुः

'प्रथमं पूर्वरङ्गश्च ततः प्रस्तावनेति च ।
आरम्भे सर्वनाट्यानामेतत्सामान्यमिष्यते' ॥

* * * *

इष्टदेवताप्रार्थनादिरूपां नान्दीमादौ निबध्नाति—यद्भक्तीत्यादिना । आदिकाले शिवताण्डवसमये रङ्गतां प्राप्तं नन्दिनमुद्दिश्य कृतायाः पूजायाः नान्दीत्वेऽपि तत्प्रतिपादकत्वेन श्लोकस्यापि नान्दीसंज्ञा उपपन्ना ।

End :

अस्मद्विजयसन्नाहसन्धुक्षकैरिति । अनेन स्वस्य बाह्यकुदृष्टिप्रतिक्षेपे देवतासहायोऽप्यस्तीति विभावितम् । पात्रनिष्क्रमणं कार्यमङ्कान्ते स्वयमेव हीत्यादि वचनमनुसृत्याह—निष्क्रान्ताविति । प्रथमोऽङ्क इति । अङ्कस्वरूपञ्च दशरूपके प्रतिपादितम्—

प्रत्यक्षनेतृचरितो बीजबिन्दुपुरस्कृतः ।
अङ्को नानाप्रकारार्थसंविधानरसाश्रयः ॥ इति ।

Colophon :

इति श्रीवाधूलवरदाचार्यकृपालब्धवेदवेदान्तालङ्कारिकविविधमार्गविज्ञानस्य श्रीवत्सकुलजन्मनो हस्तिगिरिनाथात्मजस्य श्रीमन्नारायणस्य कृतिषु सङ्कल्पसूर्योदयव्याख्याने प्रथमोऽङ्कः ॥

जयति श्रीमहाचार्यः (. . .) श्रद्धाध्वान्तदिवाकरः ॥
प्रणमामि शुभाचारं प्रणतत्राणदीक्षितम् ।
वातूलं वादितूलानां वाधूलं वरदं गुरुम् ॥
वाधूलवरदाचार्यैर्विद्यासाम्राज्यदीक्षितैः ।
विद्यास्थानानि सर्वाणि राजन्वन्ति समिन्धते ॥

No. 14610. कर्णाटकव्याकरणम्.

KARṆĀṬAKAVYĀKARAṆAM.

Pages, 4. Lines, 6 on a page. Character, Grantha.

Begins on fol. 74*a* of the MS. described under the previous number.

Contains the first Paricchēda complete and a few lines in the second Pariccheda.

Same work as that described under R. No. 133(*a*) of the Triennial Catalogue of the Sanskrit MSS., Vol. I, Part I-A, wherein see for the end.

Beginning:

सर्वज्ञं तमहं वन्दे परञ्ज्योतिस्तमोऽपहम् ।
प्रवृत्ता यन्मुखाद्देवी सर्वभाषा सरस्वती ॥

अथ कर्णाटकशब्दसिद्धिः । अथशब्दोऽयमादौ मङ्गलार्थः । मङ्गलादीनि शास्त्राणि प्रथन्त इति । अधिकारार्थो वा । इह कर्णाटकविषये शब्दसिद्धिरधिक्रियत इत्यर्थः । अकारादयः प्रसिद्धा वर्णाः । अकारादयो वर्णाः हकारपर्यवसानाः प्रसिद्धा ये(ए)व वेदितव्याः । तेषामनादिकाले प्रसिद्धत्वादन्यथा नोपदेष्टव्याः । तेष्वादौ चतु(र्द)श स्वराः । तेष्वकारादिवर्णेष्वादौ व्यवस्थिता ये चतुर्दश वर्णाः ते स्वरसंज्ञा भवन्ति ॥

No. 14611. विष्णुपञ्जरमन्त्रः.

VIṢṆUPAÑJARAMANTRAḤ.

Substance, palm-leaf. Size, 4¾ × 1¼ inches. Pages, 8. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, old.

Complete; as found in the Brahmāṇḍapurāṇa.

Same work as that described under No. 7237 ante.

No. 14612. अन्योक्तिः.

ANYŌKTIḤ.

Pages, 2. Lines, 4 on a page.

Begins on fol. 100*a* of the MS. described under No. 12856.

Similar to the work described under No. 11992 ante.

Beginning and the **End**:

अस्मान् विचित्रवपुषश्चिरपृष्ठलग्नान् कस्माद्विमुञ्चसि शिखिन्नथवा विमुञ्च ।
हा हन्त हन्त बलहानिरियं तवैव श्रीकृष्ण मूर्ध्नि(च)पुनर्भविता स्थितिर्नः ॥

मा गर्वमुद्वह बिडाल महीपतीनामन्तःपुरे मणिमये निलयं तवेति ।
वीराभिषेकसमये च महीश्वराणां बाह्यस्थितस्य कलभस्य च मण्डनश्रीः ॥

चातकस्त्रिचतुरान्पयःकणान् याचते जलधरं पिपासया ।
सोऽपि पूरयति विश्वमम्भसा हन्त हन्त महतामुदारता ॥

विशालं शाल्मल्या नयनसुभगं वीक्ष्य कुसुमं
शुकस्यासीद्बुद्धिः कुसुमसदृशं(तत्)फलमिति ।
चिरासीने तस्मिन्फलमपि च दैवात्परिणतः(तं)
विपाके तूलस्स्यात्तदपि मरुता सोऽप्यपभृ(हृ)तः ॥

Fol. 101 contains a few stanzas being a communication intended to Śrī-Lakṣmīnṛsiṁhādhvarin by his disciple Vēṅkaṭēśa.

No. **14613.** गरुडदण्डकः.

GARUḌADAṆḌAKAḤ.

Pages, 3. Lines, 5 on a page.

Begins on fol. 67*a* of the MS. described under No. 12857.

Complete.

Same work as that described under R. No. 673(*t*) of the Triennial Catalogue of Sanskrit MSS., Vol. I, Part I-C, but wants the last stanza in the end.

Colophon:

इति श्रीकवितार्किकसिंहस्य श्रीमत्सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु श्रीगरुडदण्डकं सम्पूर्णम् ॥

No. **14614.** चाटुश्लोकाः.

CĀṬUŚLŌKĀḤ.

Pages, 3. Lines, 5 on a page.

Begins on fol. 227*b* of the MS. described under No. 12915.

Similar to the work described under No. 12016 ante.

Beginning and the **End**:

पारीणाः पदसागरस्य कतिचित्तन्त्रे स्वतन्त्राः परे
केचित्कर्कशतर्कवक्रभणितिप्रौढिप्रियंभावुकाः ।
अन्ये सत्कवितामृताब्धिलहरीमृष्टांशुमुष्टिन्धयाः
नैते केऽपि वयन्तु किन्तु त इमे सर्वे बहूकुर्वते ॥
पूर्वं कल्पतरुप्रसूनमदिरास्वादेन मेदस्विनी
दीव्यद्दिव्यतरङ्गिणीकमलिनीप्रेङ्खोलिकाकेलिनी ।
दैवादद्य महीतले मधुकरी निष्पावपुष्पेच्छया
भ्राम्यन्ती कृकलासवक्रकुहरं हा हन्त सङ्गाहते ॥
ननु कोद्रव पैत्त्यदुर्विकारान्विदधानीति किमत्र चित्र(मेतत्) ।
कठिनेऽपि घरट्टके प्रविश्य स्वमहिम्नापि शिरोभ्रमं करोषि ॥
चक्रभ्रमणकरत्वात्कुदृष्टिभिर्दूरवर्जनीयत्वात् ।
श्रुत्यन्तगीयमानत्वात् मशक त्वामेव माधवं मन्ये ॥
इन्द्रकण्ठिकुलसिन्धुचन्द्रमाश्चन्द्रशेखरपदैकसेवकः ।

No. **14615.** गृहस्थापननिर्णयः, कर्णाटकटीकासहितः.

GṚHASTHĀPANANIRṆAYAḤ WITH KANARESE MEANING.

Page, 1. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 1623.

Complete.

On the auspiciousness or inauspiciousness of each of the 12 lunar months for the purpose of building a house.

Beginning and the **End**:

गृहसंस्थापनञ्चैव कलहं चैत्रमास(सि)कम् ।
वैशाखं धनवृद्धिस्स्याज्ज्येष्ठा च मरणं ध्रुवम् ॥
आषाढे गोकुलं हन्ति श्रावणे भृत्यवर्धनम् ।
भाद्रपदा प्रजारोगा कलहास्वच(श्विज)मासकम् ॥
कार्त्तिके रत्नलाभस्स्यान्मार्गशीर्षे महाभयम् ।
पुष्ये चाग्निभयं विद्यात् माघे च बहुपुत्रकम् ॥
फाल्गुने रत्नहानिस्स्याद्गृहमण्टपलक्षणम् ।

Fol. 1*b* contains four stanzas in the third Sarga of Śiśupālavadha.

No. 14616. समासचक्रम्.
SAMĀSACAKRAM.

Pages, 2. Lines, 4 on a page.

Begins on fol. 133*a* of the MS. described under No. 1628.

Incomplete.

Same work as that described under No. 1558 ante.

No. 14617. चाटुश्लोकाः.
CĀṬUŚLŌKĀḤ.

Page, 1. Lines, 6 on a page.

Begins on fol. 43*b* of the MS described under No. 1654.

Similar to the work described under No. 12017 ante.

Beginning and the **End**:

चरन्वनान्ते नवमञ्जरीषु न षट्पदो गन्धफलीमजिघ्रत् ।
सा किन्न रम्या स च किन्न रन्ता बलीयसी केवलमीश्वरेच्छा
शरीरपतनावधि प्रभुनिषेवणापादना-
दबिन्धनधनञ्जयप्रशमनं धनं दन्धनम् ।
धनञ्जयविवर्धनं धनमुदूढगोवर्धनं
सुसाधनमबाधनं सुमनसां समाराधनम् ॥
अहमिहैव वसन्नपि तावकः त्वमपि तत्र वसन्नपि मामकः ।
हृदयसङ्गम एव सुसङ्गमः न तनुसङ्गम एव सुसङ्गमः ॥

Fol. 43*b* contains some Telugu Padyas.

No. 14618. विष्णुस्तुतिः.
VIṢṆUSTUTIḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 98*a* of the MS. described under No. 1651.

Complete.

Similar to the work described under No. 10356 ante.

Beginning:

रक्ताम्भोरुहदर्पभञ्जनमहासौन्दर्यनेत्रद्वयं
मुक्ताहारविलम्बिहेममकुटं रत्नोज्ज्व(ल)त्कुण्डलम् ।
वर्षाभ्रौघसमाननीलवपुषं ग्रैवेयहारान्वितं
शङ्खचक्रधरं प्रसन्नवदनं नीलाद्रिनाथं भजे ॥

End :

कुन्दाभं द्विभुजं त्रिभङ्गिललितं शान्तं जटाकुञ्चितं
स्तब्धश्रोत्रमनिन्दितांसयुगलं पीताम्बरं सुन्दरम् ।
तार्क्ष्याश्वे च कटीतटे कृतकरद्वन्द्वं त्रिनेत्रस्थितं
सिंहाद्रौ शीघ्रपातक्षितिपिहितपत(दः)पातु मां नारसिंहः ॥

No. **14619.** श्यामलादण्डकः.
ŚYĀMALĀDAṆḌAKAḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 99*a* of the MS. described under No. 1654.

Incomplete.

Same work as that described under No. 10337 ante, but wants the first stanza in the beginning.

No. **14620.** नानार्थनिघण्टुः.
NĀNĀRTHANIGHAṆṬUḤ.

Pages, 4. Lines, 6 on a page.

Begins on fol. 100*a* of the MS. described under No. 1654.

Wants the beginning and the end.

Similar to the work described under No. 1716 ante.

Beginning :

गुरुस्तु गीष्पतौ श्रेष्ठे गुरौ पितरि दुर्भरे ।
स्निग्धन्तु मसृणं सान्द्रे . . . . . ॥
छायावृक्षो नमेरुस्स्यात् कटकं वलयोऽस्त्रियाम् ।
कक्ष्यान्तरं प्रकोष्ठं स्यात्प्रकोष्ठः कूर्पराद्धः ॥

End :

दुकूलं सूक्ष्मवस्त्रे स्यादुत्तरीये सितांशुके ।
विमानोऽस्त्री देवयाने सप्तभूमौ च सद्मनि ।

No. **14621.** हंससन्देशः, सव्याख्यः.
HAMSASANDEŚAḤ WITH COMMENTARY.

Pages, 2. Lines, 6 on a page.

Begins on fol. 15*a* of the MS. described under No. 1660.

Contains the first stanza incomplete.

Same commentary as that described under No. 11914 ante, but with slight difference in the beginning.

श्रीमान्वेङ्कटनाथार्यः (. . .) सदा हृदि ।
वंशे जातस्सवितुरनघे (. . .) आविभातं विषेहे ॥
वाधूलश्रीनिवासार्यात्प्राप्तवेदान्तसम्पदम् ।
लक्ष्मणार्यदयापात्रं श्रीनिवासगुरुं भजे ॥
अथास्य सन्देशे रामो माल्यवत्पर्वते ॥

Fol. 14*b* contains one Dōhadaviṣayakaślōka and two witty stanzas

---

No. **14622.** वरदराजगद्यम्.
VARADARĀJAGADYAM.

Pages, 4. Lines, 6 on a page.

Begins on fol. 16*a* of the MS. described under No. 1660.

Complete.

A eulogy in prose addressed to God Varadarāja, worshipped at Conjeeveram.

Beginning:

देवा अपि च वै नित्यं स्वास्पदक्षयभीरवः ।
आशंसन्ते रङ्गधाम्नि मुक्तिक्षेत्रे मनुष्यताम् ॥

जय जय सकलभुवनवलयनिलय जलजभवनसवनप्रवरतुरगसवनपवन-
सखमुखहुतहविरलुप(वपा)परिमलपरिमिलद्वरकिसलगतितहसितपरिणताहिमक-
ररुचिरनिवसदलिकलभललितमृगमदतिलक !

End:

पुण्यकोटीविमानान्तरविराजमानगजराजवरद वरदराज विजयी भव नमस्ते नमस्ते ॥

Fol. 17*b* contains a portion of Śabdamañjarī.

No. **14623.** दृष्टान्तसिद्धाञ्जनव्याख्या—शरद्.
DṚṢṬĀNTASIDDHĀÑJANAVYĀKHYA : ŚARAD.

Pages, 24. Lines, 6 on a page.

Begins on fol. 11*a* of the MS. described **under No. 1737.**

Breaks off in the second Kāṇḍa.

Same work as that described under No. 1605 ante.

No. 14624. नामलिङ्गानुशासनम्.

NĀMALIṄGĀNUŚĀSANAM.

Pages, 3. Lines, 6 on a page.

Begins on fol. 20*b* of the MS. described under No. 1789.

Wants the beginning and the end in the Svargavarga.

Same work as that described under No. 1620 ante.

No. 14625. शिशुपालवधः.

ŚIŚUPĀLAVADHAḤ.

Pages, 9. Lines, 5 on a page.

Begins on fol. 24*a* of the MS. described under No. 1557.

Contains 50 stanzas in the sixth Sarga.

Same work as that described under No. 11719 ante.

No. 14626. शिशुपालवधपदनिर्वचनम्.

ŚIŚUPĀLAVADHAPADANIRVACANAM.

Pages, 23. Lines, 5 on a page.

Begins on fol. 31*a* of the MS. described under No. 1557.

Contains only 47 stanzas in the sixth Sarga.

The derivation of words occurring in the Śiśupālavadha, which work has been described under No. 11719 ante.

Beginning :

मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्येम(र्त्स्न्येष्व)थो अथ ।
यदा तदासं (तदा तदानीं)युगपदेकदा सर्वदा सदा ॥
अद्रिगोत्रगिरिग्रावाचलशैलशिलोच्चयाः ।

End :

प्रत्याख्यानं निरसनं प्रत्यादेशो निराकृतिः ।
सर्जकासनबन्धूकपुष्पप्रियकजीवकाः ॥ द्विहीनम् ।
वृथा निरर्थके वन्ध्ये नानानेकविधार्थयोः ।
अर्थोऽभिधेयो रैवस्तुप्रयोजननिवृत्तिषु ॥ भावे तत्र ।

No 14627. शिवस्तुतिः, सव्याख्या.

ŚIVASTUTIḤ WITH COMMENTARY.

Pages, 3. Lines, 8 on a page.

Begins on fol. 11*a* of the MS. described under No. 1560.

Incomplete.

A eulogy addressed to God Śiva (Ēkāmranātha) worshipped at Conjeeveram. The work is followed by a commentary, the author of which is not given.

Beginning:

कान्ताश्लिष्टवपुः कलाधरकलाराजत्किरीटद्वि(द्यु)तिः
केयूरीकृतकुण्डली कमलिनीरात्रीशशुक्रेक्षणः ।
कामाक्षीकुचकञ्चुकान्वितकरः कामं सदा वश्शिवः
कल्याणानि करोतु कामजनकस्यालः कृपासागरः ॥

अस्यार्थः—कान्तया पार्वत्या आश्लिष्टम् आलिङ्गितं वपुः यस्य सः कान्ताश्लिष्टवपुः पार्वत्यालिङ्गितशरीरवानित्यर्थः ।

End:

एतादृशगुणविशिष्टः शिवः वः युष्माकम्, काममत्यन्तम्, कल्याणानि सकलसौभाग्यादीनि करोतु इत्याशीर्वादः ॥

No. **14628.** लिङ्गनिर्णयः.
LIṄGANIRṆAYAḤ.

Substance, palm-leaf. Size, $13\frac{7}{8} \times 1\frac{1}{4}$ inches. Pages, 4. Lines, 5 on a page. Character, Kanarese. Condition, slightly injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Vṛttisiddharūpasaṅgrha 3*a*.

Wants the beginning; otherwise complete.

Similar to the work described under No. 1503 ante.

Beginning:

इत्युदीरितानि असिसुनन्तानि द्व्यक्षराणि नकारान्त(न्तानि च)नपुंसकानि, अम्भोरहोमहोनभो(मो) नभः पाथोऽयः पयो यशोऽर्ण ओक उषः प्रत्युषः छन्दो मेदो यादस्सदस्स्रोतो रेतश्चेतो वासो वयो वर्चः,

* * * *

तपश्शोफश्श्रेयोभूयांस्यसन्तानि .

End:

बहुव्रीहिसमासान्ताश्चेदकारान्ता भवन्ति । यथा—दीर्घसक्थः, पुण्डरीकाक्षः, पद्मनाभः . . . . . .

Colophon:

लिङ्गनिर्णयस्समाप्तः ॥

No. 14629. वृत्तिसिद्धरूपसङ्ग्रहः.
VṚTTISIDDHARŪPASAṄGRAHAḤ.

Pages, 14. Lines, 5 on a page.

Begins on fol. 3*a* of the MS. described under the previous number. Incomplete.

Same work as that described under No. 1557 ante.

Contains Samāsacakra and Tiṅantarūpa.

No. 14630. प्रत्यङ्गिरामहालक्ष्मीमन्त्रः.
PRATYAṄGIRĀMAHĀLAKṢMĪMANTRAḤ.

Pages, 12. Lines, 8 on a page.

Begins on fol. 5 and 7*a* of the MS. described under No. 21.

Contains two copies, the first of which wants the beginning and the end and the second the beginning.

Similar to the work described under No. 6652 ante.

Beginning :

शरीरशोधनार्थाय प्राजापत्यव्रतं चरेत् ।

कुशोदकेन पञ्चगव्येन वा चरुहविष्याशी दिनत्रयमष्टोत्तरजपं जपेत् । कृतपु[न]रश्चरणो भवति ।

भूशुद्धिं भूतशुद्धिं वा गुरुवन्दनतः परम् ।
मातृकान्याससन्ध्या तदा(या अ)नुष्ठानं यथाविधि ॥

सङ्कल्प्य, प्रथमवर्गप्रथमऋचस्याङ्गिरसः कृत्यानुष्टुप्, द्वितीयस्यागस्त्यकृत्यानुष्टुप्, तृतीयस्य वामदेवः कृत्यानुष्टुप्, चतुर्थस्य वृद्धवसिष्ठः कालाग्निरुद्रोऽनुष्टुप्, पञ्चमस्य यातुधानो दूर्वासभगवा(न)नुष्टुप् ।

* * *

अस्य श्रीप्रत्यङ्गिरासूक्तसमस्तमहामन्त्राणां प्रत्यङ्गिरा ऋषयः, गायत्र्युष्णिगनुष्टुप्बृहतीपङ्क्तित्रिष्टुभः उग्रकृत्या देवता, कालाग्निरुद्रश्श्रीमहादेवो देवता इति पर्यायः ।

End :

ओन्नमः प्रत्यङ्गिरे देवि मम सकलमनोर[थो]थान् सधय साधय, मदपकारिणः सर्वान्नाशय नाशय, मम शत्रून् स्तम्भय स्तम्भय प्रसीद प्रसीद ध्यं नमः ॥

No. 14631. प्रत्यङ्गिरासूक्तमहामन्त्रः, न्याससहितः.
PRATYAṄGIRĀSŪKTAMAHĀMANTRAḤ WITH NYĀSA.

Pages, 3. Lines, 8 on a page.

Begins on fol. 10b of the MS. described under No. 21.

Complete.

Similar to the work described under No. 6656 ante.

Beginning:

अस्य श्रीप्रत्यङ्गिरासूक्तसमस्तमहामन्त्राणामाङ्गिरसप्रत्याङ्गिरा ऋषयः, द्वात्रिंशदृचा(म)नुष्टुप् छन्दः, यदेत्यृचां पङ्क्तिः छन्दः, अव ब्रह्मेत्यादिषण्णामृचां कश्यप ऋषिः, आपरब्रह्मेत्येकपदा गायत्री, यो न इति त्रिष्टुप्, शिष्टानुष्टुप्, प्रतिहर्ता कृत्या देवी देवता, कालाग्निरुद्रश्श्रीमहादेवो देवता, कमिति बीजम्, अमलेति शक्तिः, उदिति कीलकम्, मम ये ये प्रतिकूलकारिणः शत्रूणां तत्तद्वाङ्मनःकायिकचेष्टाव्यवहृतिविनाशार्थे प्रत्यङ्गिरासूक्तमन्त्रा(णां) जपे विनियोगः ।

End:

स नः पर्षत(द)ति दुर्गाणि विशा(श्वा)क्षामदूदेवो अतिदुरितात्यग्निः ॥

No. 14632. प्रत्यङ्गिरासूक्तम्.
PRATYAṄGIRĀSŪKTAM.

Pages, 6. Lines, 8 on a page.

Begins on fol. 11b of the MS. described under No. 21.

Complete.

Same work as that described under No. 6664 ante, wherein see for the beginning.

End:

एवं ध्यात्वा जपेद्देवीं कृत्यारोगादिशान्तये ।
आवाहितो भव, मानसपञ्चोपचारपूजां कुर्यात् ॥

No. 14633. पाशुपतास्त्रमन्त्रन्यासप्रयोगः.
PĀŚUPATĀSTRAMANTRANYĀSAPRAYŌGAḤ.

Pages, 3. Lines, 8 on a page.

Begins on fol. 19a of the MS. described under No. 21.

Complete.

On the details of the procedure connected with the repetition of the Pāśupatāstramantra which is said to be efficacious in overpowering one's enemies in various ways and in the accomplishment of the four Puruṣārthas—Dharma, Artha, Kāma, and Mōkṣa.

Beginning:

अस्य श्रीशिवपाशुपतास्त्रमन्त्रस्य वामदेव ऋषिः, पङ्क्तिश्छन्दः, पशुपतिरुद्रो देवता, श्लीं बीजं, हुं फट् इति शक्तिः, प्रणवः कीलकं, मम भूमानन्दशाश्वतनिग्रहानुग्रहवश्याकर्षणस्तम्भनविद्वेषणप्रतिवादिशत्रोः(त्रु)मारणोच्चाटनषट्प्रयोगसिद्ध्यर्थं राजवश्यसर्वजनवश्यादिधनकनकवस्तुवाहनपुत्रपौत्राभिवृद्ध्यर्थमायुष्याभिवृद्ध्यर्थं धर्मार्थकाममोक्षचतुर्विधपुरुषार्थफलसिद्ध्यर्थं श्रीभवानीशङ्करप्रत्यक्षप्रसन्नाभीष्टसिद्ध्यर्थं मम सालोक्यसामीप्यसारूप्यसायुज्यशिवसाम्राज्यमोक्षार्थे जपे विनियोगः ।

* * * *

मनुः—ओं श्लीं पशुपतये हुं फट् स्वाहा इत्येकादशाक्षरमन्त्रं सहस्रावृत्ति जपेत्, पुरश्चर्याप्रकारः ।

End:

भूमिशयनपटकम्बलचित्रकम्बलव्याघ्रचर्मदर्भासने स्थित्वा जपेत्, मन्त्रौषधप्रयोगरसयोगकलङ्कयोगसिद्धिः समस्तरोगहरमन्त्रसिद्धिः ॥

No. **14634.** महात्रिपुरसुन्दरीब्रह्मविद्यामन्त्रः.

MAHĀTRIPURASUNDARĪBRAHMAVIDYĀMANTRAḤ

Pages, 2. Lines, 8 on a page.

Begins on fol. 36*a* of the MS. described under No. 21.

Complete.

Similar to the work described under No. 6890 ante.

Beginning:

अस्य श्रीमहात्रिपुरसुन्दरीब्रह्मविद्यायाः दक्षिणामूर्तिः ऋषिः (शिरसि), पङ्क्तिश्छन्दः (मुखे), विद्या परमेश्वरी महात्रिपुरसुन्दरी देवता (हृदये), ऐं बीजम् (गुह्ये), क्लीं शक्तिः (जान्वोः), सौः कीलकम् (पादयोः), मम श्रीविद्यापरमेश्वरीमहात्रिपुरसुन्दरीप्रसादसिद्ध्यर्थे जपे विनियोगः ।

End:

पञ्चपूजा । मनुः—कएईलह्रीं हसकहलह्रीं सकलह्रीं । पुनः हृदयादिन्यासं कुर्यात् ॥

अपराधसहस्राणि क्रियन्तेऽहर्निशं मया ।
दासोऽहमिति मां मत्वा क्षमस्व परमेश्वरि ॥

No. 14635. रसशुद्धिः, आन्ध्रटीकासहिता.
RASAŚUDDHIḤ WITH TELUGU MEANING.

Pages, 2. Lines, 8 on a page.

Begins on fol. 38*a* of the MS. described under No. 21.

Incomplete.

On the purification of mercury and other organic substances for medicinal purposes.

Beginning:

अथ द्रव्यस्य संशुद्धिः वक्ष्यते शास्त्रसम्मता ।
हरवीर्यं शतपलं खल्वमध्ये विनिक्षिपेत् ॥
तदर्धेन तदर्धेन तदर्धेन न(नाथ) वा पुनः ।
पारदं पलमात्रस्य हननं कुरुते भिषक् ॥
अघोरमन्त्रोपचारैः षोडशैश्च प्रपूजयेत् ।
* * * *
तद्रसं रसमध्ये तु शुद्धिं कुर्याद्भिषग्वरः ।
हरिद्राचूर्णसंयुक्तं मर्दयेद्घटिकाद्वयम् ॥

End:

स्वस्थाने क्षीरकन्दा च वीक्ष्यते दादिकाप(पु)टम् ।
तन्मध्ये पारदं दद्यात् सूतबन्धं तु विंशतिः ॥

No. 14636. भैरवमन्त्रः.
BHAIRAVAMANTRAḤ.

Pages, 2. Lines, 8 on a page.

Begins on fol. 82*a* of the MS. described under No. 21.

Wants the beginning.

Similar to the work described under No. 6846 ante.

Beginning:

महामोहनभैरवाय हुं फट् स्वाहा—आग्नेयदिशं बन्धयामि । भीष भीष हर हर विद्रुम विद्रुम ह्रीं ह्रीं ह्रीं महाभूत महासिद्धाङ्ग-भैरवाय क्षां आं फट् स्वाहा—दक्षिणादिशं बन्धयामि ।

End:

ह्रां ह्रां महाज्वालामालिने महासंहारोन्मत्तभैरवाय ह्रां ह्रां हुं फट् स्वाहा' इदम्मन्त्राभिमन्त्रणेन सकलकार्याणि(णां) सिद्धिर्भवति ।

No. 14637. गणपतियन्त्रकल्पः.
GAṆAPATIYANTRAKALPAḤ.

Pages, 7. Lines, 6 on a page.

Begins on fol. 75*a* of the MS. described under No. 5417.

Incomplete.

Similar to the work described under No. 7803 ante.

Beginning:

बीजं षट्कोणमध्यस्फुरदनलपुरोता(त्ता)रकन्दिक्षु लक्ष्मी-
मायाकन्दर्पभूमिस्तदनु रथपुटेष्वालिखेद् बीजषट्कम् ।
तत्सन्धिष्वङ्गमन्त्रान्वसुदलकमले मूलमन्त्रस्थवर्णान्
शिष्टान्पत्रेषु विद्वान्विलिखति गुणशश्चान्त्यमन्त्ये पलाशे ॥
आवीतं लिपिभिः क्रमोत्क्रमवशात्पाशाङ्कुशाभ्याममि-
क्ष्मात्रिम्बाद्वितयेन संवृतमिदं यन्त्रं गणाधीशितुः ।

End:

गं द्राविणीविघ्नकर्तृभ्यां स्वाहा तर्पयामि, लमुलयं वसुन्धराशङ्खनिधिभ्यां स्वाहा तर्पयामि. लमुलरं वसुमतीपद्मनिधिभ्यां स्वाहा तर्पयामि, लमुल

Colophon:

इति तर्पणविधिः ।

No. 14638. महागणपतिपञ्चावरणस्तोत्रम्.
MAHĀGAṆAPATIPAÑCĀVARAṆASTŌTRAM.

Pages, 6. Lines, 8 on a page.

Begins on fol. 78*a* of the MS. described under No. 5417.

Complete.

Same work as that described under R. No. 1415(*b*) of the Triennial Catalogue of MSS., Vol. II, Part B, but with slight difference in the beginning and colophon.

Beginning:

सृष्टिस्थित्यपहाराणां विश्वस्यैककारणम् ।
महागणपतिं वन्दे पञ्चावरणसंवृतम् ॥
क्रीडासक्तगणाधीशकरशीकरपूरितम् ।
ऐक्षवाम्भोनिधिं वन्दे तरप्यकुलसङ्कुलम् ॥
तस्य मध्ये दीपवरं नौमि रत्नशिलातलम् ।
सेवागतामराधीशदैत्यसिद्धसमाकुलम् ॥

End:

सान्निवेद्य परितर्प्य गणेशं मन्त्रमेतमभयं प्रजपेच्च ॥
शीलयन्ति यममा(दुपा)सनमादौ देवतान्तरमुपासितुकामाः ।
सत्त्वमेव न ददाति(सि) किमिष्टं विघ्नराज विदुषामपि मोहम् ॥

Colophon:

श्रीमत्परमहंसपरिव्राजकाचार्यश्रीशङ्कराचार्यविरचितं महागणपतिपञ्चावरणस्तोत्रं सम्पूर्णम् ॥

No. **14639.** विनायकस्तवराजः.
VINĀYAKASTAVARĀJAḤ.

Pages, 3. **Lines,** 8 on a page.

Begins on fol. 80*b* of the MS. described under No. 5417.

Complete.

A eulogy addressed to Vināyaka (son of Śiva), who is supposed to destroy all obstacles of his devotee and fulfil all his desires. The work is said to have been taken from Rudrayāmala.

Beginning:

बीजापूरगदेक्षुकार्मुकरुजाचक्राब्जपाशोत्पल-
व्रीह्यग्रस्वविषाणरत्नकलशप्रोद्यत्कराम्भोरुहः ।
ध्येयो वल्लभया सपद्मकरयाश्लिष्टोज्ज्वलद्भूषया
विश्वोत्पत्तिविपत्तिसंस्थितिकरो विघ्नो विशिष्टार्थदः ॥

नमस्ते सिद्धलक्ष्मीश गणाधिप महाप्रभो ।
विघ्नेश्वर जगन्नाथ गौरीपुत्र जगत्प्रभो ॥

जय विघ्नेश्वर विभो विनायक महेश्वर ।
लम्बोदर महाबाहो सर्वदा त्वं प्रसीद मे ॥

End:

एवं श्रीगणनाथस्य स्तवराजमनुत्तमम् ।
यः पठेच्छृणुयान्नित्यं प्रत्यूहैस्स विमुच्यते ॥

*   *   *   *

सर्वाभीष्टमवाप्नोति श्रीघ्रमेव सुदुर्लभम् ।
महागणेशसान्निध्यं प्राप्नोत्येव न संशयः ॥

Colophon:

इति श्रीरुद्रयामले विनायकस्तवराजः समाप्तः ॥

No. **14640.** विघ्नेश्वरकवचः.

VIGHNĒŚVARAKAVACAḤ.

Pages, 5. Lines, 8 on a page.

Begins on fol. 81*b* of the MS. described under No. 5417.

Complete.

Same work as that described under No. 7216 ante.

Colophon:

इति श्रीविघ्नेश्वरकवचं सम्पूर्णम् ॥

No. **14641.** पिण्डगोपालमन्त्रकल्पः.

PIṆḌAGŌPĀLAMANTRAKALPAḤ.

Pages, 5. Lines, 8 on a page.

Begins on fol. 138*a* of the MS. described under No. 5417.

Complete.

Similar to the work described under No. 7916 ante.

Beginning:

कृष्णाय पदमाभाष्य गोपालाय ततः परम् ।
गोपीजनपदस्थान्तवल्लभाय द्विरावधिः ॥
कामबीजादिराख्यातो मनुरष्टादशाक्षरः ।
नारदस्तु मुनिः प्रोक्तः गायत्री छन्द उच्यते ॥
देवता कथितः कृष्णः सर्वकामफलप्रदः ।
चतुष्करणवेधस्त्रिनेत्रसंख्याक्षरैः क्रमात् ॥
पञ्चाङ्गानि मनोः कुर्यात् मन्त्रविद्यादिसंयुतैः ।

End:

आग्नेयादिषु कोणषु रंयंयशं यथाक्रमात् ॥
श्रीश्रीमद्विमलादिहस्तकमलप्रोद्यज्झणत्कङ्कण-
भ्राजच्चामरकारितामलमरुच्चञ्चत्प्रधूतालकम् ।
वैकुण्ठे नवहेमरत्नविलसत्पद्मासने सुस्थितं
भूनीलाकमलान्वितं विभुमहो नारायणं नौम्यहम् ॥

No. **14642.** सुदर्शनमन्त्रः.

SUDARŚANAMANTRAḤ.

Page, 1. Lines, 8 on a page.

Begins on fol. 145*a* of the MS. described under No. 5417.

Incomplete.

Similar to the work described under No. 7527 ante.

Beginning and End:

अस्य सुदर्शनमहामन्त्रस्य अहिर्बुध्न्य ऋषिः अनुष्टुप् छन्दः, सुदर्शनरूपी महाविष्णुर्देवता। हुं बीजम्, फट् शक्तिः, मम संरक्षणार्थे दशदिग्बन्धने विनियोगः। नमस्सुदर्शनचक्राय सहस्राराय हुं फट् स्वाहा। चक्रमुद्रया ऐन्द्रीं दिशं चक्रेण बन्धयामि। एवंप्रकारेण दशदिग्बन्धनं कृत्वा अङ्गुलिं बध्द्वा वामभुजे गुं गुरुभ्यो(नमः), पं परमगुरुभ्यो(नमः), पं परापरगुरुभ्यो, दक्षिणे गं गणपतये इति नमस्कृत्य।

No. **14643.** मदनगोपालमन्त्रकल्पः.

MADANAGŌPĀLAMANTRAKALPAḤ.

Pages, 11. Lines, 8 on a page.

Begins on fol. 145*a* of the MS. described under No. 5417.

Almost complete.

This Mantra is in praise of Madanagōpāla, the repetition of which is said to be efficacious in enabling one to accomplish the four Puruṣārthas—Dharma, Artha, Kāma, and Mōkṣa.

Beginning:

अस्य श्रीमदनगोपालमन्त्रस्य ब्रह्मा ऋषिः (शिरसि), गायत्री छन्दः (मुखे), श्रीमदनगोपालकृष्णो देवता (हृदये), श्रीं ह्रीं क्लीं बीजं (लिङ्गे), श्रीं ह्रीं क्लीं कीलकं, श्रीं ह्रीं क्लीं शक्तिः मम चतुर्विधपुरुषार्थसिद्ध्यर्थे विनियोगः।

* * * *

कुण्डमध्ये षट्कोणवृत्तं त्रिकोणं विलिख्य तन्मध्ये हृल्लेखां विलिख्य प्रणवेनाभ्युक्ष्य तत्तत्पूर्वकं भुवनेश्वरीमावाह्य सर्वोपचारैरभ्यर्च्य।

End:

ततोऽग्निं प्रार्थयित्वा तत्रावाहितदेवतास्वात्मन्युद्वासयेत्। ततो दक्षिणां दत्वा ब्राह्मणान्भोजयेत्॥

Colophon:

इति मन्त्रदेवताप्रकाशिकायां।

No. 14644. वैश्वानरमन्त्रकल्पः.
VAIŚVĀNARAMANTRAKALPAḤ.

Pages, 3. Lines, 8 on a page.

Begins on fol. 150*a* of the MS. described under No. 5417.

Incomplete.

On the details connected with the Mantra in praise of Vaiśvānara (Agni), the repetition of which is supposed to have the effect of enabling one to accomplish one's desires.

Beginning:

अस्य वैश्वानरमन्त्रस्य भृगुः ऋषिः, गायत्री छन्दः, वैश्वानरो देवता, रमिति बीजं, स्वाहा इति शक्तिः, ब्रह्म बीजं, मायाशक्तिः, उदानो बीजं सुषुम्ना नाडी, सरस्वती शक्तिः, मम सर्वाभीष्टसिद्ध्यर्थे विनियोगः ।

End:

एवमग्निं समस्तदेवतामयं कृत्वा स्वयं विन्यस्तप्रधानमन्त्रो भूत्वा तद्देवतां हृदये समाराध्य तत्तदग्निं सपरिवारीं तां देवतां समावाह्य

* * * *

तत्र प्रोक्तद्रव्येणोक्तसंख्यया होमं कुर्यात् ॥

No. 14645. गोपालमानसपूजाप्रकारः.
GŌPĀLAMĀNASAPŪJĀPRAKĀRAḤ.

Pages, 5. Lines, 8 on a page.

Begins on fol. 151*a* of the MS. described under No. 5417.

Complete.

On the procedure for the mental worship of God Gōpāla.

Beginning:

अथ मानसपूजाप्रकारः । स्वदेहे योगपीठार्चनं कुर्यात् । तत्प्रकारः— हृद्दले ओं आधारशक्त्यै नमः । सर्वाभरणभूषितां शरच्चन्द्रनिभप्रभां पद्मकद्वयधारिणीमाधारशक्तिं तत्र यजेत् । तदुपरि ओं मूलमन्त्रप्रकृत्यै नमः । तदुपरि क्लीं कूर्माय नमः नीलाभं कूर्ममर्चयेत् ।

End:

विक्रान्त्या ध्वस्तवैरिव्रजमजितमहास्तावनभा(हा)रमाद्यैः
आपीतं नारदाद्यैः मुनिभिरनुदिनं तत्त्वनिर्णीतिहेतोः ।
सायाह्ने निर्मलाङ्गं निरुपममजितं पूजयेन्नीलभासं
मन्त्री विश्वोदर(य)स्थित्यपहरणव(क)रं मुक्तिदं वासुदेवम् ॥

Colophon:

इति श्रीगोपालकल्पःसमाप्तः ॥

No. 14646. अपराजितास्तोत्रमन्त्रः.
APARĀJITĀSTŌTRAMANTRAḤ.

Pages, 8. Lines, 7 on a page.

Begins on fol. 186*a* of the MS. described under No. 5417.

Complete.

A eulogy in the shape of Mantra, which is addressed to Goddess Aparājitā, a manifestation of Śakti.

Beginning:

अस्य श्रीअपराजितास्तोत्रमन्त्रस्य, नारद ऋषिः, नाना छन्दांसि, श्रीअपराजिता देवता, ह्रां बीजम्, श्रीं शक्तिः, ह्रीं कीलकम्, अपराजिताप्रसादसिद्ध्यर्थे जपे विनियोगः । नारद उवाच—

श्रृणुध्वं मुनयस्सर्वे सर्वकामार्थसिद्धये ।
असाध्यसाधनीं देवीं वैष्णवीमपराजिताम् ॥

* * * *

ओं नमोऽपराजितायै, ओं नमोऽस्त्वनन्ताय, सहस्रशीर्षाय जय जय अजिते अपराजिते अनिन्दिते अप्रतिहते सहस्रनेत्रे ज्वल ज्वल प्रज्वल ।

End:

ओं चले स्वाहा, ओं अचले स्वाहा, ओं अजिते स्वाहा, ओं अपराजिते स्वाहा, इति श्रीपरमवैष्णवि महाविद्येश्वरि स्वाहा ॥

Colophon:

इति श्रीअपराजितास्तोत्रं सम्पूर्णम् ॥

No. 14647. सप्तसङ्ख्यानिरूपणम्.
SAPTASAṄKHYĀNIRŪPAṆAM.

Pages, 21. Lines, 4 on a page.

Begins on fol. 1*a* of the MS. described under No. 5452.

Incomplete.

Same work as that described under No. 14082 ante.

No. 14648. षोढात्रयन्यासः.
ṢŌḌHĀTRAYANYĀSAḤ.

Pages, 30. Lines, 8 on a page.

Begins on fol. 36*b* of the MS. described under No. 5452.

Contains the Pūrvaṣōḍhānyāsa and Uttaraṣōḍhānyāsa complete and Mahāṣōḍhānyāsa almost complete.

Similar to the work described under No. 7450 ante.

Beginning:

आदौ षडङ्गन्यासः, ऐं क्लीं सौः अङ्गुष्ठाभ्यां नमः, क्लीं सौः ऐं तर्जनीभ्यां स्वाहा, सौः ऐं क्लीं मध्यमाभ्यां वषट्, ऐं क्लीं सौः अनामिकाभ्यां हुम्, क्लीं सौः ऐं कनिष्ठिकाभ्यां वौषट्, सौः ऐं क्लीं करतलकरपृष्ठाभ्यां फट् ।

* * * *

मूलमन्त्रेण व्यापकन्यासं कुर्यात् ॥

इति पूर्वषोढान्यासस्समाप्तः ॥

अस्य श्रीउत्तरषोढान्यासमन्त्रस्य परमशम्भुः ऋषिः, अतिजगती छन्दः, श्रीमहात्रिपुरसुन्दरी देवता, ऐं बीजम्, ह्रीं शक्तिः, श्रीं कीलकम्, श्रीसाम्बसदाशिवप्रीत्यर्थे विनियोगः ।

* * * *

अं क्षं शिरःप्रभृतिपादान्तमिति पीठन्यासः ।

इत्युत्तरषोढान्यासस्समाप्तः ॥

अस्य श्रीमहाषोढान्यासमन्त्रस्य आनन्दभैरव ऋषिः, अमृतविराट् छन्दः, श्रीमहापराशक्त्यम्बा देवता, ऐं बीजम्, ह्रीं शक्तिः, श्रीं कीलकम्, श्रीमहात्रिपुरसुन्दरीप्रसादसिद्ध्यर्थे विनियोगः ।

ऐं ह्रीं श्रीं हसौः ।

प्रपञ्चो भुवनं मूर्तिमन्त्रदैवतमातरः ।
महाषोढाह्वयन्यासस्सर्वन्यासोत्तमोत्तमः ॥

End:

चण्डिकाम्बायै अं लं, अनन्तकोटिशाकिनीकुलसहिताय अं अं भिषकाम्बानाथाय, अं लं संहारभैरवनाथश्रीपादुकेभ्यो नमः; ब्रह्मरन्ध्रे । ऐं ह्रीं श्रीं हसौः, अं क्षं क्षं अं हसौः, श्रीं ह्रीं ऐं समस्तमातृकाभैरवाय श्रीपराम्बादेव्यै नमः । इति व्यापकत्रयम् ।

Colophon:

इति मातृकान्यासः ॥

* * * *

इति षडङ्गं विन्यस्य, ध्यानम्—

रक्तवर्णधरां देवीं पञ्चवक्त्रधरां शिवाम् ।
नित्यादिकलसंयुक्तां प्रतिवक्त्रां त्रिलोचनाम् ॥
पाशाङ्कुशधरां देवीं त्रिधाशक्तिकपालिनीम्
पङ्कजासनसंयुक्तां मालिनीं भावयेच्छिवाम् ॥

No **14649.** आम्नायमन्त्रः.

ĀMNĀYAMANTRAḤ.

Pages, 20. Lines, 8 on a page.

Begins on fol. 52*a* of the MS. described under No. 5452.

Contains the Ūrdhvāmnāya only.

Similar to the work described under No. 5985 ante.

Beginning:

ऊर्ध्वाम्नायः—

ऐंकारासनरक्तपङ्कजलसच्छ्रीचक्रमध्यस्थिते
ईडापिङ्गलमध्यवर्तिभुवने ब्रह्माण्डखण्डस्थिते ।
इन्दुर्बाणधनुर्धरो बहुविधश्चक्रायुधां मोहिनीं
तारापूर्णमुखीं भजेत्सुखकरीमन्तर्महामातृकाम् ॥

मूलाधारे चतुर्दलपद्मकर्णिकायाम्—

वशषसदलयुक्ते सम्यगाधारपद्मे
तरुणमरुणवर्णा(र्णं) वारणास्यं त्रिणेत्रम् ।
अभयवरदहस्तं चारुपाशाङ्कुशाढ्यं
करयुगलमनन्यं चिन्तयेद्विघ्नराजम् ॥

End:

ओं ऐं ह्रीं श्रीं हसप्रें हसौः श्रीपरमात्मेश्वरानन्दनाथश्रीपरमात्मेश्वर्यम्बाश्रीपादुकां पूजयामि नमः, इत्यङ्गुलिषडङ्गन्यासं कुर्यात्, लोकत्रयेण दिग्बन्धः, सहस्रसूर्यसङ्काशमिति ध्यानम् ॥

Colophon:

इति षट्शाम्भवदीक्षान्यासस्समाप्तः ॥

No. **14650.** श्रीचक्रयन्त्रविद्या.

ŚRĪCAKRAYANTRAVIDYĀ.

Pages, 23. Lines, 8 on a page.

Begins on fol. 61*b* of the MS. described under No. 5452.

Incomplete.

Similar to the work described under No. 5731 ante.

Beginning:

श्रीचक्रक्रमः, अथ यन्त्रक्रमः । ऐं क्लीं सौः ।
चिद्रूपाममलामम्बां त्रिपुराख्यां सदाशिवाम् ।
हृदि ध्यात्वा प्रवक्ष्यामि यत्तत्सिध्यतु मे वचः ॥

पार्वत्युवाच—

विश्वेश्वर विरूपाक्ष विश्वरूप सदाशिव ।
त्वया विद्यान्य(अ)नेकानि(श्च) गुह्याद्गुह्यतराणि(श्च) च(वै) ॥
उक्तवानादरात्सै(च्चै)व शाबरानथ वैदिकान् ।
इतः परं यन्त्रविद्यां वद मे करुणाकर ॥

ईश्वर उवाच—

साधु साधु महादेवि सर्वमन्त्रविशारदे ।
अत्यन्तगोपनीया हि यन्त्रविद्यात्र भूतले ॥
तासामपि च सङ्गोप्यं श्रीविद्यागममीश्वरि ।
मुनिभिस्सिद्धगन्धर्वैः ब्रह्मविष्ण्वादिभिस्सुरैः ॥

* * * *

श्रीविद्यायन्त्रमीशानि वृद्धो वा यदि बालकः ।
यो जानाति स विप्रेन्द्रं सोपद्रष्टा भवेद्ध्रुवम् ॥

य एतद्यन्त्रराजञ्च बीजयुक्तं कुलेश्वरि ।
यो जानाति स विप्रेन्द्रः स रुद्रो नात्र संशयः ॥

End:

येन विज्ञानमात्रेण अणिमाद्यष्टसिद्धिद(क)म् ।
प्राप्यते देवदेवेशि सत्यं सत्यं वदाम्यहम् ॥
एतानि यन्त्रभेदानि सत्यमुक्तं मया शिवे ।

Foll. 72*b*—75*b* contain Yōgīśvaravacanapramāṇa and Gurupūjā

No. **14651.** यन्त्रोद्धारलक्षणम्.

YANTRŌDDHĀRALAKṢAṆAM.

Pages, 3. **Lines,** 8 on a page.

Begins on fol. 76*a* of the MS. described under No. 5452.

Complete.

Similar to the work described under No. 5731 ante.

Beginning:

बिन्दुत्रिकोणवलयं दलान्यष्टसमन्वितम् ।
ततो वृत्तं प्रकुर्वीत तत्षोडशकन्दलम् ॥
परतो वृत्तमेकञ्च तन्मध्ये चाष्टभैरवम् ।
चतुरश्रं चतुर्द्वारं चतुर्दिक्षु मनुं लिखेत् ॥

End:

सर्वदुष्टस्तम्भिनि स्वाहा ॥
असिताङ्गो रुरुश्चण्डः क्रोधश्चोन्मत्तभैरवः ।
कपाली भीषणश्चैव संहारश्चाष्ट भैरवाः ॥

Colophon:

इति यन्त्रोद्धारलक्षणम् ॥

No. **14652.** बालात्रिपुरसुन्दरीनामस्तोत्रम्.

BĀLĀTRIPURASUNDARĪNĀMASTŌTRAM.

Pages, 2. Lines, 8 on a page.

Begins on fol. 101*a* of the MS. described under No. 5452.

Contains 108 significant names in 15 stanzas.

Same work as that described under No. 9156 ante.

Colophon:

इति श्रीमत्रिपुरसुन्दरीनाम्नां [श्रीमत्रिपुरसुन्दरी]स्तोत्रं संपूर्णम् ॥

No. **14653.** वशीकरणवाराहीमन्त्रः.

VAŚĪKARAṆAVĀRĀHĪMANTRAḤ.

Pages, 2. Lines, 8 on a page.

Begins on fol. 102*a* of the MS. described under No. 5452.

Complete.

Same work as that described under No. 7192 ante.

Colophon:

इति वश्यवाराहीस्तोत्रं संपूर्णम् ॥

Fol. 103*a* contains a few lines of Dēvīmantra.

No. **14654.** शब्दमञ्जरी.

ŚABDAMAÑJARĪ.

Pages, 5. Lines, 8 on a page.

Begins on fol. 146*a* of the MS. described under No. 5452.

Incomplete.

Same work as that described under No. 1554 ante.

No. **14655.** यन्त्रपूजाक्रमः.

YANTRAPŪJĀKRAMAḤ.

Pages, 4. Lines, 8 on a page.

Begins on fol. 149*a* of the MS. described under No. 5452.

Complete.

On the procedure to be adopted for consecrating the **Yantras** representing Goddess Śakti and for worshipping it.

Beginning:

पूर्वप्रस्तारयन्त्रपूजाक्रमः ।

बिन्दुत्रिकोणषट्कोणं वृत्तं चतुरश्रं विलिख्य तस्मिन्नाधारं प्रतिष्ठाप्य आधारोपरि पात्रं प्रतिष्ठाप्य तस्मिन् पात्रे दिव्यामृतं परिपूर्य तस्मिन्नमृत-मध्ये पञ्चरत्नबीजानि संपूज्य तत्कथम्, ग्लूं नमः गोमेधिकरत्नैश्वर्यै नमः, हुं ब्रह्मणे लोकके(कृते) गोमेधिकरत्नगर्भभोगगामिने चतुष्षड्लक्षकोटियोगिनि श्रीपादुकां पूजयामि ।

End:

श्रीं ५ प्रें ९ श्रीं ५ प्रें मन्त्रविग्रहानन्दनाथमन्त्रविग्रहापराम्बा श्रीं ९ श्रीं प्रें मूलेन शतवारं संपूज्य धूपदीपनैवेद्यताम्बूलादिकं दत्वा भैरवबलिं दत्वा शक्तिवरान् सन्तोष्य शान्तिस्तवं पठेत् ॥

Colophon:

श्रीपूजा समाप्ता ॥

No. **14656.** नवचक्रप्रकारः.

NAVACAKRAPRAKĀRAḤ.

Page, 1. Lines, 8 on a page.

Begins on fol. 159*b* of the MS. described under No. 5452.

Incomplete.

Similar to the work described under No. 5732 ante.

Beginning and the **End:**

भैरवयामले चन्द्रज्ञानविद्यायां शिव आह पार्वतीं प्रति—

चतुर्भिश्शिवचक्रैश्च शक्तिचक्रैश्च पञ्चभिः ।

नवचक्रैश्च संसिद्धं श्रीचक्रं शिवयोर्वपुः ॥

त्रिकोणमष्टकोणञ्च दशकोणद्वयं तथा ।
चतुर्दशारं चैतानि शक्तिचक्राणि पञ्च च ॥
बिन्दुश्चाष्टदलं पद्मं पद्मं षोडशपत्रकम् ।
चतुरश्रञ्च चत्वारि शिवचक्राण्यनुक्रमात् ॥
त्रिकोणे बैन्दवं श्लिष्टमष्टारेऽष्टदलाम्बुजम् ।
दशारयोष्षोडशारं भूगृहं भुवनाश्रके ॥
शिवानामपि शक्तीनां चक्राणाञ्च परस्परम् ।
अविनाभावसम्बन्धं यो जानाति स चक्रवित् ॥
त्रिकोणमष्टकोणञ्च दशकोणद्वयं तथा ।
मनुकोणं चतुष्कोणं कोणचक्राणि षट् क्रमात् ॥

Fol. 160*a* contains the Lakṣmīnārāyaṇayōga and fol. 161*a* Dēvīpūjāyantra.

No. 14657. आपस्तम्बपूर्वप्रयोगः.
ĀPASTAMBAPŪRVAPRAYŌGAḤ.

Pages, 18. Lines, 8 on a page.

Begins on fol. 165*a* of the MS. described under No. 5452.

Incomplete.

Similar to the work described under No. 3549 ante.

Beginning :

सर्वेभ्यो महाजनेभ्यो नमः । नमः (. . .) पृथिव्यै । एवंगुणविशेषणविशिष्टायां शुभतिथौ अस्य कुमारस्य विवाहाख्यं कर्म[णि]करिष्यमाणः, गौदानिकसमावर्तनीयाख्ये कर्मणी करिष्यमाणः तदङ्गत्वेन नान्द्याभ्युदयिकं ग्रहशान्तिं च करिष्यमाणः, तदादौ शुद्ध्यर्थं वृद्ध्यर्थमभ्युदयार्थं च महाजनैस्सह स्वस्तिपुण्याहवाचनं करिष्ये ।

End :

जरदष्टिर्यथासदिति प्रच्छिद्य प्रागग्रान् कुशान् शमीपर्णैः स(ह)मात्रे प्रयच्छति, सा तानानडुहगोमये निदधाति । ओषधे त्रायस्व मां स्वदिते मा मा हिंसीः ।

Fol. 174 contains Jainapūja and Nandinīdhēnumahāmantra.

No. 14658. धन्वन्तरिमन्त्रः.
DHANVANTARIMANTRAḤ.

Page, 1. Lines, 8 on a page.

Begins on fol. 175*a* of the MS. described under No. 5452.

Complete.

Similar to the work described under No. 6440 ante.

Beginning:

अस्य श्रीधन्वन्तरिमन्त्रमहाराजस्य ब्रह्मा ऋषिः, सर्वौषधि (धयः) छन्दांसि, श्रीधन्वन्तरिर्देवता, माया बीजम्, लक्ष्मीश्शक्तिः, वाग्भवं कीलकम्, श्रीधन्वन्तरिप्रसादसिद्ध्यर्थे जपे विनियोगः ।

*　　*　　*　　*

मूलमन्त्रः—ओं ह्रीं श्रीं ऐं धन्वन्तराय(रये) नमः, ऐं श्रीं ह्रीं ओं ।

End:

राजतासन आसीनं सर्वैर्द्रव्यैरुपासितम् ।
धन्वन्तरीति विख्यातं चिन्तयेत्सुसमाहितम् ॥
नमामि धन्वन्तरिमादिदेवं सुरासुरैर्वन्दितपादपद्मम् ।

No. 14659. त्रैलोक्यमोहिनीमहामन्त्रः.
TRAILŌKYAMŌHINĪMAHĀMANTRAḤ.

Page, 1. Lines, 8 on a page.

Begins on fol. 175*b* of the MS. described under No. 5452.

Complete.

Similar to the work described under No. 7459 ante.

Beginning:

अस्य श्रीत्रैलोक्यमोहिनीमहामन्त्रराजस्य जगन्मोहन ऋषिः, सर्वप्रपञ्चः छन्दांसि, त्रिगुणसम्मोहिनी देवता, ओं ऐं बीजम्, ऐं क्लीं शक्तिः, ओं सर्वसंक्षोभिणि क्लीं कीलकम्, सर्वजगन्मोहिनीप्रीत्यर्थे जपे विनियोगः ।

End:

मन्त्रः—ओं ऐं क्लीं, पुर(:) क्षोभय भगवति गंभिर्णे क्लां स्वाहा, सर्ववश्याय विद्महे । लोकत्रयाय धीमहि । तन्नो मोहः प्रचोदयात् ॥

No. 14660. त्रिपुरामुद्रालक्षणम्.
TRIPURĀMUDRĀLAKṢAṆAM.

Pages, 3. Lines, 8 on a page.

Begins on fol. 176*a* of the MS. described under No. 5452.

Complete.

Similar to the work described under No. 5796 ante.

Beginning:

श्रीदेव्युवाच—

भगवन् त्रिपुरामुद्रास्सूचिता न प्रकाशिताः ।
कथं विरचनं तासां क्रियते वद शङ्कर ॥
शृणु देवि प्रवक्ष्यामि मुद्रास्सर्वार्थसिद्धिदाः ।
याभिर्विरचिताभिस्तु त्रिपुरा सुमुखी भवेत् ॥
परिवर्त्य करौ स्पष्टौ अङ्गुष्ठौ कारयेत्समौ ।
अनामान्तर्गतं कृत्वा तर्जन्यकुटिलाकृतिः ॥
कनिष्ठिके नियुञ्जीत जीवस्थाने महेश्वरि ।
त्रिखण्डेयं महामुद्रा त्रिपुराह्वानकर्मणि ॥

End:

एषा मुद्रा महेशानि त्रिपुराया मयोदिता ।
पूजाकाले प्रयोक्तव्या यथानुक्रमयोगतः ॥
संक्षोभद्रावणाकर्षवश्योन्मादमहाङ्कुशा ।
खेचरीबीजयोन्याख्या नव मुद्राः प्रकीर्तिताः ॥

No. **14661.** षोडशोल्लासविधिः.
ṢŌḌAŚŌLLĀSAVIDHIḤ.

Pages, 3. Lines, 8 on a page.

Begins on fol. 177*b* of the MS. described under No 5452.

Contains 16 stanzas only.

On the worship of Goddess Śakti in accordance with the Kaula sect of Śāktas. Each stanza indicates a form of Upacāra, i.e., service in the worship of the goddess

Beginning:

षोडशोल्लासविधिः ।
श्रीमत्तत्त्वश्रं—सौख्याय तत्त्वं नमः ।
सर्वाम्नाय—द्वितीयं नमः ।
मध्य—तृतीयं नमः ।

आविर्भूतसकौलकुण्डलसुधा ब्रह्मादिरुद्रार्चितं
नालज्जा प्रथमो हुताय कुसुमं दिव्याय कूटं परम् ।

मच्छस्सागरमुत्तमोत्तमरसं पात्रं च सर्वेश्वरि
वन्देऽहं सकलागमाधिकतरं पात्रं चतुर्थं शुभम् ॥

End :

निर्मलं शुद्धसलिलं प्रज्वलप्रज्वलात्मकम् ।
प्र(प्रौ)ढोल्लासप्रभावेन सर्वोल्लासन्तु पूर्णिमा ॥
देहस्था किल देवता गजमुखाः पात्राधिपा भैरव(।)
योगिन्यो वटुयक्षरक्षपितरो भूताः पिशाचग्रहाः ।
अन्ये खेचरभूचरादिषु चराः वेतावलिश्रेटिका
तृप्यन्तः कुलदैवताश्च पिबतां पात्रं सदीपं चरुम् ॥ १६ ॥

No. **14662.** चतुष्षष्टियोगिनीपूजा.
CATUṢṢAṢṬIYŌGINĪPŪJĀ.

Pages, 7. *Lines*, 8 *on a page.*

Begins on fol. 179*a* of the MS. described under No. 5452.

Complete.

Deals with the worship of 64 Yōginīs, eight in each of the eight quarters or directions.

Beginning :

अष्टदिक्षु क्रमेण चतुष्षष्टियोगिनीः पूजयेत् । पूर्वे ध्यानम्, श्वेतवर्णस्त्रिशूलडमरुपाशाङ्कुशधराः जयायै नमः, गणेश्वर्यै नमः, विजयायै, शुद्धयोगिन्यै, जयन्त्यै, महामायायै, अपराजितायै, दिव्ययोगिन्यै । आग्नेय्यां ध्यानम्, गौरवर्णाः अक्षमालाङ्कुशसुवर्णपुस्तककराः प्रेतायै नमः, डाकिन्यै, शाख्यै, कालरात्र्यै, हुंकार्यै, रौद्र्यै, वैताल्यै, झुंकार्यै ।

End :

ईशान्ये ध्यानम्, धूम्रवर्णः कुन्तखेटकपरिघभिण्डिवालधराः मुण्डाग्रधारिण्यै नमः, व्याघ्र्यै नमः, काङ्क्षिण्यै न(मः), प्रेतभूषिण्यै न(मः), धूर्जटिन्यै नमः, कौमार्यै नमः, कालिकायै नमः, विश्वलम्भिन्यै नमः ॥

No. **14663.** चतुष्षष्टिभैरवपूजा, कलशपूजासहिता.
CATUṢṢAṢṬIBHAIRAVAPŪJĀ WITH KALAŚAPŪJĀ.

Pages, 6. *Lines*, 8 *on a page.*

Begins on fol. 180*b* of the MS. described under No. 5452.

Complete.

On the details connected with the worship of the 64 Bhairavas or forms of Śiva together with the 64 Yōginīs.

Beginning:

अथ चतुष्षष्टियोगिनीभिस्सह चतुष्षष्टिभैरवान् पूजयेत् । पूर्वे शम्भवे नमः, नीलकण्ठाय, वि(शा)लाक्षाय, मार्ताण्डाय, मनुप्रभाय, स्वच्छन्दाय, असिताय, तुष्टाय.

*　　*　　*　　*

ईशान्यां सर्वभूतहृदिस्थाय नमः, घोरसायकाय भयङ्कराय, भुक्तिमुक्तिफलप्रदाय, कालाग्नये, महारौद्राय, भीषणाय, दक्षिणाभिमुखस्थिताय ।

Colophon:

इति चतुष्षष्टिभैरवपूजा ।

अष्टाष्टगुणिताश्चैव भैरवाणां महागणाः ।
स्वर्गपातालमर्त्येषु विचरन्ति महाबलाः ॥
यथा ध्यानं योगिनीनां भैरवाणां तथा भवेत् ।

End:

कलशस्य मुखे विष्णवे नमः, कण्ठे रुद्राय, मूले ब्रह्मणे,

*　　*　　*　　*

चण्डिकायै, पद्मायै, लक्ष्म्यै, हरिप्रियायै, सर्वसिद्धिप्रदायै ॥

No. 14664. त्रिपुरसुन्दरीस्तवराजः.
TRIPURASUNDARĪSTAVARĀJAḤ.

Pages, 26. Lines, 7 on a page.

Begins on fol. 45a of the MS. described under No. 5585.

Complete.

Same work as that described under No. 10751 ante; but the additional stanzas and the portion containing the Ṛṣicchandōdēvatā, etc., are given below.

This is also called Pañcamīstavarāja.

अस्य श्रीपञ्चमीस्तवराजमहामन्त्रस्य दक्षिणामूर्तिः ऋषिः, अनुष्टुप् छन्दः, श्रीमन्मालिनी त्रिपुरसुन्दरी देवता, श्रीं बीजम्, ह्रीं शक्तिः, क्लीं कीलकम्, मम सकलपुरुषार्थसिद्ध्यर्थे जपे विनियोगः ।

*　　*　　*　　*

हेतवे जगतामेव संसारार्णवसेतवे ।
प्रभवे सर्वविद्यानां शम्भवे गुरवे नमः ॥
नमामि सद्गुरुं शान्तं प्रत्यक्षं शिवरूपिणम् ।
शिरसा योगपीठस्थं मुक्तिकामार्थसिद्धये ॥

Colophon:

इति श्रीरुद्रयामले तन्त्रे बहुरूपाष्टकप्रस्तारे श्रीमहात्रिपुरसुन्दरीस्तवराजस्तोत्रं सम्पूर्णम् ॥

No. **14665.** नाथपारायणमन्त्रः.
NĀTHAPĀRĀYAṆAMANTRAḤ.

Pages, 4. Lines, 7 on a page.

Begins on fol. 58*a* of the MS. described under No. 5585.

Complete.

On details connected with the repetition of the Mantra relating to Śākta Gurus.

Beginning:

अस्य श्रीनाथपारायणमहामन्त्रस्य सदाशिव ऋषिः, त्रिष्टुप् छन्दः, श्रीमहात्रिपुरसुन्दरी देवता, ह्रीं बीजम्, श्रीं शक्तिः, क्लीं कीलकम्, श्री-म-री-गः ।

* * * *

मूलम्—युगमासदिनम् आं ईं हं सः अं श्रं ह्रीं श्रीं प्रकाशानन्दरूपिणी श्रीमहात्रिपुरसुन्दरी श्रीपादुकां पूजयामि ।

End:

सुभगानन्दनाथरूपिणी श्री-यामि । मूलं षोडशवारं जपित्वा ॥

Colophon:

इति नाथपारायणमन्त्रस्समाप्तः ॥

No. **14666.** घटिकापारायणमन्त्रः.
GHAṬIKĀPĀRĀYAṆAMANTRAḤ.

Pages, 2. Lines, 7 on a page.

Begins on fol. 59*b* of the MS. described under No. 5585.

Complete.

Similar to the work described under No. 7828 ante.

Beginning:

अस्य श्रीघटिकापारायणमहामन्त्रस्य, दक्षिणामूर्तिऋषिः, अनुष्टुप् छन्दः, श्री-महा-ता, श्रीं बीजम्, क्लीं शक्तिः, ऐं कीलकम्, श्री-रा-गः ।

End:

यकारादिमकारपर्यन्तं पुनः यकारादिककारपर्यन्तं षष्टिजपः अ(त)एव तया नामानि पञ्चवर्गा भवन्तु ॥

Colophon:

घटिकापारायणं समाप्तम् ॥

No. 14667. तत्त्वपारायणमन्त्रः.

TATTVAPĀRĀYAṆAMANTRAḤ.

Pages, 3. Lines, 7 on a page.

Begins on fol. 60*a* of the MS. described under No. 5585.

Complete.

On the details of procedure connected with the repetition of the Mantras relating to the 36 Tattvas.

Beginning:

अस्य श्रीतत्त्वपारायणमहामन्त्रस्य, दक्षि-ऋषिः, पङ्क्तिच्छन्दः, श्रीमहा-ता, ऐं बीजम्, ह्रीं शक्तिः, क्लीं कीलकम्, श्रीमहा-गः ।

* * * *

मूलं युगमासदिनम्, आ सः, अं शिवतत्त्वरूपिणीं, श्री-यामि ।

End:

सं वायुतत्त्वम्, हं वह्नितत्त्वम्, लं सलिलतत्त्वम्, क्षं पृथिवीतत्त्वम् ॥ इति षट्त्रिंशत्तत्त्वम्, मूलं षोडशवारं जपित्वा ॥

Colophon:

इति तत्त्वपारायणं समाप्तम् ॥

No. 14668. कालनित्यापारायणमन्त्रः.

KĀLANITYĀPĀRĀYAṆAMANTRAḤ.

Pages, 3. Lines, 7 on a page.

Begins on fol. 61*a* of the MS. described under No. 5585.

Complete.

Slightly different from the work described under No. 7897 ante.

Beginning:

अस्य श्रीकालनित्यापारायणमहामन्त्रस्य. दक्षि-षिः, पङ्क्तिच्छन्दः, काल-नित्यारूपिणी मा-री-ता-श्रीं बीजम्, ह्रीं शक्तिः, ऐं कीलकम्, काल-नि-गः, ।

End:

युगमासदिनं आ सः. ओं युगमासदिनं आ सः अं अः, मू यु मा दि आ सः अः युगमासदिनं हसः इति षट्सप्तत्युत्तरसंख्या ॥

Colophon:

इति कालनित्या समाप्ता ॥

No. 14669. नित्यापारायणमन्त्रः.
NITYĀPĀRĀYAṆAMANTRAḤ.

Pages, 3. Lines, 7 on a page.

Begins on fol. 62*a* of the MS. described under No. 5585.

Complete.

On details connected with the repetition of the Mantra relating to the goddess Nityā, who is a manifestation of Śakti.

Beginning:

अस्य श्रीनित्यापारायणमहामन्त्रस्य. ब्रह्मा ऋषिः, त्रिष्टुप् छन्दः, श्रीमहादेवता. क्लीं बीजम्, श्रीं शक्तिः, ऐं कीलकम्, श्रीं महायोगः ।

* * * *

मूलं युगमासदिनम्, आ ई अ सः, अं कामेश्वरीनित्याश्रीमहायामि नमः ।

End:

अं चित्रानित्याश्री. शुक्लपक्षे तु कामेश्वर्यादि चित्रान्तम्, कृष्णपक्षे तु चित्रादिकामेश्वर्यन्तं मूलमन्त्रं षोडशवारं जपित्वा नित्यातर्पणम् ॥

Colophon:

नित्यापारायणं समाप्तम् ॥

No. 14670. दिनोत्थपारायणमन्त्रः.
DINŌTTHAPĀRĀYAṆAMANTRAḤ.

Pages, 9. Lines, 7 on a page.

Begins on fol. 63*a* of the MS. described under No. 5585.

Complete.
Similar to the work described under No. 7828 ante.

Beginning:

अस्य दिनोत्थपारायणमहामन्त्रस्य, शिवऋषिः, गायत्री छन्दः, श्री-महा-देवता, ऐं बीजम्, श्रीं शक्तिः, ह्रीं कीलकम्, श्रीमहा-गः ।

* * * *

मूलं दिन-हसः, आ ई हंसः, अकारादिक्षकारान्तपञ्चाशद्वर्णं संजप्य, मू—ऐं वद वद वाग्वादिनि ऐं क्लिन्ने क्लेदिनि क्लेदय महाक्षोभं कुरु कुरु ।

End:

मम सकलमनोरथान् साधय तुभ्यं नमः इति प्रार्थिनीं विद्यां कृता-ञ्जलिर्जपेत् । इति वर्गद्वयस्याप्यन्तो बोद्धव्यः । इत्थं पारायणजपं कृत्वा, इदं स्तोत्रं जपेत् । मूलमन्त्रं षोडशवारं जप्त्वा तर्पणम् ॥

Colophon:

इति दिनोत्थपारायणं समाप्तम् ॥

No. **14671.** मन्त्रपारायणमन्त्रः.
MANTRAPĀRĀYAṆAMANTRAḤ.

Pages, 35. Lines, 7 on a page.
Begins on fol. 67*a* of the MS. described under No. 5585.
Complete.
Similar to the work desciibed under No. 8004 ante.

Beginning:

अस्य श्रीमन्त्रपारायणमहामन्त्रस्य, ईश्वर ऋषिः, अनुष्टुप् छन्दः, महा-ता, खण्डत्रयेण बीजं, शक्तिः, कीलकम्, महा-योगः ।

* * * *

ओं ऐं ह्रीं श्रीं मूलं ह्रीं अं काली सौः इत्यकारादिक्षकारान्तमेक-पञ्चाशद्वर्णं जपत्वा ।

End:

क्लीं अ अं अः अं शाम्भवी ऐ क्लीं सौः आः मूलमन्त्रः ६०२०० ॥

Colophon:

इति मन्त्रपारायणं समाप्तम् ॥

सत्त्वचिद्घनब्रह्मानन्दनाथश्रीगुरुचरणारविन्दद्वयेन पूजिताय विश्वनाथेन लिखितम् ॥

No. **14672.** नित्याभगमालिनीमन्त्रः.

NITYĀBHAGAMĀLINĪMANTRAḤ.

Pages, 3. Lines, 7 on a page.

Begins on fol. 84*a* of the MS. described under No. 5585.

Complete.

Similar to the work described under No. 6497 ante.

Beginning:

नित्या अं ऐं सकलह्रीं नित्यक्लिन्ने मदद्रवे सौः, अं कामेश्वरी, नित्या आं ऐं भगभगे भगिनी भगोदरी भगमाले भगावहे, भगगुह्ये भगयोनि भगिनी पावनी सर्वभगवशङ्करी भगरूपे नित्यक्लिन्ने भगस्वरूपे ।

End:

ओं नमो भगवति ज्वालामालिनि देवदेवि सर्वभूतसंहारकारिके जातवेदसि ज्वलन्ति ज्वल ज्वल प्रज्वल प्रज्वल ह्रां ह्रीं ह्रूं र र र र र र र ज्वालामालिनि हुं फट् स्वाहा, ज्वालामालिनी नित्या अं च कौं अं चित्रा नित्या अं क ह स अः महानित्या श्री ॥

No. **14673.** द्वादशार्धाम्बामन्त्रः.

DVĀDAŚĀRDHĀMBĀMANTRAḤ.

Pages, 2. Lines, 7 on a page.

Begins on fol. 170*a* of the MS described under No. 5585.

Incomplete.

Same work as that described under No. 6436 ante.

No **14674.** दीक्षाविधिः.

DĪKṢĀVIDHIḤ.

Pages, 2. Lines, 7 on a page.

Begins on fol. 171*a* of the MS. described under No. 5585.

Incomplete.

Same work as that described under No. 5657 ante.

Fol. 172 contains Pañcāṅgaviṣaya relating to the year Durmukhi and fol. 173*a* Mantrāṅgaviṣaya.

No. **14675.** पञ्चमुखहनुमत्स्तोत्रम्.
PAÑCAMUKHAHANUMATSTŌTRAM.

Page, 1. Lines, 6 on a page.

Begins on fol. 53*a* of the MS. described under No. 5686.

Complete.

Similar to the work described under No. 6561 ante.

Beginning:

अस्य श्रीपञ्चमुखहनुमत[कवच]स्तोत्रमहामन्त्रस्य, श्रीरामचन्द्र ऋषिः, अनुष्टुप्छन्दः, श्रीपञ्चमुखहनुमद्विराड्रूपी देवता, हनूमान् बीजम्, वायुसूनुरिति शक्तिः, अञ्जनासूनुरिति कीलकम्, पञ्चमुर्खीहनुमत्प्रसादसिद्ध्यर्थे जपे विनियोगः ।

End:

सप्तसमुद्रनिरालङ्कृताय अङ्गजलक्षणमूक(क)पिसैन्यनिर्वाहकाय दशकण्ठविध्वंसनाय सीतासमेतश्रीरामचन्द्रप्रसादकाय फट् स्वाहा ॥

No. **14676.** हनुमदघोरमन्त्रः.
HANUMADAGHŌRAMANTRA.

Pages, 4. Lines, 6 on a page.

Begins on fol. 54*a* of the MS. described under No. 5686.

Complete.

Similar to the work described under No. 6562 ante.

Beginning:

मनोजवं मारुततुल्यवेगं . . . श्रीरामदूतं शिरसा नमामि ॥

श्रीराघवं दशरथेश्वर(थात्मज)मप्रमेयं . . . रामं निशाचरविनाशकरं नमामि॥

अस्य श्रीहनुमदघोरप्रलयज्वालरौद्रविजयविक्रमविजृम्भकहनुमान्, असाध्यसाधनाघोरास्त्रप्रयोगमूलमन्त्रस्य अनुष्टुप् छन्दः, रामलक्ष्मणौ देवते नानाछन्दांसि, अकारेति बीजम्, वायुपुत्रकीलकम्, मम हनुमत्प्रसादसिद्ध्यर्थे जपे विनियोगः ।

End:

वायुनन्दन अञ्जनासुत सत्यसन्ध श्रीरामचन्द्र

* * * *

वं लं लां स्त्रीं स्तम्भय स्तम्भय जृम्भय जृम्भय मह्ले सर्वमन्त्रार्थसिद्धिं कुरु कुरु स्वाहा ॥

Fol. 59*a* contains Hanumanmantra in Telugu language, fol. 59*b* Hanumadgāyattrī, and Nārāyaṇamantra, fol. 60 Paramēśvarīmantra in Telugu and fol. 61*a* Śaktiviṣayakamantra in Telugu.

No. **14677.** शरभेश्वरमन्त्रः.

ŚARABHĒŚVARAMANTRAḤ.

Pages, 3. Lines, 6 on a page.

Begins on fol. 45*b* of the MS. described under No. 5660.

Complete.

Slightly different from the work described under No. 7367 ante.

Beginning:

अस्य श्रीशरभेश्वरमहामन्त्रस्य, कालाग्निरुद्र ऋषिः, जगती छन्दः, श्रीशरभेश्वरो देवता, ओं बीजम्, खं शक्तिः, खे कीलकम्, मम शरभेश्वरप्रसादसिद्ध्यर्थे जपे विनियोगः ।

End:

सर्वरोगसंहारणाय आपदोद्धारणाय शरभसालुवपक्षिराजाय हुं फट् स्वाहा ॥

No. **14678.** शरभपूजाविधानम्.

ŚARABHAPŪJĀVIDHĀNAM.

Pages, 5. Lines, 6 on a page.

Begins on fol. 54*b* of the MS. described under No. 5660.

Complete.

Slightly different from the work described under No. 8094 ante.

Beginning:

अथ शरभपूजाविधानम् । होमविधिः ।

देवदेव महादेव गिरिश जगतां पते ।
त्राहि मां जगतां नाथ परिधानं दशान्वितम् ॥
मन्त्राणामपि यत्सारं सर्वलोकैकशिक्षणम् ।

रक्षणं सर्वजन्तूनां ब्रूहि मे तद्विभो मनुम् ॥

*　　*　　*　　*

शरभेश्वरमन्त्रस्य ऋषिः कालाग्निरुद्रकः ।
छन्दस्तु जगती देवो भगवान् शरभेश्वरः ॥
खंकारबीजमित्युक्त्वा स्वाहाशक्तिरतः परम् ।
स्वेच्छाप्रयोगसिद्ध्यर्थे म्नि(विनि)योगस्ततोऽम्बिके ॥

End :

होमान्ते तु जपेन्मन्त्रं त्रिवारं शरभाष्टकम्।
तेनाष्टकेन मन्त्रेण भगवान् वरदो भवेत् ॥

Colophon :

इति शरभपूजाविधानं समाप्तम् ॥

No. **14679.** बालापरमेश्वरीमन्त्रः, पूजासहितः.
BĀLĀPARAMĒŚVARĪMANTRAḤ WITH PŪJĀ.

Pages, 4. Lines, 6 on a page.

Begins on fol. 71*a* of the MS. described under No. 5660.
Incomplete.
Similar to the work described under No. 6764 ante.

Beginning :

अस्य श्रीबाला परमेश्वरी[सुस्तोत्र]महामन्त्रस्य, दक्षिणामूर्तिः ऋषिः, अनुष्टुप् छन्दः, बाला परमेश्वरी देवता, ऐं बीजम्, क्लीं शक्तिः, सौः कीलकं, बालापरमेश्वरीप्रसादसिद्ध्यर्थे जपे विनियोगः ।

End :

वां अमृतात्मने रसतन्मात्रप्रकृत्यानन्दात्मने बालात्रिपुरसुन्दर्यै नमः ताम्बूलं परिकल्पयामि यैं नमः ॥

No. **14680.** शिवपूजाप्रयोगः.
ŚIVAPŪJĀPRAYOGAḤ.

Pages, 3. Lines, 6 on a page.

Begins on fol. 82*a* of the MS. described under No. 5660.
Wants the beginning and the end.
Similar to the work described under No. 5512 ante.

Beginning :

पादयोः पाद्यं समर्पयामि, हस्तयोरर्घ्यं समर्पयामि, मुखे आचमनीयं समर्पयामि । नमस्सोमाय च रुद्राय च नमस्ताम्राय चारुणाय च

* * * *

नमश्शिवाय च शिवतराय च । अमृताभिषेकोऽस्तु, शुद्धोदकस्नानं समर्पयामि ।

End :

वस्त्रं समर्पयामि । यज्ञोपवीतं परमं पवित्रं (. . .) यज्ञोपवीतं बलमस्तु तेजः । यज्ञोपवीतं समर्पयामि ॥

Fol. 83*b* contains one stanza of Rēṇukādēvipīṭha.

No. 14681. शरभेश्वरमन्त्रकल्पः.

ŚARABHĒŚVARAMANTRAKALPAḤ.

Substance, palm-leaf. Size, 8½ × 1½ inches. Pages, 20. Lines, 5 on a page. Character, Kanarese. Condition, much injured. Appearance, old.

Begins on fol. 1*a*. The other works herein are Bhairavamālāmantra 11*a*, Mōhinīdēvīmantra 15*a*, Mōhinīmālāmantra 15*b*, Raktacāmuṇḍīmālāmantra 16*b*, Cāmuṇḍīmantrakalpa 18*b*, Raktacāmuṇḍīmantrakalpa 19*b*, Mantrakalpa (in Kanarese) 25*a*

Incomplete.

Similar to the work described under No. 8092 ante.

Beginning :

अस्य श्रीशरभमन्त्रस्य कालाग्निरुद्र ऋषिः, अतिजगती छन्दः, शरभेश्वरो भगवान् देवता, ओं बीजम्, स्वाहा शक्तिः, सर्वाभीष्टसिद्ध्यर्थे जपे विनियोगः, ओं खं खां खं फट्, क्रूरग्रहसंहारणाय . . . . . .

* * * *

शरभसालुवपक्षिराजाय हुं फट् ।

End :

शरभास्त्रमिदं स्तोत्रममोघं जयवर्धनम् ।
. . . . ॥
तस्मादेवं जपेन्नित्यमष्टोत्तरशतं सुधीः ।
मन्त्रपूतं सम . . . . . . अस्त्रराजं महामनुम् ॥

No. 14682. भैरवमालामन्त्रः.
BHAIRAVAMĀLĀMANTRAḤ.

Pages, 5. Lines, 5 on a page.

Begins on fol. 11*a* of the MS. described under the previous number.

Complete.

Similar to the work described under No. 6550 ante.

Beginning :

ओं नमो भगवते उग्रभैरवाय सर्वविघ्नविनाशनाय स्वाहा ।

* * * *

ओं नमो भगवते उग्रभैरवाय सर्वविघ्नविनाशनाय ह्रीं आं अघोरभैरवाय देवदत्तं मोहय स्वाहा ।

End :

सौभाग्यं देहि मे स्वाहा । कालभैरवाय त्रिशूलप्रदाक्षिण . . . . ॥

No. 14683. मोहिनीदेवीमन्त्रः.
MŌHINĪDĒVĪMANTRAḤ.

Pages, 2. Lines, 5 on a page.

Begins on fol. 15*a* of the MS. described under No. 14680.

Complete.

The repetition of this Mantra, which is addressed to the goddess Mōhinī, is considered to be efficacious in bringing one's enemies under one's influence and control.

Beginning :

अस्य श्रीमोहिनीदेवीमन्त्रस्य, ईश्वर ऋषिः, जगती छन्दः, मोहिनी देवता, ऐं बीजम्, ह्रीं शक्तिः, क्लीं कीलकम् सर्वलोकशत्रुसम्मोहनार्थे जपे विनियोगः ।

End :

मूलमन्त्रः । ऐं ह्रीं क्लीं ॥

No. 14684. मोहिनीमालामन्त्रः.
MŌHINĪMĀLĀMANTRAḤ.

Pages, 2. Lines, 5 on a page.

Begins on fol. 15*b* of the MS. described under No. 14680.

Complete.

Similar to the above.

Beginning:

ओं नमो भगवते महामोहिनि महामाये सर्वलोकवशङ्करि देवदत्तस्य वाक्कायचित्तं मोहय नानारूपाप्रतीतिं शीघ्रं दर्शय ह्रीं स्वाहा ।

End:

सर्वसम्मोहनं श्रेष्ठं साध्यक्षेत्रकदर्शनम् ॥
सर्वशत्रुजयं दिव्यं सर्वाकर्षणसिद्धिदम् ।
स सर्वदा जपेन्नित्यं योऽम्बिके सावधानतः ॥

No. **14685.** रक्तचामुण्डिमालामन्त्रः.

RAKTACĀMUṆḌĪMĀLĀMANTRAḤ.

Pages, 4. Lines, 5 on a page.

Begins on fol. 16*b* of the MS described under No. 14680.

Complete.

Similar to the work described under No 6980 ante.

Beginning:

रक्तचामुण्डीमन्त्रस्य शङ्कर ऋषिः, अनुष्टुप् छन्दः, रक्तचामुण्डी देवता, श्रीं बीजं, ह्रीं शक्तिः, मम इष्टकाम्यार्थसिद्ध्यर्थे जपे विनियोगः ।

End:

ओं नमो रक्तचामुण्डि रुधिरमांसभोजिनि स्वाहा ॥

No. **14686.** चामुण्डीमन्त्रकल्पः.

CĀMUṆḌĪMANTRAKALPAḤ.

Pages, 2. Lines, 5 on a page.

Begins on fol. 18*b* of the MS described under No. 14680.

Complete.

Slightly different from the work described under No. 7831 ante, wherein see for the beginning.

Beginning:

अस्य श्रीचामुण्डीमन्त्रस्य वसिष्ठ ऋषिः, चामुण्डी देवता, ह्रीं बीजं, हुं फट् शक्तिः, सर्वनिग्रहे विनियोगार्थे जपे विनियोगः ।

* * * *

ह्रीं नमो भगवति चामुण्डेश्वरि सर्वशत्रुविनाशिनि सर्वलोकभयङ्करि एह्येहि मां रक्ष मम शत्रून् भक्षय हुं फट् स्वाहा ॥

No. 14687. रक्तचामुण्डीमन्त्रकल्पः. RAKTACĀMUṆḌĪMANTRAKALPAḤ.

Pages, 4. Lines, 5 on a page.

Begins on fol. 19*b* of the MS. described under No. 14680.

Complete.

Same work as that described under No. 8052 ante, but wants the colophon.

Foll. 21*b* and 22*a* contain the Yakṣiṇīmantra, 22*b*, 23 and 24 some portions of the Sudarśanayantra.

No. 14688. नृसिंहमालामन्त्रः. NṚSIṀHAMĀLĀMANTRAḤ.

Page, 1. Lines, 8 on a page.

Begins on fol. 1*b* of the MS. described under No. 5828

Incomplete.

Similar to the work described under No. 6524 ante.

Beginning:

ओं नमो भगवते अघोरवीरदारणनारसिंहा(य) रौद्राग्निज्वालितनेत्रत्रयाय प्रलयकालाग्निरुद्रावतारज्वालानारसिंहाय भस्माङ्गरागबर्बरकेशनखमुखदंष्ट्राकराल-हिरण्याक्षकुक्षिच्छेदनाय ।

End:

मारय मारय शोषय शोषय ताडय ताडय छिन्धि छिन्धि भक्षय भक्षय ज्वालय ज्वालय महानारसिंह रव रव रञ्जित रञ्जित स्तम्भोत्स्फूर्जित धग धगित.

No. 14689. गरुडपञ्चाक्षरीमन्त्रः. GARUḌAPAÑCĀKṢARĪMANTRAḤ

Pages, 3. Lines, 8 on a page.

Begins on fol. 6*b* of the MS. described under No. 5828.

Complete.

Similar to the work described under No. 6157 ante.

Beginning:

अस्य श्रीब्रह्मगरुडोपनिषदः कश्यपब्रह्मा ऋषिः, अनुष्टुबादिनानाछ-न्दांसि, श्रीमहाविष्णुर्गरुडो देवता, ओं क्षिं पं बीजं, स्वाहा शक्तिः, क्रों

कीलकं मन्त्रोक्तसर्वविषनाशनार्थे जपे विनियोगः ।

* * * *

ओं नमो भगवते श्रीमहाविष्णवे गरुडाय श्रीमहाविष्णुवरवाहनाय ।

End:

आवेशय आवेशय बद्धो हुं फट् स्वाहा । ओं क्षिप स्वाहा । ओं बद्धो हुं फट् स्वाहा ॥

No. **14690.** गरुडोपनिषत्.

GARUḌŌPANIṢAD.

Pages, 3. Lines, 8 on a page.

Begins on fol. 7*b* of the MS. described under No. 5828.

Complete.

Slightly different in the beginning and the end from the work described under No. 428 ante.

Beginning:

ओं ब्रह्मविद्यां प्रवक्ष्यामि, ब्रह्मा नारदाय, नारदो बृहत्सेनाय, बृहत्सेनो बृहस्पतये, बृहस्पतिरिन्द्राय, इन्द्रो भारद्वाजाय ।

* * * *

इन्द्रस्य वज्रेण हतं ते ब्रह्मणा हतमिन्द्रस्य वज्रेण स्वाहा ।

End:

अष्टौ ब्राह्मणान् ग्राहयित्वा तृणेन मोक्षयेत्, शतं ब्राह्मणान् ग्राहयित्वा चक्षुषा मोक्षयेत्, सहस्रं ब्राह्मणान् ग्राहयित्वा मनसा मोक्षयेत्—इत्याह ॥

Colophon:

अथर्वणवेदे गरुडोपनिषत्समाप्ता ॥

No. **14691.** प्रलयकालवीरभद्रबडबानलमन्त्रः.

PRALAYAKĀLAVĪRABHADRABAḌABĀNALAMANTRAḤ.

Pages, 3. Lines, 8 on a page.

Begins on fol. 8*b* of the MS. described under No. 5828.

Complete.

Slightly different from the work described under No. 6671 ante.

Beginning:

ओं नमो भगवते प्रलयकालवीरभद्राय नमः । मू । अस्य श्रीवीरभद्रबडबानलमहामन्त्रस्य, वामदेव ऋषिः, पङ्क्तिश्छन्दः, श्रीप्रलयकालवीर-

भद्रेश्वरो देवता, ह्रां बीजं, ह्रीं शक्तिः, ह्रौं कीलकं, श्रीप्रलयकालवीरभद्र-प्रीत्यर्थे जपे विनियोगः ।

End:

ओं नमो (भगवते) प्रलयकालवीरभद्रावताराय ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः हुं फट् स्वाहा ॥

Fol. 12*b* contains a few portions of Mahākālīmantra in Kanarese language.

No. **14692.** शरभगायत्रीमन्त्रः.

ŚARABHAGĀYATTRĪMANTRAḤ.

Page, 1. Lines, 8 on a page.

Begins on fol. 25*a* of the MS. described under No. 5828.

Similar to the work described under No. 8097 ante.

Beginning:

अस्य श्रीशरभगायत्रीमहामन्त्रस्य ईश्वर ऋषिः, अनुष्टुप् छन्दः, शरभेश्वरो देवता, मम इष्टकाम्यार्थसिध्यर्थे जपे विनियोगः ।

End:

सालुवाय विद्महे पक्षिराजाय धीमहि । तन्नः शरभः प्रचोदयात् ।

ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचन्द्रार्धमौलिं . . . . प्रसन्नं पद्मासीनं . . .

No. **14693.** अजपागायत्रीविधानम्.

AJAPĀGĀYATTRĪVIDHĀNAM.

Pages, 5. Lines, 7 on a page.

Begins on fol. 135*a* of the MS. described under No. 745.

Incomplete.

Slightly different from the work described under No. 5852 or 7733 ante.

Beginning:

पूर्वेद्युस्सङ्कल्पितमजपागायत्रीजपविनियोगं करिष्ये । अस्य श्री अजपा—स्य ब्रं अगा व हंसः सो हं म-गः हंसामित्यादि षडङ्गन्यासः । ध्यानम्—

अग्निष्टोमगरुत्मतं प्रणवकं बिन्दुत्रिनेत्रोज्ज्वलं
भास्वद्रुद्रमुखं शिवाङ्घ्रियुगलं पार्श्वस्थपञ्चाननम् ।

उद्यद्भास्वरभानुकोटिसदृशं हंसं जगद्व्यापिनं
शब्दब्रह्ममयं हृदम्बुजपुटे ईडे सदा संस्मरेत् ॥
आधारे लिङ्ग—नमामि । मूलं मूलाधारमण्डपे चतुर्दलकमले स्थिताय वल्लभाशक्तिसहिताय श्रीमहाग––मः ।

End:

हंसो गणेशो विधिरत्र हंसो हंसो हरिश्शम्भुमयश्च हंसः ।
हंसोऽपि जीवो गुरुरेव हंसो हंसोऽयमात्मा परमात्महंसः ॥
अ(ह)कारो निर्गमः प्रोक्तः सकारोऽन्तः प्रवेशने ।
हंस हंसेति हंसेति जीवो वदति सर्वदा ॥
अद्य सूर्योदयप्रभृति श्वः सूर्योदयपर्यन्त . . करिष्ये.

No. **14694.** हंसगुरुमन्त्रः.
HAMSAGURUMANTRAḤ.

Page, 1. Lines, 7 on a page.

Begins on fol. 140*a* of the MS. described under No. 745.
Incomplete.
Similar to the work described under No. 7614 ante.

Beginning:

परमशिवानन्दनाथश्रीपादुकां तर्पयामि नमः ।
अनाद्यायाखिलाद्याय मायिने गतमायिने ।
अरूपाय सरूपाय शिवाय गुरवे नमः ॥
अस्य श्रीहंसगुरुमहामन्त्रस्य ब्रह्मा ऋषिः, गा—न्दः, श्रीहं—ता, हं बीजं, सः शक्तिः, सोहं कीलकं मम—गः । हंसामित्यादिषडङ्गन्यासः ।

End:

सन्तोष्य च गुरुं वन्दे परसम्पत्प्रदायकम् ॥
यदङ्घ्रिकमलद्वन्द्वं तापनिर्वापकारणम् ।
तारकं च परब्रह्म श्रीगुरुं प्रणमाम्यहम् ॥
गुं गु—नमः ।

No. **14695.** शाम्भवपूजाविधानम्.
ŚĀMBHAVAPŪJĀVIDHĀNAM.

Pages, 45. Lines, 7 on a page.

Begins on fol. 140*a* of the MS. described under No 745

Contains Nābhasaśāṁbhava, Mārutaśāṁbhava, Taijasaśāṁbhava, Āpyaśāṁbhava and Pārthivaśāṁbhava-krama.

Complete.

On the details connected with the worship of the five elements conceived as the energy of God Śiva as a preliminary ceremony to the worship of Goddess Śakti.

Beginning :

ऐं ह्रीं श्रीं सौः आः ओं अं सः शिवः ह्सौः आं योऽहमस्मि अहमस्मि अहमस्मि ब्रह्माहमस्मि स्वच्छप्रकाशपरिपूर्णपरापरमहाप्रकाशपरिपूर्णश्रीकामेश्वरानन्दनाथकामेश्वरीपराम्बाश्रीपादु—मः । इति परशम्भुचरणं विमृश्य अथ रहस्यचरणमर्चयेत् । ऐं ह्रीं श्रीं आः ओं अं सः शिवः ह्सौः सोहं हसकहलह्रीं सकलह्रीं सच्चिदानन्दज्योतिरहं मूलाधारे पूर्ववन्मन्त्रमुच्चार्य अहमेवेति विशेषः ।

* * * *

सर्वोपचारान् समर्पयामि नमः ॥

इति नाभसशाम्भवक्रमः ॥

अथ मारुतशाम्भवक्रम उच्यते ॥

End :

इतः पूर्वं प्राणप्रतिष्ठामारभ्य—मस्तु स्वाहा । इयं पूजाशक्तिदृष्टिपातवता देवपरशिवगुरुशाम्भवदृक्पातादेव सम्भवतीति शिवम् ॥

No. **14696.** त्रिपुरसुन्दरीपूजाविधानम्.

TRIPURASUNDARĪPŪJĀVIDHĀNAM.

Pages, 6. Lines, 7 on a page.

Begins on fol. 186*b* of the MS. described under **No.** 745.

Complete, but wants the beginning.

Similar to the work described under No. 5659 ante.

Beginning :

सः नित्या—मः । ओं ह्रीं स्त्रैं स्त्रूं नित्यमदद्रवे हुं क्रों नीलपताका—मः । भमरयीं विजया मः । स्वां सर्वमङ्गलायै नमः । सर्वा—मः । ओं नमो भगवति ज्वालामालिनि देवदेवि सर्वभूतसंहारकारके जातवेदसि ज्वलन्ति ज्वल प्रज्वल प्रज्वल हुं कं कं कं हुं फट् स्वाहा । ज्वालामालिनि—मः । च क्रौं चित्रायै न(मः) चित्रा—मः । श्रीषोडशाक्षरीमुक्त्वा

तुर्यविद्यात्मिकां महात्रिपुरसुन्दरीमहानित्याश्रीपादुकां पूजयामि तर्पयामि नमः । इति षोडशनित्यास्संपूज्यान्यदेवताः पूजयेत् ।

End:

इति मूलमन्त्रैस्सम्पूज्य सालिपिशितैः सुवासिन्या संपूज्य स्वयं च मुदितो भूत्वा यथासुखं विहरेदिति शिवम् ॥

No. **14697.** पञ्चवक्त्रहनुमन्मन्त्रः.

PAÑCAVAKTRAHANUMANMANTRAḤ.

Pages, 4. Lines, 6 on a page.

Begins on fol. 1*b* of the MS. described under No. 5832.

Complete.

Similar to the work described under No. 6561 ante.

Beginning:

अस्य श्रीपञ्चवक्त्रहनुमन्महामन्त्रस्य शौनक ऋषिः, अतिजगती छन्दः, पञ्चमुखहनुमान् रुद्रो देवता, हं बीजं, यं शक्तिः, रं कीलकं महाहनुमत्प्रसादसिद्ध्यर्थे जपे विनियोगः ।

* * * *

ओं नमो भगवते पञ्चवक्त्रहनुमते वायुपुत्राय स्वर्णरूपाय महोदराय महाकायाय वज्रदंष्ट्राय वज्रनखाय महाभीमाय हरिमर्कटमर्कटाय स्वाहा ॥

End:

रावणवनच्छेदनाय खें खें मच्छत्रुद्वयान्(नां) परस्परं विद्वेषणं कुरु स्वाहा ।

* * * *

आकर्षणञ्चोच्चाटं मारणं मोहनं तथा ।
विद्वेषणं स्तम्भनञ्च षट्प्रयोगाश्शुभानने ॥
निवेदनान्तं गोक्षीरं नारिकेलगुलोदकम् ।
अपूपं परमान्नञ्च नैवेद्यञ्च यथाविधि ॥

No. **14698.** पञ्चवक्त्रहनुमन्मालामन्त्रः.

PAÑCAVAKTRAHANUMANMĀLĀMANTRAḤ.

Pages, 3. Lines, 6 on a page.

Begins on fol. 3*a* of the MS. described under No. 5832.

Complete.

Similar to the work described under No. 6566 ante.

Beginning:

अस्य श्रीपञ्चवक्त्रहनूमन्मालामन्त्रस्य श्रीरामचन्द्र ऋषिः, अतिजगती छन्दः, श्रीपञ्चमुखवीरहनुमान् देवता, अं बीजं यं शक्तिः, रं कीलकं, श्रीपञ्चमुखवीरहनुमत्प्रीत्यर्थे जपे विनियोगः ।

End:

ओं नमो भगवते प्रकटबलाक्रान्तसमस्तदिङ्मण्डलयशोविधानधवलीकृतजगत्रितयवज्रदेह

* * * *

सर्वशत्रून् जहि पञ्चमुखश्रीहनुमन् शीघ्रमेव सर्वसिद्धिं कुरु कुरु स्वाहा ॥

No. **14699.** पञ्चवक्त्रहनुमन्मन्त्रः.

PAÑCAVAKTRAHANUMANMANTRAḤ.

Pages, 4. Lines, 6 on a page.

Begins on fol. 14*a* of the MS. described under No. 5832.

Complete.

Slightly different from the work described under No. 6562 ante.

Beginning:

अस्य श्रीपञ्चमुखहनुमन्महामन्त्रस्य ईश्वर ऋषिः, गायत्री छन्दः, परब्रह्मरूपी पञ्चमुखहनुमान् देवता, ओं बीजं, स्वाहा शक्तिः, पञ्चवदनायेति कीलकं समस्तकाम्यार्थसिद्ध्यर्थे जपे विनियोगः ।

End:

वायुपुत्र अञ्जनासुत पाहि पाहि वीरबन्धन वीरविक्रम श्रीरामदूत शत्रुक्षयाय स्वाहा । ओं ह्रौं हुं फट् स्वाहा ॥

No. **14700.** सुदर्शनमालामन्त्रहोमविधिः.

SUDARŚANAMĀLĀMANTRAHŌMAVIDHIḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 16*a* of the MS. described under No. 5832.

Wants the beginning and the end.

Similar to the work described under No. 3855 ante.

Beginning:

. . . . ।

. . . . . रक्तं बालमित्रारुणं . . ॥

प्रत्यालीढपदाम्बुजं त्रिनयनं चक्राधिराजं भजे ॥

इति ध्यात्वानन्तरमष्टदिक्पालकावाहनं कृत्वा पूर्ववत्पूजयित्वा तदुपरि अष्टदलपद्मं कृत्वा तन्मध्ये तण्डुलं(मण्डलं) कृत्वा अग्निं प्रतिष्ठाप्य ध्यानपूर्वकमभ्यर्च्य ।

यज्ञरूपं हरिं विष्णुमग्निमण्डलमध्यगम् ।
शङ्खचक्रधरं देवं तप्तजाम्बूनदप्रभम् ॥

End:

भक्षय भक्षय भूतानि त्रासय त्रासय हुं फट् स्वाहा । सुदर्शनाय विद्महे महाचक्रराजाय धीमहि । तन्नश्चक्रः प्रचोदयात् स्वाहा । अनन्तरं परमन्त्रमालामन्त्रहोमं षडाहुतीर्हुत्वा बालामन्त्रं मृत्युर्नश्यतु आयुर्वर्धताम । त्रिवारमुच्चार्य मृत्यवे स्वाहा । मृत्यव इदं न मम । परमन्त्रनिवारणमालामन्त्रहोममुहूर्तस्सुमुहूर्तोऽस्तु, अप उपस्पृश्य.

Fol. 19*b* contains Navadhānyadānasaṅkalpa. Foll. 20 and 21*a* contain Mṛtyuviṣaharamālāmantra.

No. **14701.** जलदुर्गाबडबानलमन्त्रः.
JALADURGĀBAḌABĀNALAMANTRAḤ.

Pages, 2. *Lines*, 6 *on a page.*

Begins on fol. 21*a* of the MS. described under No. 5832.

This Mantra is in praise of Durgā : and its repetition is said to have the power of removing all dangers in water and also of counteracting the effects of hostile Mantras.

Beginning and the **End:**

ओं आं ह्रीं सौः ग्लौं ऐं ह्रीं श्रीं जलदुर्गे क्रों ऐं एहि एहि स्फुर स्फुर प्रस्फुर प्रस्फुर आदिविष्णुसोदरि अ(प)सर जलदुर्गे आवेश आवेश । जलदुर्गाय विद्महे जाज्वल्यमानाय धीमहि । तन्नो वडबानलः प्रचोदयात् ॥ ह्रुमलवरयूं महाजलदुर्गहस्तायै हुं फट् स्वाहा ॥

Foll. 30*a* and 30*b* contain Prāṇapratiṣṭha of Rudramālāmantra, etc.

No. **14702.** मन्त्रपल्लवविषयः.
MANTRAPALLAVAVIṢAYAḤ.

Pages, 2. *Lines*, 6 *on a page.*

Begins on fol. 33*b* of the MS. described under No. 5832.

Complete.

Same work as that described under No. 8003 ante.

Fol 36*a* contains Yantralēkhanaviṣayavacanas.

No. 14703. पार्वतीपरमेश्वराष्टकम्.
PĀRVATĪPARAMĒŚVARĀṢṬAKAM.

Page, 1. Lines, 6 on a page.

Begins on fol. 8*b* of the MS. described under No. 831.

Breaks off in the sixth stanza.

Same work as that described under No. 9366 ante.

No. 14704. जपमालिकाक्रममन्त्रप्रयोगः.
JAPAMĀLIKĀKRAMAMANTRAPRAYŌGAḤ.

Page, 1. Lines, 6 on a page.

Begins on fol. 9*b* of the MS. described under No. 831.

On the number of beads in a rosary required for the accomplishment of certain desired ends and on the details of procedure connected with the repetition of the Mantras for the purpose.

Beginning and the **End:**

पञ्चविंशति मो(हकं) सप्तविंशति शान्तिकम् ।
द्वात्रिंशद्धननं प्रोक्तं दशपञ्चाभिचा(चा)रकम् ॥
आकर्षणं त्रयोदशं प्रमाणं जपमालिकः ? ।

ईशान्य य घातय विदारय विदारय पञ्चमुखशरभसाल्वाय पक्षिराजाय पाहि पाहि वौषडिति आकर्षणं देवताप्रसन्नं ओं य न वा शि मः, मः (न)वा शि(य), शिमः य न वा, वाशिमः य न, नवाशिमय, ओं नमो भगवते खं खं हुं फट् स्वाहा । उच्चाट सर्वशत्रुप्रयोगः, उच्चाटय हुं फट् ॥
इति प्रयोगः ॥

No. 14705. दक्षिणामूर्तिस्तोत्रम्.
DAKṢIṆĀMŪRTISTOTRAM.

Pages, 3. Lines, 6 on a page.

Begins on fol. 31*b* of the MS. described under No. 831.

Incomplete.

Similar to the work described under No. 10979 ante.

Beginning :

सनकमुखमुनिनिकरविहितपरिचरणं
कनकमयसदसि बहुनटनपटुचरणम् ।
अनवरतविरतिपथनिरतमतशरणं
बत भजत वटनिकटशरणमिह शरणम् ॥

End :

दधतमुरुभुजगयुजि शिरसि सुरसरितं
क्षितिदिविपदसुबसुहृदघशमनचरितम् ।
अणुहृदयनिलयमपि ततविततहरितं
बत भजत वटनिकटशरणमिह शरणम् ॥
अदितिसुतदितितनयमुनिनिवहभणितं
गरमिलित . . . .

No. **14706.** महागणपतिमन्त्रः.

MAHĀGAṆAPATIMANTRAḤ.

Pages, 3. Lines, 6 on a page.

Begins on fol 72*a* of the MS. described under No. 4225.

Complete.

Slightly different from the work described under No. 6879 ante.

Beginning :

गुरुर्ब्रह्मा गुरुर्विष्णुः (. . .) श्रीगुरवे नमः ॥
पृथ्वि त्वया धृता (. . .) कुरु चासनम् ॥
अपसर्पन्तु ये भूताः (. . .) शिवाज्ञया ॥

गं गणपतये नमः, दुं दुर्गायै नमः, अं आत्मने नमः, पं परमात्मने नमः, अस्य श्रीमहागणपतिमहामन्त्रस्य गणक ऋषिः, गायत्री छन्दः, श्रीमहागणपतिर्देवता, ग्लां बीजं, ग्लीं शक्तिः, ग्लूं कीलकं, श्रीमहागणपतिप्रसादसिद्ध्यर्थे जपे विनियोगः ।

End :

ओं ह्रीं श्रीं ग्लं ग्लौं गं गणपतये वर वरद सर्वजनं मे वशमानय स्वाहा । एवं हृदयादिन्यासः, भूर्भुवस्सुवरोमिति दिग्विमोकः ॥

No **14707.** शक्तिपञ्चाक्षरीमहामन्त्रः.

ŚAKTIPAÑCAKṢARĪMAHĀMANTRAḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 73*a* of the MS described under No. 4225.

Complete.

Similar to the work described under No. 7302 ante.

Beginning :

अस्य श्रीशक्तिपञ्चाक्षरीमहामन्त्रस्य वामदेव ऋषिः, अनुष्टुप् छन्दः, श्रीसाम्बसदाशिवो देवता, ओं बीजं, नमश्शक्तिः, शिवायेति कीलकं, श्रीसाम्बसदाशिवप्रसादसिद्ध्यर्थे जपे विनियोगः ।

End :

पञ्चपूजां कल्पयामि ह्रीं ओं नमश्शिवाय. एवं हृदयादिन्यासः, भूर्भुवस्सुवरोमिति दिग्विमोकः,

गुह्यातिगुह्यगोप्तस्त्वं गृहाणास्मत्कृतं जपम् ।
सिद्धिर्भवतु मे देव त्वत्प्रसादान्मयि स्थिरा ॥

Fol 74c contains Rāmacakraphalaviṣayavacanas

No. **14708.** अव्यापकविषयताशून्यत्वपत्रम्.
AVYĀPAKAVIṢAYATĀŚŪNYATVAPATRAM.

Pages, 5. Lines, 8 on a page.

Begins on fol. 39b of the MS. described under No. 4237.

Incomplete.

A discussion on a minor point in the second Lakṣaṇa of the Sāmānyanirukti.

Beginning :

अत्राव्यापकविषयताशून्यत्वविशेषणं स्वतन्त्रं नास्तीति पामरजनप्रतारणमात्रमिदम् ; स्वोक्तविशेषणस्य तत्रैव पर्यवसानात्तदपेक्षया लघुत्वाभावाच्चैव चारितार्थ्याच्च । तथाहि—यद्रूपावच्छिन्नविषयित्वे यादृशधर्मावच्छिन्नानिरूपितत्वसत्त्वे यद्रूपावच्छिन्नविषयकज्ञाने यादृशधर्मावच्छिन्ननिरूपितविषयित्वाभावोऽपि सम्भावित इति भट्टाचार्योक्ताव्यापकविषयिताशून्यत्वे पर्यवसानम् ।

End :

अयं च दोषः भट्टाचार्योक्ताव्यापकविषयताशून्यत्वं निवेश्य तत्र विषयितात्रयघटितदर्शितपरिष्कारादरो न सम्भवति ।

* * * *

एवं गोत्वं गोत्ववदिति ज्ञानेऽपि गोत्वत्वावच्छिन्नविषयानिरूपितसं-सर्गतानिरूपितगोत्वावच्छिन्नविशेष्यतामादाय न दोषः, एतच्च निरुक्ते चतुर्थपङ्क्तौ द्रष्टव्यमिति ॥

No. 14709. गृहादिषोडशदानप्रशंसा.

GṚHĀDIṢŌḌAŚADĀNAPRAŚAṀSĀ.

Pages, 6. Lines, 7 on a page.

Begins on fol. 62*a* of the MS. described under No. 13463.

Wants the beginning and the end.

A collection of stanzas culled out from various authoritative works and explaining the importance and efficacy of the 16 kinds of gifts to Brahmins, viz., a dwelling house, a plank to sit upon, water, apparel, lamp, food, betel leaves and nuts, perfumes, garland, fruit, bed, shoes, cow, silver and gold.

Beginning:

संवर्तः—

गृहदानात्सुखं प्रज्ञावितृष्णस्सर्ववस्तुषु ।
प्रज्ञासुखविवृद्ध्यर्थं पात्रे देयमतो गृहम् ॥

बृहस्पतिः—

सर्वोपस्करयुतं दद्याद्विप्राय यो गृहम् ।
तस्य वंशोऽपि मर्त्यस्य स्वर्गं प्राप्नोत्यनुत्तमम् ॥

शिवरहस्ये—

गृहं वा गृहभूमिं वा गृहोपकरणानि वा ।
यन्त्रोलूखलकादीनि स श्रीमान् स्वर्गभाक् भवेत् ॥

* * * *

देवतापञ्चकं तत्र चत्वारिंशत्समन्वितम् ।
पूजयित्वा यथान्यायं ततो दद्याद्गृहं गृही ॥

Colophon:

इति नानापुराणोक्तगृहदानप्रशंसा ॥

End:

विष्णुधर्मोत्तरे—

धर्मशास्त्रप्रदानेन धर्मेण सह मोदते ।

सिद्धान्तानां प्रदानेन मोक्षमाप्नोत्यसंशयम् ॥
शास्त्राणि दत्वा चान्यानि नरो नाके महीयते ।

No. 14710. धर्मशास्त्रवचनानि.
DHARMAŚĀSTRAVACANĀNI.

Pages, 3. Lines, 7 on a page.

Begins on fol. 65*a* of the MS. described under No 13463.

Wants the beginning and the end.

A collection of stanzas taken from various works on Dharmaśāstra and laying down certain rules of good conduct.

Beginning:

मनुः—

विद्वद्भिस्सेवितस्सद्भिर्नित्यमद्वेषरागिभिः ।
हृदयेनाभ्यनुज्ञातो यस्तं धर्मं व्यवस्यत ॥

याज्ञवल्क्यः—

कर्मणा मनसा वाचा यत्नाद्धर्मं समाचरेत् ।
अस्वर्ग्यं लोकविद्विष्टं धर्ममप्याचरेन्न तु ॥

End:

पुनराप्यायते धेनुस्तृणैरमृतसम्भवैः ।
एवं जपैश्च होमैश्च पुनराप्यायते द्विजः ॥

शौनकः—

अर्थार्थं भोजनार्थं वा यो वेदाक्षरमुच्चरेत् ।
चण्डालस्तु स विज्ञेयस्सर्वकर्मबहिष्कृतः ॥

व्यासः—

प्रति . . . .

No. 14711. कुलशेखरस्तुतिः.
KULAŚĒKHARASTUTIḤ.

Pages, 2. Lines, 7 on a page.

Begins on fol. 76*a* of the MS. described under No. 12811.

Wants the beginning and the end.

A eulogy on Kulaśēkhara, a prince of the Travancore State and probably a descendant of Kulaśēkhara Āḻvār, the author of Mukundamālā and other works.

Beginning :

इन्द्राग्नी शतमन्युसंश्रयदहौ कालाशरौ हंसभू-
हिंसाकर्मविहारिणौ जळपतिः पाशी विरूपो मरुत् ।
पौलस्त्योऽपि च किन्नरः पशुपतिश्शूली(दिगी)शामहो
मात्राभिः कुलशेखरक्षितिपतिर्धात्रा कथं निर्ममे ॥
शेते यन्नगरे हरिर्विगणयन् श्रीमत्स्वधामत्रयं
यत्पूजामनुमोमुदीति सनकाद्याराधने निस्पृहः ।
श्रुत्वा यस्य च मोमुदीति सुधयन् श्रीनारदीयां स्तुतिं
तस्य श्रीकुलशेखरक्षितितुरासाहे स्पृहां कुर्महे ॥

End :

श्रीवाणीदयितो जनार्दनविधी जैवातृको लाञ्छनी
त्रीवामामसितोऽपि नैव समदृक् देवाधिपो गोत्रभित् ।
नावा दुस्तरनिस्स्वताब्धितरणे ग्लावा जनानन्दने
को वा सम्मितिमभ्युपैतु भुवने भूवासवेनामुना ॥

* * * *

सेदानीं कुलशेखरक्षितिपतौ निक्षिप्य रक्षाभरं
लक्ष्मीरञ्जनतत्परो भवतु नश्श्रीपद्मनाभश्श्रियै ॥

Foll. 77 and 78 contain a few stanzas illustrating certain figures of speech.

No **14712.** तर्कसङ्ग्रहटिप्पणी.

TARKASAṄGRAHAṬIPPAṆĪ.

Pages, 6. Lines, 5 on a page.

Begins on fol. 29*a* of the MS. described under No. 12419.

Wants the beginning and the end.

A gloss on the Tarkasaṅgraha, which work has been described under Nos. 4143—4152 ante.

Beginning :

चक्षुर्मात्रग्राह्यो(ह्य)गुणो रूपम् ; चक्षुरेव चक्षुर्मात्रम् . . . .
चक्षुर्मात्रेण ग्राह्यः स चासौ गुणश्चेति कर्मधारयः भावप्रधानो निर्देशः, चक्षुर्मात्रग्राह्यत्वे सति गुणत्वं रूपस्य लक्षणम् , रूपं लक्ष्यम् ।

End :

एकस्मिन्नर्थे तन्तौ समवेतं सत् समवायसम्बन्धेन वर्तमानं सत् यादृशकार्यमुत्पद्यते पटात्मककार्यमुत्पद्यते इति तन्तुसंयोगः पटस्यासमवायिकारणमित्यर्थः ।

No. 14713. व्याकरणविषयः.
VYĀKARAṆAVIṢAYAḤ.

Pages, 4. Lines, 7 on a page.

Begins on fol. 48*a* of the MS. described under No. 4082.

Wants the beginning and the end.

Similar to the work described under No. 1583 ante.

Beginning:

स्तोः श्चुना श्चुः । स्तोरिति पुंस्त्वमेकवचनं वा आर्षम् । एवं श्चुनेत्यत्रापि योग इत्यध्याहार्यम् । अस्मादेव निर्देशात् सहशब्दाप्रयोगेऽपि तदर्थस्य गम्यत्वे तृतीया । प्रश्न इति । प्रश्ने चासन्नकाले इति निर्देशात् ग्रहिज्येति संप्रसारणं न ।

End:

वस्तुतस्तु उत्तरपदत्वे चेति प्रत्ययलक्षणप्रतिषेधो यत्रोत्तरपदस्य कार्यित्वं तत्रैव प्रवर्तते, अन्यथा पदव्यवायेऽपीति निषेधो माषवापेणेत्यत्र न स्यात । अतः परमदण्डिनेत्यत्र ङमुडागमाय ङमि च पद इत्यतः पदे इत्यनुवृत्य(वर्त्य) अजादेः परस्य ङमुडिति व्याख्येयम्.

No. 14714. मातृकाचक्रन्यासः.
MĀTṚKĀCAKRANYĀSAḤ.

Pages, 2. Lines, 4 on a page.

Begins on fol. 148*a* of the MS. described under No. 5290.

On the drawing of a mystic diagram of 16 columns in which the letters of the alphabet are distributed in some order.

Beginning and the **End:**

अकथहाश्च प्रथमे द्वितीये उङपास्तथा ।
तृतीयेऽर्णा (आ)खदलान् चतुर्थे ऊचफान् क्रमात ॥
पञ्चमे चौडवान् वर्णान् षष्ठ तु लृझमान् क्रमात् ।
सप्तमेऽप्यौढशान्वर्णा अष्टमे लॄञयान्पदे ॥
नवमे ईघनान्वर्णान् दशमे ॠजभान् पदे ।
इगधक्षानेकपङ्क्तौ ऋछबान् (द्वादशे पदे) ॥
विसर्गः सतानेकपङ्क्तौ ऐठलानि (चतुर्दशे) ।
अंणषाः पञ्चदशमे एल(र)टान् षोडशे लिखेत् ॥

अ क थ ह	उ ङ प	आ ख द ळ	ऊ च फ
ओ ड व	ऌ झ म	औ ढ श	ॡ ञ य
ई घ न	ऋ ज भ	इ ग ध क्ष	ॠ छ ब
अः न स	ए ठ ल	अं ण प	ए र ट

No. **14715.** वामनकारिका.
VĀMANAKĀRIKĀ.

Pages, 4. Lines, 9 on a page.

Begins on fol. 1*a* of the MS. described under No. 70.
Wants the beginning in the Apara portion.
Same work as that described under No. 3784 ante.

No. **14715**. शकलहोमः.
ŚAKALAHŌMAḤ.

Pages, 2. Lines, 9 on a page.

Begins on fol. 2*b* of the MS. described under No. 70.
Complete.
Similar to the work described under No. 3805 ante.

Beginning:

अस्य श्रीनिवासशर्मणो माणवकस्याद्य करिष्यमाणकर्म कर्तुं सर्वपाप-निर्हरणार्थं शकलहोमं करिष्ये । षोडश समिधो निधाय गृह्याग्नौ पचनाग्नौ वा होमः । देवसवितः प्रसुव यज्ञं (. . .) न स्वदतु इति पर्युक्ष्य ।

End:

भूस्स्वाहा. भुवस्स्वाहा. सुवस्स्वाहा. सू—मम । ओं भूर्भुवस्सुवस्स्वाहा प्रजा मम । देवसवितः (प्रासा) वीः । अस्वादीत् ॥

Colophon:

इति शकलहोमस्समाप्तः ॥

No. **14717.** हरिवासरविषयवचनानि.

HARIVĀSARAVIṢAYAVACANĀNI.

Pages, 2. Lines, 7 on a page.

Begins on fol. 77*a* of the MS. described under No. 70.

Wants the beginning and the end.

Determines the Ēkādaśī day for the purpose of fasting. It is stated that if a part of Daśamī intervenes in the Ēkādaśī day, the fast should not be observed on that day, but should be observed in the next following day.

Beginning:

अरुणोदयवेलायां दशमी मिश्रिता यदि ।
तस्मिन् दिने व्रतं नैव श्वः कुर्यादुपवासकम् ॥
दशमी मिश्रिता यत्र न व्रतं नोपवासकम् ।
शुद्धे हरिदिने प्रोक्तमुपवासो विशेषतः ॥

End:

तद्धरिवासरं परित्यज्य (अ)परेद्युः हरिवासरोपवासादिकं कुर्यात् । हरिदिनस्य सूर्योदयात्पूर्वमरुणोदयात्परं चतुष्टयघटिकासु कलामात्रं दशमी दृश्यते यदि तत्र नोपवासः.

No. **14718.** विष्णुसहस्रनामभाष्यम्.

VIṢṆUSAHASRANĀMABHĀṢYAM.

Pages, 2. Lines, 8 on a page.

Begins on fol. 87*a* of the MS. described under No. 70.

Wants the beginning and the end.

Same work as that described under No. 9073 ante.

No. **14719.** स्थालीपाकः.

STHĀLĪPĀKAḤ.

Pages, 3. Lines, 10 on a page.

Begins on fol. 88*a* of the MS described under No. 70.

Complete.

Similar to the work described under No. 3867 ante.

Beginning:

अथ स्थालीपाकप्रयोग उच्यते । अथ पौर्णमासोपक्रमौ दर्शपूर्णमासौ दार्शे चेत्पूर्वमुपपद्येत । पौर्णमासेनेष्ट्वा[य] तत्कुर्यात् । अकुर्वन्पौर्णमासीमाकाङ्क्षेदित्येके ।

End:

अतीतस्थालीपाकं प्राप्तकाले कृत्वा अनन्तरं प्राप्तं स्थालीपाकं कुर्यात ॥

No. **14720.** द्राह्यायणगृह्यपरिशिष्टम्.

DRĀHYĀYAṆAGṚHYAPRIŚIṢṬAM.

Pages, 48. Lines, 8 on a page.

Begins on fol. 90*a* of the MS. described under No. **70.**

Contains up to the Parjanyakalpa.

Same work as that described under No. 1173 ante.

No. **14721.** औपासनम्.

AUPĀSANAM.

Pages, 2. Lines, 8 on a page.

Begins on fol. 114*a* of the MS. described under No. **70.**

Complete

Similar to the work described under No. 2838 ante.

Beginning:

अथातोऽग्नेरौपासनस्यस्य विवाहयोर्नेर्द्वादशाहं विच्छिन्नस्य पुनराधानविधिं व्याख्यास्यामः । पुनराधानं कर्तुकामो हविष्यमन्नमेकभुक्तं भुक्त्वापरेद्युरुपवासं कुर्वन् प्रपदमरण्येष्टशतं जपेत् ।

End:

सायं प्रातर्गोसू(र्गोसू)क्ताश्वसूक्ते होमान्तेषु वामदेव्यं गायेदिति गायेदिति ॥

Colophon:

इत्यौपासनविधिस्समाप्तः ॥

No. **14722.** सामगोपाकर्मविधिः.

SĀMAGŌPĀKARMAVIDHIḤ.

Pages, 3. Lines, 8 on a page.

Begins on fol. 114*b* of the MS. described under No. **70.**

Wants the beginning and the end.

On the details connected with the ceremony of beginning a session for the study of the Vēdas. This procedure is intended for the Sāmavēdins.

Beginning:

जथ हस्तविधिः ।

अथ नदीं महोदकं वा सह शिष्यैर्गत्वाचार्यस्त्रिस्त्रिरपः प्रगाह्य पञ्चगव्यं प्राश्य नैत्यकं कर्म समाप्याद्भिर्देशं प्रक्षाल्यार्कपत्रेषु षट् पङ्क्तीः पांसुभिस्स्थापयित्वा सप्त ऋषीन् त्रयोदशाचार्यान् ।

* * * *

दर्भेषु मनसा सर्वानावाह्य ।

End:

धानादध्नोश्च भक्षणं धानावन्त दधिक्राव्ण इति पायसं च घृतोत्तरं भुञ्जीत । श्वः प्रभाते यथासम्भवमलङ्कृत्य पूर्ववद्वाचनमारण्यं वर्जयेत् ।

No **14723.** शरभसालुवमालामन्त्रः.

ŚARABHASĀLUVAMĀLĀMANTRAḤ.

Substance, palm-leaf. Size, $7\frac{7}{8} \times 1\frac{1}{8}$ inches. Pages, 6. Lines, 7 on a page. Character, Telugu. Condition, much injured. Appearance, old.

Begins on fol. 1*a*. The other works herein are Bhairavakalpa 3*b*, Śarabhamantrakalpa 10*b*, Raktacāmuṇḍīmantra 22*a*, Śarabhakavaca 24*a*, Śarabhēśāṣṭaka 35*a*.

Complete, but wants the beginning.

Similar to the work described under No. 7564 ante.

Beginning:

उरगमहामणिभूषणाय, उद्दण्डोद्दण्डकोदण्ड(मण्डिताय), सकललोकप्रियाय, सकललोकभीतिनिवारणाय, शतधृतिकवचालङ्कृताय, शार्दूलचर्मासनालङ्कृताय, शरभसालुवाय ।

End:

मृगविहङ्गरूपधराय, शरभेश्वराय हुं फट् स्वाहा ॥

No. **14724.** भैरवकल्पः.

BHAIRAVAKALPAḤ.

Pages, 15. Lines, 7 on a page.

Begins on fol. 3*b* of the MS. described under the previous number.

Complete.

Similar to the work described under No. 7992 ante.

Beginning:

अस्य श्रीउग्रभैरवमहामन्त्रस्य, अघोर ऋषिः, विराट्छन्दः, उग्रभैरवो देवता, भां बीजम्, भा शक्तिः, श्रीउग्रभैरवप्रसादसिद्ध्यर्थे जपे विनियोगः ।

* * * *

तद्यन्त्रं भस्मनि विलिख्य भैरवमन्त्रं जपित्वा भस्म क्षिपेदावेशो भवति ।

End:

बन्ध बन्ध घातय घातय हुं फट् स्वाहा ॥

No. **14725.** शरभमन्त्रकल्पः.

ŚARABHAMANTRAKALPAḤ.

Pages, 24. Lines, 7 on a page.

Begins on fol. 10*b* of the MS. described under No 14723.

Complete.

Similar to the work described under No. 8092 ante.

Beginning:

मूलमन्त्रेण त्रिवारं जलं पीत्वा मूलेन प्राणायामत्रयं कृत्वा देशकालादि सङ्कीर्त्य श्रीशरभसाल्वेश्वरप्रसादसिद्ध्यर्थं शरभसाल्वसन्ध्यावन्दनं करिष्ये इति सङ्कल्प्य ततो जले अष्टकोणं विलिख्य तद्बहिः द्वादशदलपद्मं विरच्य ।

* * * *

सशक्तिपरिवारं श्रीशरभसालुवसदाशिवमावाहयामि नमः ।

End:

हैं हुं फट् स्वाहा ।

य इदं कालमन्त्रस्य निशामध्येऽयुतं पुनः ।
जप्त्वा जपेत्ततो मन्त्रं सहस्रं नामपूर्वकम् ॥
तज्जपस्यावसाने तु केवलं मरणं भवेत् ।

No. **14726.** रक्तचामुण्डीमन्त्रः.

RAKTACĀMUṆḌĪMANTRAḤ.

Pages, 3. Lines, 7 on a page.

Begins on fol. 22*a* of the MS. described under No. 14723.

Incomplete.

Similar to the work described under No. 6980 ante.

Beginning:

अस्य श्रीरक्तचामुण्डीमहामन्त्रस्य, शरभ ऋषिः, अनुष्टुप् छन्दः, रक्तचामुण्डी देवता, श्रीं बीजम्, ह्रीं शक्तिः, मम शत्रुक्षयार्थे जपे विनियोगः ।

End:

शुम्भध्वंसिनि संहराशु दुरितं दुर्गे नमस्तेऽम्बिके ।

No. **14727.** शरभकवचः.

ŚARABHAKAVACAḤ.

Pages, 23. Lines, 7 on a page.

Begins on fol. 24*a* of the MS. described under No. 14723.

Complete.

Same work as that described under Nos. 7323 and 7324 ante, but with a different colophon which is given below:—

इति श्रीभैरवकल्पे प्रत्यक्षसिद्धिप्रदे श्रीउमामहेश्वरसंवादे शरभसालुवपक्षिराजकवचं नाम एकचत्वारिंशोऽध्यायः ॥

No. **14728.** शरभेशाष्टकम्.

ŚARABHĒŚĀṢṬAKAM.

Pages, 2. Lines, 7 on a page.

Begins on fol. 35*a* of the MS. described under No. 14723.

Complete.

Same work as that described under R. No. 1456(*c*) of the Triennial Catalogue, Vol. II, Part I-B.

No. **14729.** उग्ररथशान्तिकल्पः, प्रयोगसहितः.

UGRARATHAŚĀNTIKALPAḤ WITH PRAYŌGA.

Pages, 54. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No 3496.

Complete.

Similar to the work described under No. 3571 ante. The procedure herein laid down is taken from the Śaivāgama.

Beginning:

कैलासशिखरे रम्ये सर्वदेवनमस्कृतम् ।
प्रणम्य शङ्करं देवं गुहः पप्रच्छ सादरम् ॥

स्वामिन्नुग्ररथो नाम सर्वप्राणभयङ्करः ।
पुत्रपौत्रक्षयकरः धनधान्यविनाशनः ॥
राज्यभ्रंशकरो राज्ञां क एष परिकीर्त्यते ।

* * * *

उत्पत्त्यब्दादुग्ररथः षष्टि(त)मोऽब्दः [प्र]कीर्तितः ।
यस्याविर्भावमात्रेण संसारी भयमाप्नुयात् ॥

* * * *

शैवागमप्रसिद्धेयं मुनिभिः परिकीर्तिता ।
गुहोग्ररथशान्तिं तां सावधानमनाश्शृणु ॥
षष्टिवर्षे तु संप्राप्ते ब्राह्मणः स्वयमाचरेत् ।
क्षत्रियोऽपि च वैश्यो वा शूद्रो वान्योऽथवा पुनः ॥
ब्राह्मणैः कारयेत्साधु शान्तिमेतां प्रयत्नतः ।
जन्मर्क्षे वानुकूलर्क्षे शान्तिं कुर्याद्विचक्षणः ॥
प्रधानदेवता तत्र साक्षान्मृत्युः प्रकीर्तितः ।
उग्रोऽधिदेवता तत्र जयः प्रत्यधिदेवता ॥

* * * *

य एतामाचरेदुग्ररथशान्तिं षडानन ।
शत्रवोऽस्य विनश्यन्ति सर्वदा सुखमेधते ॥

Colophon:

इति श्रीशैवागमे शिवषण्मुखसंवादे उग्ररथशान्तिकल्पः समाप्तः ॥

शैवागमानुसारेण प्रयोगोऽत्र विधीयते ।
सर्वलोकहितार्थाय सुलभः कथ्यते क्रमः ॥

रचनाक्रमः—

जन्मादिषष्टिवर्षप्रवेशे जन्मनक्षत्रेऽनुकूलनक्षत्रे शुभदिवसे कर्ता पत्न्या सह मङ्गलस्नानं कृत्वा ।

End:

परितस्सागराश्शैलाः तीर्थानि जलदाश्च ये ।
एतास्त्वामभिषिञ्चन्तु धर्मकर्म(कामा)र्थसिद्धये ॥
य एतामाचरेदुग्ररथशान्तिं षडानन ।
शत्रवोऽस्य विनश्यन्ति सर्वदा सुखमेधते ॥

Colophon:

इति श्रीशैवागमे शिवषण्मुखसंवादे उग्ररथशान्तिकल्पः प्रयोगश्च समाप्तः ॥

No. **14730.** सपिण्डीकरणविषयः.

SAPIṆḌĪKARAṆAVIṢAYAḤ.

Pages, 8. Lines, 6 on a page.

Begins on fol. 157*a* of the MS. described under No. 3496.
Incomplete.

A treatise dealing with the proper time and the procedure for the performance of the Sapiṇḍīkaraṇa ceremony.

Beginning:

अथ सपिण्डीकरणविषये पिण्डप्रदानादूर्ध्वं वैतरणीगोदानं पिण्डसंयोजनादूर्ध्वमत्र पितरो मादयध्वमित्येतस्मात्पूर्वमित्येके । पितुर्गोत्रस्य शर्मणो वसुरूपस्य प्रेतलोकात्पितृलोकं गच्छतो मध्ये वैतरणीनद्युत्तरणार्थं महावैतरणीसंज्ञकगोदानं करिष्ये इति सङ्कल्प्य ।

End:

द्वादशाहादिकालेषु साग्निकोऽनग्निकोऽपि वा ।
सपिण्डीकरणं कृत्वा पितृयज्ञं समाचरेत् ॥
सपिण्डं तु विना पुत्रः पितृयज्ञं समाचरेत् ।

* * *

द्वादशेऽह्नि संप्राप्ते यदि शुक्रदिनं भवेत् ।
श्वो भूते तत्र कुर्वीत कालेऽनन्तर एव वा ॥
द्वादशाहादि.

No. **14731.** रोगहरदानवचनानि.

RŌGAHARADĀNAVACANĀNI.

Pages, 5. Lines, 6 on a page.

Begins on fol. 161*a* of the MS. described under No. 3495.

Wants the beginning and the end.

Stanzas showing the nature and descriptions of the gifts to be made to Brahmans with a view to get one's self cured from certain kinds of diseases.

Beginning:

श्वासकासहरमूर्तिदानं कर्मविपाकसारे तल्लक्षणमुच्यते—

कासस्त्रिबाहुः पाशाक्षकमण्डलुयुतो ज्वलन् ।
श्वासः कूर्माङ्गसन्धानो दीर्घदण्डधरः कृशः ॥

करेण नादयन् घण्टां विवृताक्षो विभीषणः ।

End:

एवंविधपापाचरणादयं रोगस्सञ्जातः । एतन्निवृत्तये वक्ष्यमाणशूलदानम् । मन्त्रस्थितविशेषणविशेषं संस्मृत्य ब्राह्मणाय दद्यादित्यर्थः । एतच्च सर्वशूलसाधारणम् ॥

इति शूलहरत्रिशूलदानम् ॥

No. **14732.** समासचक्रम्.
SAMĀSACAKRAM.

Substance, palm-leaf. Size, $14\frac{1}{2} \times 1\frac{1}{4}$ inches. Pages, 5. Lines, 6 on a page. Character, Telugu. Condition, much injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Āpastambaśrautaprayōga 4*a*.

Incomplete.

Similar to the work described under R. No. 85(*a*) of the Triennial Catalogue of Sanskrit MSS., Vol. I, Part I-A.

This work is referred to under No. 1558 ante.

No. **14733.** आपस्तम्बश्रौतप्रयोगः.
ĀPASTAMBAŚRAUTAPRAYOGAḤ.

Pages, 37. Lines, 6 on a page.

Begins on fol. 4*a* of the MS. described under the previous number.

Contains the Sarvapṛṣṭhāptōryāma, Ukthya, Ṣōḍaśī and Jyōtiṣṭōma.

Imperfect and in disorder.

Same work as that described under No. 1084 ante.

No. **14734.** रघुवंशव्याख्या.
RAGHUVAṀŚAVYĀKHYĀ.

Substance, palm-leaf. Size, $16\frac{3}{8} \times 1\frac{1}{4}$ inches. Pages, 7. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol 1*a*. The other works herein are Āpastambaśrautaprayōga 5*a*, Taittirīyabrāhmaṇa 35*a*.

Contains the second Sarga incomplete.

Same work as that described under No. 11680 ante.

No. 14735. आपस्तम्बश्रौतप्रयोगः.
ĀPASTAMBAŚRAUTAPRAYŌGAḤ.

Pages, 56. Lines, 6 on a page.

Begins on fol. *5a* of the MS. described under the previous number.

Contains the Dviṣāhasraprastāra, Darśapūrṇamāsa and Agniṣṭōma.

Same work as that described under No. 1084 ante.

No. 14736. तैत्तिरीयब्राह्मणम्.
TAITTIRĪYABRĀHMAṆAM.

Pages, 5. Lines, 6 on a page.

Begins on fol. *35a* of the MS. described under No. 14734.

Wants the beginning and the end in the first Praśna in Kāṭhaka.

Same work as that described under No. 142 ante.

No. 14737. नामलिङ्गानुशासनव्याख्यानम्—टीकासर्वस्वम्.
NĀMALIṄGĀNUŚĀSANAVYĀKHYĀNAM: TĪKĀSARVASVAM.

Substance, palm-leaf. Size, $13\frac{3}{4} \times 1\frac{1}{4}$ inches. Pages, 343. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, old.

Contains from the Siṁhādivarga of the second Kāṇḍa to the end of the third Kāṇḍa.

Same work as that described under No. 1689 ante.

No. 14738. जातिसाङ्कर्यनिरूपणम्.
JĀTISĀṄKARYANIRŪPAṆAM.

Pages, 5. Lines, 6 on a page.

Begins on fol. *121a* of the MS. described under No. 3958.

Incomplete.

Similar to the work described under No. 4318 ante.

Beginning :

सङ्करश्च परस्परात्यन्ताभावसमानाधिकरणयोरेकत्र समावेशः ।

अत्र परस्पराभावसमानाधिकरणयोरित्यनेन स्वाभाववद्वृत्तिधर्माभाववद्वृत्तित्वं स्वस्य लभ्यते ।

* * * *

एतादृशसाङ्कर्यं भूतत्वमूर्तत्वयोरुभयोर्जाति(त्वे)बाधकमिति प्राचां मतम् ।

End:

तादृशसंबन्धावच्छिन्नवृत्तित्वं स्वनिष्ठं सङ्करत्वमिति न कोऽपि दोषः ॥ वस्तुतस्तु.

No. **14739.** कर्मत्वविचारः.

KARMATVAVICĀRAḤ.

Pages, 2. Lines, 8 on a page.

Begins on fol. 124*a* of the MS. described under No. 3958.

Incomplete.

An investigation of the nature of the notion conveyed by the accusative case having reference to the immediate object of an act.

Beginning:

कर्तुरीप्सिततमं कर्म । आप्नोतेरसन्नन्तान्मतिबुद्धीत्यादिना वर्तमाने क्त-प्रत्ययः । स च तयोरेवेति नियमात् कर्मणि भवति । कर्मत्वं चेह विषयता । सविषयकधात्वर्थयोगे कर्मत्वं विषयता भवतीति न्यायात् ।

* * * *

वर्तमानत्वस्याविवक्षैव कटं कृतवानित्यादिप्रयोगान्यथानुपपत्त्या वर्त-मानत्वस्येहाविवक्षा । इदं च प्राचामनुरोधेन ।

End:

एतेन क्रियाजन्यफलवत्त्वं कर्मत्वमित्युक्तिः परास्ता । ग्रामसंयोगानुकूल-क्रियाप्रागभावक्षणे ग्रामं गच्छतीत्यादिप्रयोगस्य इष्टत्वाच्चेति दिक्

No. **14740.** उत्तरगीता.

UTTARAGĪTA.

Pages, 14. Lines, 9 on a page.

Begins on fol. 31*a* of the MS. described under No. 2012.

Contains the Adhyāyas one to three complete, but wants the beginning in the first Adhyāya.

Same work as that described under No. 2371 ante.

No. **14741.** पञ्चाक्षरीमन्त्रजपः.

PAÑCĀKṢARĪMANTRAJAPAḤ.

Pages, 2. Lines, 9 on a page.

Begins on fol. 38*a* of the MS. described under No. 2012.

Almost complete.

Similar to the work described under No. 7393 ante.

Beginning:

शुक्लाम्ब + ये ॥ गुरुर्ब्रह्मा + गुरवे नमः ॥

अखण्डमण्डला + गुरवे नमः ॥ अज्ञानतिमिरा + गुरवे नमः ॥

ममोपात्तसमस्तदुरितक्षयद्वारा साम्बसदाशिवप्रसादसिद्ध्यर्थं शुद्धपञ्चाक्षरीमहामन्त्रजपं करिष्ये ।

End:

जपान्ते हृदयादिन्यासः । दिग्विमोकः ध्यानं पूर्ववत् । लमित्यादि पञ्चपूजा ॥

No. **14742.** अर्घ्यवचनानि.

ARGHYAVACANĀNI.

Pages, 2. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 861.

Wants the beginning and the end.

On the rules pertaining to the offering of Arghya in connection with the performance of the Sandhyāvandana.

Beginning:

उपविश्य तु सायाह्ने जलेष्वर्घ्यं न निक्षिपेत् ।
निक्षिपेद्यदि मूढात्मा रौरवं नरकं व्रजेत् ॥
द्वौ पादौ संपुटीकृत्य पूरयेदुदकाञ्जलिम् ।
गोशृङ्गमात्रमुद्धृत्य जलमध्ये जलं क्षिपेत् ॥

End:

अञ्जलिं भ्रूमध्यपर्यन्तमुद्धृत्य जले अर्घ्यं दद्यात् । सायं सन्ध्यायामुपविश्य जलाद्बहिरुदकं दद्यात् ॥

Fol. 1*b* contains a portion of Uccōdarkī.

No. **14743.** सप्तलक्षणसंज्ञादिनिरूपणम्.

SAPTALAKṢAṆASAṀJÑĀDINIRŪPAṆAM.

Page, 24. Lines, 5 on a page.

Begins on fol. 2*a* of the MS. described under No. 861.

Complete.

A treatise in Vēdic literature dealing with the following subjects :—

१. सप्तलक्षणसंज्ञा.
२. द्वित्वलक्षणम्.
३. अनुस्वारप्राप्तिः.
४. ज्योतिश्शिक्षा.
५. तकारस्य दत्वप्राप्तिः.
६. त्रिष्टुबनुष्टुप्परिष्कारः.
७. गर्भोदात्तलक्षणम्.
८. घत्वखत्वप्राप्तिः.
९. स्वरभक्तिः
१०. अग्निकाण्डत्रयपञ्चाशत्संज्ञा.
११. याज्यापुरोऽनुवाक्यासंज्ञा.
१२. थकारसूत्रम्.
१३. संयुतासंयुतवर्णवचनम्.
१४. रेखासु उदात्तादिस्थानसंज्ञा.
१५. त्रिक्रमलक्षणम्.
१६. अप्लुतपदानि.

Beginning :

उभादित्योऽग्निर्वृत्राणि पर्यन्तान्त्यानुवाककाः ।
यविगव्यक्तियाज्या स्युः युक्ष्वेत्यन्वाकसंयुताः ॥
काण्डेषु सप्तस्वेतेषु अन्त्यान्वाकाश्च ये स्मृताः ।

End :

हौषां पूर्वं मकारस्तु सहस्रां पूर्वतस्तमीम् ।
यद्विकर्णी यद्विकर्णी इन्द्रस्य तनुवं प्रियाम् ॥
करोतु तामभीमां च मयि दक्षक्रतू तथा ।
स्विन्नस्स्नात्वीति नवकं न प्लुताः परिकीर्तिताः ॥

No. **14744.** प्लुतशिक्षा.

PLUTAŚIKṢĀ.

Pages, 2. Lines, 5 on a page.

Begins on fol. 15*a* of the MS. described under No. 861.

Complete.

A treatise indicating the place where the vowel is to be repeated with three or four Mātras in the Taittirīya-Saṁhitā.

Beginning :

बृहस्पतिसुतस्याग्निहोत्रं जुहोति स३श्रवा ह्वे ह्वे । मित्रोऽसि सप्त प्रथमत्वष्टा ब्रह्मवादिनो विचित्यः पर्यग्निर्ह्वे ह्वे ।

End :

हौषां पूर्वं मकारस्तु सहस्रां पूर्वतस्तमीम् ।
यद्विकर्णी यद्विकर्णी चत्वारिंशत्प्लुताः स्मृताः ॥

इति प्लुतविचारः ।

करोतु तामभीमां च इन्द्रस्य तनुवं प्रियाम् ।
मयि दक्षक्रतू स्विन्न स्नात्वी न प्लुतसंज्ञिकाः ॥

Colophon:

प्लुतप्रकरणं समाप्तम् ॥

No. 14745. पूर्वोत्तरोभयदीर्घी.
PŪRVŌTTARŌBHAYADĪRGHĪ.

Pages, 4. Lines, 5 on a page.

Begins on fol. 16*a* of the MS. described under No. 861.

Complete.

Same work as that described under No. 926 ante, but with one additional stanza as given below:—

पुनश्श्लोकरूपेण स्पष्टीकरोति—

यथायतनात्पराह(स्यात्)दक्षिणावृत इत्यपि ।
यथायतनमित्येते दीर्घोभयचतुष्टयम् ॥

No. 14746. यणादेशदीर्घी.
YAṆĀDĒŚADĪRGHĪ.

Pages, 2. Lines, 5 on a page

Begins on fol. 18*a* of the MS. described under No. 861.

Complete.

A treatise in Vēdic grammar showing the words that should end with a long vowel when giving the separate words after removing the Sandhi in certain cases.

Beginning:

यणादेशदीघा ।

पृथिव्याङ्गिरसी वस्वी स्वस्त्ययन्युर्वशी तथा ।
ऊर्ती मधुमती कर्णकावती भाग्यवानिति ॥
वाजीन्द्रियावी तेजस्वी सूनरी च समावती ।
देवी हविष्मती ग्रामी अवित्री ब्रह्मवर्चसी ॥

End:

यणादेशनिषेधवाक्यानि ।

देव्यदिते सरस्वत्या वदन्त्याग्रेयमित्यपि ।
यान्येव च पृथिव्याशा आजन्त्यर्चय इत्यपि ॥

No. 14747. त्वन्ताद्यनुक्रमणिका.
TVANTĀDYANUKRAMAṆIKĀ.

Pages, 4. Lines, 5 on a page.

Begins on fol 18*b* of the MS. described under No. 861.

Complete.

An index of words end ng with त्व in the Taittirīya Saṁhitā.

Beginning:

उपगन्तन चनस्सर्वेवीरानग्राविष्णू मह्यप्रतीत्तं मन्यासै पूर्वं परं च स-न्त्वा नह्यामि ।

* * * *

देवस्याददेऽश्रिः परिलिखितं समिधो देवस्य ।

End:

प्रजवमन्वायन्नन्नादो द्वे बृहस्पतिर्येन येनैते प्रजापतिस्त्रयोविंशतिः ॥

No. 14748. वर्णक्रमलक्षणम्.
VARṆAKRAMALAKṢAṆAM.

Pages, 10. Lines, 5 on a page.

Begins on fol. 39*a* of the MS. described under No. 861.

Complete.

Gives the successive letters as found in the Taittirīya Saṁhitā as a help for proper pronunciation and accurate repetition.

Beginning:

स्वराद्द्वित्वमवाप्नोति व्यञ्जनं व्यञ्जने परे ।
स्पर्शो ळकारपूर्वो यो वपूर्वश्च द्विरुच्यते ॥

देव्या धिया । कुल्पां जुहोति ।

स्वरपूर्वस्य रेफस्य परस्ताद्व्यञ्जनस्थितम् ।
आपद्यते द्विवर्णं तद्वर्णमात्रे परे सति ॥ प्रार्षयतु । अर्च्येण ।

End:

ह्रस्वसंयोगयोर्मध्ये योऽनुस्वारः प्रकीर्तितः ।
स एव द्वित्वमाप्नोति तदन्यो न द्विरुच्यते ॥

Colophon:

वर्णक्रमलक्षणं समाप्तम् ॥

No. 14749. प्लुतशिक्षा.

PLUTAŚIKṢĀ.

Page, 1. Lines, 5 on a page.

Begins on fol. 43*b* of the MS. described under No. 861.

Complete.

Same work as that described under No. 14744 ante.

Colophon:

प्लुतशिक्षा समाप्ता ॥

Foll. 43*b* and 44*a* contain the Svaraviṣaya and Trikrama.

No. 14750. लक्षणानुक्रमणिका.

LAKṢAṆĀNUKRAMAṆIKĀ.

Pages, 3. Lines, 5 on a page.

Begins on fol. 44*b* of the MS. described under No. 861.

Wants the beginning and the end.

Same work as that described under No. 967 ante

Foll. 45*b* and 46 give the contents of the Prapāṭhakas in seven Kāṇḍas of the Kṛṣṇa-Yajurvēda.

No. 14751. कपर्दिकारिका.

KAPARDIKĀRIKĀ.

Pages, 4. Lines, 8 on a page

Begins on fol. 65*a* of the MS. described under No. 3487.

Incomplete.

For description and extracts see pages 11 and 166 of M. Seshagiri Sastri's Report on a Search for Sanskrit and Tamil MSS., for the year 1893-94, No. 2.

No. 14752. प्राग्वंशवेदिलक्षणम्.

PRĀGVAṀŚAVĒDILAKṢAṆAM.

Page, 1. Lines, 8 on a page.

Begins on fol. 67*a* of the MS. described under No. 3487.

Complete.

Gives the description and dimensions of the Prāgvaṁśa and Vēdi in sacrificial halls.

Beginning:

अङ्गुल्या सार्धविंशत्या भ्रमयेद्गार्हपत्यकम् ।
निधाय तत्पुरश्शङ्कुं ततोऽष्टप्रक्रमात्परम् ॥

शम्यामात्रेण चाथाहवनीयं कल्पयेत्ततः ।
गार्हपत्याहवनीयमध्यसूत्रन्तु पञ्चधा ॥
षट्धा वेत्यादिसूत्रेण दक्षिणाग्नेश्च कल्पनम् ।

End:

दार्शिकीवत्ततः कुर्यात् श्रोण्यंसौ नमनं तथा ।
एवं प्राग्वंशवेदेस्तु लक्षणं परिकीर्तितम् ॥

No. **14753.** ज्यौतिषविषयः.
JYAUTIṢAVIṢAYAḤ.

Pages, 3. Lines, 8 on a page.

Begins on fol. 68*a* of the MS. described under No. 3457.

Contains the Saptagrahamālikāyōga, Samasaptakayōga and Saṅkrāntipuruṣalakṣaṇa.

Similar to the work described under No. 13754 ante.

Beginning:

अयनफलम्—

उदगयनेऽर्कग्रहणं भवति यदि वा शशाङ्कस्य ।
द्विजजनपशुनाशो भवति इतरेषां दक्षिणे त्वयने ॥

अथ मालिकायोगः—

ज्येष्ठशुद्ध ११ मेषादितुलान्तं सप्तग्रहमालिकायोगः ।

End:

लम्बकर्णं रक्तदन्तं लम्बभ्रूदीर्घनासिकम् ।
अष्टबाहुद्विपादं च विकृतं कृष्णवर्णकम् ॥
शतयोजनमौन्नत्यं विस्तारे रवियोजनम् ।
एवंरूपं सुविज्ञेयं सङ्क्रान्तिपुरुषलक्षणम् ॥

* * * *

सुवृष्टिस्सर्वदेशानां सवसस्यसमृद्धयः ।
संपूर्णतृणवृद्धिः स्यात् बलश्रेत्स्थाननायके ॥

No. **14754.** अष्टाङ्गयागः.
AṢṬĀṄGAYĀGAḤ.

Page, 1. Lines, 5 on a page.

Begins on fol. 120*b* of the MS. described under No. 4898.

Describes the eight limbs of the Yāga or the Ijyā which consists in the conduct of the daily worship of God Viṣṇu.

Beginning and **End** :

अन्तःकरणयागादि यावदात्मनिवेदनम्
तथाद्यमङ्गं यागस्य नाम्नाभिगमनं महत् ॥
पूजनं चार्घ्यपुष्पाद्यैर्भोगैर्यदखिलं मुने ।
बाह्योपचारैस्तद्विद्धि भोगसंज्ञं तु नारद ॥
मध्वाज्याक्तेन दध्ना वै पूजा च पशुना सह ।
तत् तृतीयं हि यागाङ्गं तुर्यमन्नेन पूजनम् ॥
निवेदितस्य यद्दानं पूर्वोक्तविधिना मुने ।
संप्रदान तु तन्नाम यागाङ्गं पञ्चमं स्मृतम् ॥
वह्निसन्तर्पणं षष्ठं पितृयागन्तु सप्तमम् ।
प्राणाग्निहवनं नाम्ना त्वनुयागं तदष्टमम् ॥

Colophon :

इति अष्टाङ्गयागः ॥

No. **14755.** शिवपूजाविधिः.

ŚIVAPŪJĀVIDHIḤ.

Page, 1. Lines, 12 on a page.

Begins on fol. 14*a* of the MS. described under No. 8198.

Wants the beginning; otherwise complete.

Similar to the work described under No 5510 ante.

Beginning :

शिवाय नमः ।

गन्धाढ्यं पावकोपेतं वनस्पतिसमुद्भवम् ।
धूम्राक्षाज्याहुतं धूपं सङ्गृहाण स्मरान्तक ॥

End :

धात्रीफलप्रदानाच्च धात्रीदानफलं लभेत् ।
अस्माद्दस्य प्रदानेन अतश्शान्तिं प्रयच्छ मे ॥

Colophon :

इत्यर्चनविधिस्समाप्तः ॥

No. **14756.** दायभागविषयः.

DĀYABHĀGAVIṢAYAḤ.

Size, 8 × 1 inches. Pages, 9. Lines, 8 on a page. Character, Telugu.

Begins on fol. 22*a* of the MS. described under No. 8198.

Incomplete.

Similar to the work described under No. 14345 ante.

Beginning:

मनुः पुत्रेभ्यो दायं व्यभजदित्यविशेषेण श्रूयत इति तस्माद्विषमो भागश्शास्त्रदृष्टोऽपि [वि]लोकविरोधाच्छ्रुतिविरोधाच्च नानुष्ठेय इति सममेव विभजेरन्निति नियम्यते। मातापित्रोर्धनं सुता विभजेरन्नित्युक्तम् मातृधनेऽपवादमाह — मातुर्दुहितरश्शेषमृणात् मातुर्धनं दुहितरो विभजेरन्। ऋणाच्छेषं मातृकृतऋणापकरणावशिष्टम्।

End:

अत्र कश्चिद्रिक्थप्राप्तिमाह —

यत्किञ्चित्पितरि प्रेते धनं ज्येष्ठोऽधिगच्छति।

भागो यवीयसां तत्र यदि विद्यानु.

No. **14757.** वैद्यविषयवचनानि.

VAIDYAVIṢAYAVACANĀNI.

Size, 8 × 1 inches. Pages, 2 Lines, 8 on a page.

Begins on fol. 27*a* of the MS. described under No. 8198.

Wants the beginning and the end.

Similar to the work described under No. 13227 ante.

Beginning:

सुसाध्यसत्त्वमांसानि वयोबलवति व्रणः।

व्रणाद्द्विधा निजागन्तुः दुष्टशुद्धिविभेदतः॥

निजो दोषैश्शरीरोत्थरागन्तुर्बाह्यदोषजः।

सुवृत्तत्वं विवृत्तत्वं काठिन्य(न्यं)मृदुना(ता)पि वा॥

End:

पुत्रजीवोत्थितां मज्जां गोक्षीरे निष्कमात्रकम्।

पीता चोग्रकरं हन्यात् नानायोगकृतं विषम्॥

एलातालिशपत्राणि पू.

No **14758.** आनन्दसंहिता.

ĀNANDASAṀHITĀ.

Substance, palm-leaf. Size, 9 × 1¼ inches. Pages, 154. Lines, 6 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other works herein are Ādisaṁhitā 78*a*, Vikhanasōpaniṣad 132*b*, Vikhanasāṣṭaka 135*a*.

Contains the Adhyāyas 1 to 20.

A Saṁhitā of the Vaikhānasāgama dealing with the following subjects :—

१. विष्णुपारम्यत्रिविधार्चनम्.
२. शाखानुक्रमणकथनम्.
३. विष्णुमुख्यावतारकथनम्.
४. वैखानसगर्भचक्राङ्कननिरूपणम्.
५. अवैखानसपूजानिषेधः
६. सूत्रगणनाप्रकरणम्.
७. शङ्खचक्रप्रतिष्ठाविधिः.
८. चक्राङ्कनभेदनिर्णयः.
९. त्रिविधचक्राङ्कनाधिकारनिर्णयः
१०. गर्भचक्रविधिः
११. न्यासतप्तचक्रविधानम्.
१२. ऊर्ध्वपुण्ड्रादिसंस्कारचतुष्टयविधानम्.
१३. वैखानसमहिमानुवर्णनम्.
१४. वैदिकतान्त्रिकार्चनक्रमः.
१५. वैखानसादिसृष्टिक्रमः.
१६. वैखानसभूमिप्रवेशः.
१७. भगवदाराधनविधिः.
१८. हरिवैखानससंवादः.
१९. वैखानसमाहात्म्यम्.
२०. वैखानसाष्टोत्तरम्.

Beginning :

शुक्लाम्बरधरं (. . .) शान्तये ॥
श्रुतिस्मृतिनदीपूर्णं शास्त्रकल्लोलसङ्कुलम् ।
विष्णुभक्त्युदकं शुद्धं वन्दे विखनसार्णवम् ॥
श्रीलक्ष्मीवल्लभारम्भां विखनोमुनिमध्यमाम् ।
अस्मदाचार्यपर्यन्तां वन्दे गुरुपरम्पराम् ॥
मरीचिं मुनिर्लोकेशं ब्रह्मणश्चाक्षुषं सुतम् ।
भेदज्ञं[1] जीवपरयोश्शिष्यं विखनसः प्रभोः ॥
अभिगम्य महात्मानं मुनयस्सुव्रतादयः ।
प्रणिपत्य यथान्यायमिदं वचनमब्रवीत् ॥

* * * *

विष्णुपारम्यम् ।

नारायणः परं ब्रह्म परमात्मा परोऽव्ययः ।
नारायणः पर इति श्रुतिराह सनातनी ॥

[1] वेदज्ञम्—इति पाठान्तरम्.

अग्निर्देवावमो विष्णुः परमश्च तदन्तरे ।
स ब्रह्मा स शिवस्सेन्द्रस्सोऽक्षरः परमस्स्वराट् ॥

* * * *

नित्यहोमोत्सवान्तं च प्रायश्चित्तक्रियाक्रमम् ।
तत्परार्थार्चनं प्रोक्तं सर्वलोकाभिवृद्धिदम् ॥

Colophon :

इति श्रीवैखानसे मरीचिप्रोक्ते आनन्दसंहितायां प्रथमोऽध्यायः ॥

End :

इत्येवं श्रीविखनसो नाम्नामष्टोत्तरं शतम् ।
यात्राकाले विशेषे च ज्ञानाज्ञानकृतेऽपि च ॥
स्नानेषु सर्वकालेषु सूर्यचन्द्रोपरागके ।
प्रयाणे भोजने तल्पे विद्यारम्भे महोत्सवे ॥
त्रिसन्ध्यायां(न्ध्यं यः) पठ(ठे)न्नित्यं सर्वत्र विजयी भवेत् ।

Colophon :

इति श्रीवैखानसे मरीचिप्रोक्ते आनन्दसंहितायां श्रीविखनसाष्टोत्तर-शतनामावलिर्नाम विंशोऽध्यायः ॥

No. 14759. आदिसंहिता.
ĀDISAṀHITĀ.

Pages, 109. Lines, 6 on a page.

Begins on fol. 78*a* of the MS. described under the previous number. Contains the Adhyāyas 1—16.

A work on the Vaikhānasāgama. The subjects dealt with herein are apparent from the headings of the Adhyāyas given below :—

१ शाखानुक्रमणम्.
२. गोत्रानुक्रमणम्
३. शास्त्रानुक्रमणम्.
४. सूत्रानुक्रमणम्.
५. याज्ञवल्क्योद्भवः.
६. याज्ञवल्क्यप्रभावः.
७. व्यासावतारकथनम्.
८. याज्ञवल्क्यवैवाहिकः.
९. मूलवेदाध्ययनविधिः.
१० वाजसनेयतैत्तिरीययजुर्वेदाध्ययनविधिः.
११ विखनसोत्पत्तिकथनम्.
१२. पितृपूजाविधिः.
१३. विशिष्टाद्वैतधर्मशास्त्रोपदेशनम्.
१४. भगवद्दास्यकरणार्हानर्हविवरणम्.

१५. अशक्तविमानध्रुवबेरप्रमाणविवरणम्.

१६. पञ्चकालपूजाविधानादिविवरणम्.

Beginning:

श्रीनिवासपदद्वन्द्वचिन्तनात्तमनोरथम् ।
मरीचिमभिवाद्यैवं पृच्छन्ति सनकादयः ॥
भगवन् सर्वधर्मज्ञ सर्वशास्त्रविशारद ।
भेदस्य वेदशाखानां मुख्यहेतुं वद प्रभो ॥
वेदप्रमाणतत्त्वज्ञ किं गोत्रं वर्णमेव वा ।
नामधेयं किं वदन्ति वेदजन्म कथं भवेत् ॥

* * * *

Colophon:

इति श्रीवैखानसे मरीचिप्रोक्ते आदिसंहितायां शाखानुक्रमणो(णं) नाम प्रथमोऽध्यायः ॥

End:

संपूज्याभरणं दत्वा तेषां पादोदकं पिबेत् ।
अनुमान्य प्रणम्याथ तत्तत्कर्माणि योजयेत् ॥
सर्वेषां कर्मणामादौ गुरुपादोदकं पिबेत् ।
सर्वेषां कर्मणामन्ते हरिपादोदकं पिबेत् ॥

Colophon:

इति श्रीवैखानसे मरीचिप्रोक्तायामादिसंहितायां पञ्चकालपूजाविधानाचार्यादिऋत्विग्वरणविवरणं नाम षोडशोऽध्यायः ॥

No. 14760. विखनसोपनिषद्.
VIKHANASŌPANIṢAD.

Pages, 5. Lines, 6 on a page.

Begins on fol. 152*b* of the MS. described under No. 14758.

Complete.

A hymn in praise of Vikhanas, the founder of the Vaikhānasa sect of Śrī-Vaiṣṇavas.

Beginning:

अथ विखनसो(हवा उ)पनिषदोऽकामयत । प्रजास्सृजेयेति । नारायणाद्ब्रह्मा जायते । ब्रह्मणः स्पृष्टो(ष्टिः) जायते । स्पृष्टि(ष्टे)र्विच्छिन्नो जायते । ब्रह्मणा सन्देहो भवति ।

* * * *

विशेषखननाद्विखनसो भवति । साक्षाद्भगवदनुग्रहं भवति ।

End:

य एवं वेदोपब्रह्मोपनिषत् । सुदर्शनपाञ्चजन्यमाहवनीयाभ्यां पायसचरु-मभ्युज्य भोजने हृदये सुदर्शनाय(चक्र)राजाय स्वाहेति प्राश्नीयात् । तप्ताङ्कितो भवति । गर्भविष्णुर्भवति । उदरमभिमृशेत् । यस्य मे श्रियो दातुमिदं गर्भ एव करे चक्रं धारयामि, स चक्रवर्ती भवति । इति श्रुतिः । ओं शान्तिश्शान्तिश्शान्तिः ॥

No. **14761.** विखनसाष्टकम्.

VIKHANASĀṢṬAKAM.

Pages, 2. Lines, 6 on a page.

Begins on fol. 135*a* of the MS. described under No 14758

Complete.

A eulogy in eight stanzas addressed to the sage Vikhanas

Beginning:

नारायणाङ्घ्रिजलद(ज)द्वयसक्तचित्तं श्रुत्यर्थसंपदनुकम्पितचारुकीर्तिम् ।
वाल्मीकिमुख्यमुनिभिः कृतवन्दनाढ्यं शान्तं सदा विखनसं मुनिमा-
[श्रयामि ॥

End:

एवं परं विखनसाष्टकमात्मना ये शृण्वन्ति चात्मनि पठन्ति महादरेण ।
तान्मुक्तदोषनिचयानपवर्गयोग्यान् स प्रीत आशु तनुया(त्) कमलासुपुत्रः ॥

Colophon:

विखनसाष्टकं संपूर्णम् ॥

No. **14762.** श्यामलादण्डकः.

ŚYAMALĀDAṆḌAKAḤ.

Substance, palm-leaf. Size, 6 × 1¾ inches. Pages, 16. Lines, 6 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Telugupadyālu 9*a*.

Complete.

Same work as that described under No. 10837 ante.

No. **14763.** शमानसन्धिः.

ŚAMĀNASANDHIḤ.

Pages, 7. Lines, 6 on a page.

Begins on fol. 28*a* of the MS described under No. 913.

Complete.

Same work as that described under No. 979 ante.

No. 14764. त्रिक्रमलक्षणम्.

TRIKRAMALAKṢAṆAM.

Pages, 2. Lines, 6 on a page.

Begins on fol. 31*b* of the MS. described under No. 913.

Complete.

Same work as that described under No. 911 ante.

No. 14765. योहिलक्षणम्.

YŌHILAKṢAṆAM.

Pages, 2. Lines, 6 on a page.

Begins on fol. 32*a* of the MS. described under No. 913.

Incomplete.

Same work as that described under No. 950 ante.

No. 14766. महान्यासपूजाविधिः.

MAHĀNYĀSAPŪJĀVIDHIḤ.

Pages, 66. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 159.

Complete.

Same work as that described under No 8672 ante, wherein see for the beginning.

End:

अग्निर्वायुस्सूर्यश्चन्द्रमा दिश आपः पृथिव्योषधिवनस्पतयः इन्द्रः पर्जन्य ईशान आत्मा पुनर्मे ।

एवं यः कुरुते नित्यं सर्वपापैः प्रमुच्यते ।
सर्वान् कामानवाप्नोति शिवसायुज्यमाप्नुयात् ॥

इमां रुद्राय—त्वमग्ने रुद्र आ वो राजानम् ॥

Written on Tuesday, the 12th day in the bright fortnight of Kārttika in the year Parīdhāvin.

No. 14767. ज्यौतिषविषयः, आन्ध्रटीकासहितः.

JYAUTIṢAVIṢAYAḤ WITH TELUGU MEANING.

Pages, 4. Lines, 7 on a page.

Begins on fol. 7*b* of the MS. described under No. 13556.

Wants the beginning and the end.

The subjects dealt with herein are—

१. गर्भाधानम्. | ३. यानम्.
२. मघवोट्टम्. | ४. राहुमार्गः.

Similar to the work described under No. 13758 ante.

Beginning:

यानं खट्वं च पीठं च अनु(नडु)हन्तुरङ्गग्रहम् ।
गीतं नृत्यं च वाद्यं च यदि वा जायते ध्रुवम् ॥

मघवोट्टम् ।

पितृब्रह्मा च देवाश्च राक्षसानां यथाक्रमम् ।
पितृभे संचरेदिन्दोरान्यासं वृद्धिगो भवेत् ॥

End:

पिशुनश्चपलो दुष्टः पापकर्मा निराकृतिः ।
परेषां व्यसनं चैव चोरस्तु प्रथमांशके ॥

No. **14768.** वेधाफलम् , आन्ध्रटीकासहितम्.

VĒDHĀPHALAM WITH TELUGU MEANING.

Pages, 6. Lines, 7 on a page.

Begins on fol. 2a of the MS. described under No. 13556.

Complete.

A treatise in astrology dealing with the evils arising from the performance of anything during certain inauspicious periods of time called Vēdhā of each of the nine planets.

Beginning:

अथ वेधाफलानि लिख्यन्ते ।

रणज्वराग्निवेधाश्च वातपित्तादिविभ्रमम् ।
अर्कवेधामनस्तापं राजमन्त्रीविरोधनः ॥
शीतज्वरादिरोगं च प्राणघातं न संशयः ।
बहुदुःखमवाप्नोति भीतिकष्टं चतुष्पदैः ॥

End:

गुरोस्सर्वार्थसिद्धिं च राजानुग्रहशान्तयः ।
शुभग्रहयुते जीवे मरणव्याधिपीडनम् ॥

* * * *

मन्त्राभिचारनिरता देवपूज्यगुरुस्मृतः ।
कविस्तस्य सुखं सर्वजनसर्वफलप्रदः ॥

No. 14769. लत्तानिरूपणम्, आन्ध्रटीकासहितम्.

LATTĀNIRŪPAṆAM WITH TELUGU MEANING.

Pages, 5. Lines, 7 on a page.

Begins on fol. 30b of the MS. described under No. 13556.

Wants the beginning and the end.

Similar to the above.

Beginning:

सूर्यादिपञ्चममृक्षं वनङ्गे विद्युतोपमम् ।
सप्तमं भूमिकम्पं च अष्टमं शूलमुच्यते ॥
* * * *
. . . . शनिराहुकुजेषु च ।
मरणं जीवलत्ता च बन्धुनाशो भयप्रदम् ॥

End:

लत्तायामर्थहानिः स्याच्चन्द्रे राहौ विनाशकृत् ।
* * * *
कुजस्य युग्मसौम्यस्य सौम्ये च गुरुपञ्चमम्.

No. 14770. माणवकप्रायश्चित्तप्रयोगः.

MĀṆAVAKAPRĀYAŚCITTAPRAYŌGAḤ.

Pages, 8. Lines, 5 on a page.

Begins on fol. 22a of the MS. described under No. 1102.

Incomplete.

Similar to the work described under No. 3842 ante.

Beginning:

अशेषे हे परिषत् मदीयां विज्ञापनां (समाकर्ण्य) मया समर्पितामिमां परिषद्दक्षिणां स्वीकृत्य ममोपनयनपर्य(प्रभृ)त्येतत्क्षणपर्यन्तं गुरुकुलवासगुरुशुश्रूषणभिक्षाचरणसमिदाच(ह)रणवेदाध्ययनकालसन्ध्यावन्दनादिमौञ्जीकृष्णाजिनदण्डधारणा (द्यकरणा) कालस्वापनायुक्तभक्षणादिसताल (सकलपा) पानां प्रायश्चित्तं निर्णीय ।

End:

या ते धामानि हविषा यजन्ति ता ते विश्वा परिभूरस्तु यज्ञं गयस्फानः प्रतरणः सुवीरो वीरः प्रचरा सोमधुर्यात् स्वाहा । सोमाय काण्डऋषय इदम्.

No 14771. श्रौतप्रयोगः.
ŚRAUTAPRAYŌGAḤ.

Pages, 16. Lines, 5 on a page.

Begins on fol. 26*a* of the MS. described under No. 1102.
Wants the beginning and the end.
Similar to the work described under No. 1054 ante.

Beginning:

अग्निर्मूर्धा दिवः ककुत्पतिः (. . .) जिन्वतोम् । ये यजामहे अग्निं भुवो यज्ञस्य (. . .) हव्यवाहोम्---वौ ।

End:

स्तोमेन रथन्तरेण साम्ना गायत्रेण छन्दसा अग्निष्टोमेन यज्ञेन वषट्कारेण वज्रेण योऽस्मान्

* * * *

गार्हपत्यात् द्विगुणं प्राक्पाशं निधायोपरिष्टात्स्वाहा.

No. 14772. नृसिंहमङ्गलाशासनम्.
NṚSIṀHAMAṄGALĀŚĀSANAM.

Pages, 2. Lines, 5 on a page.

Begins on fol. 24*a* of the MS. described under No. 1102.
Incomplete.
Same work as that described under No. 10094 ante.

No. 14773. तोळप्पवंशावलिः.
TŌḶAPPAVAṀŚĀVALIḤ.

Pages, 2. Lines, 7 on a page.

Begins on fol. 56*a* of the MS described under No. 2643.
Incomplete.
Describes the origin and genealogy in verse of Tōḷappar.

Beginning:

श्रीलक्ष्मीशपदाम्भोजं नत्वा सम्यग्गुरूनपि ।
वंश्यानां सुखबोधाय प्रोच्यते पुरुषक्रमः ॥
तपोनिधेर्वसिष्ठस्य वंशमुक्तामणिः स्वयम् ।
ऋक्छाखी कल्पशाखीव सुजनालिप्रमोदनः ॥
धा(तो)ळप्पदुग्धाब्धिशशी कूटस्थोऽपि ह्यकूटधीः ।
यस्तु लक्ष्मीलसद्गर्भशुक्तिमौक्तिकभासुरः ॥

नारायणार्यो वाग्मी च शेषवद्विष्णुसंश्रयः ।
गिर्यम्बानामयोषायाः भूषारत्नमिव प्रियः ॥
तस्य त्रिमूर्तय इव तनया विनयोज्वलाः ।

End:

कूटस्थस्य द्वितीयो यः सुतस्तिरुमलार्यकः ।
नाम्ना गौरी तस्य दाराः वर्णेन च विशेषतः ॥
तयोर्वंशकरौ द्वौ तु तनुजौ मनुजोत्तमौ ।
दासार्यः प्रथमस्तत्र विष्णोर्दासो निसर्गतः ॥
तस्य द्वितीया तिम्माम्बा.

No. **14774**. पश्चिमरङ्गमाहात्म्यम्.
PAŚCIMARAṄGAMĀHĀTMYAM.

Pages, 17. Lines, 8 on a page.

Begins on fol. 357*a* of the MS. described under No. 3722.

Contains the Adhyāyas one to five complete; but, as found in the Kṣētrakhaṇḍa of the Brahmāṇḍapurāṇa.

Wants the beginning.

On the greatness and religious sanctity of Śrīraṅgapatnam (Seringapatam) on the banks of the river Cauvery in the Mysore State, and of shrine therein dedicated to the worship of God Raṅganātha.

Beginning:

. . . . न्तशयनं महत् ।
स्थानं दिव्यमिति प्राहुः महात्मानस्तपोधनाः ॥
कावेर्याः प्रार्थितो यत्र शेते रङ्गेश्वरस्स्वयम् ।
तत्स्थानमार्षं (सं)प्राहुः पश्चिमं रङ्गमित्यपि ॥
पूर्वरङ्गे वसन्विष्णुस्स एव पुरुषोत्तमः ।
चतुर्दशयुगादूर्ध्वं गौतमेनादृतः पुनः ॥
सुव्यक्तं पश्चिमे रङ्गे प्रादुरासीत्ततो हरिः ।
तस्माद्रङ्गत्रयेष्वेतत् पश्चिमं रङ्गमिष्टदम् ॥

* * * *

Colophon:

इति श्रीब्रह्माण्डपुराणे पश्चिमरङ्गमाहात्म्ये ईश्वरनारदसंवादे प्रथमोऽध्यायः ॥

End:

मुने तवाख्यातमनन्तपुण्यदं परं पवित्रं परमेष्टदायकम् ।
इदं पुनः पश्चिमरङ्गवैभवं शृणोति यस्सोऽपि विमुच्यते भयात् ॥

Colophon:

इति श्रीब्रह्माण्डपुराणे क्षेत्रखण्डे पश्चिमरङ्गमाहात्म्ये ईश्वरनारदसंवादे पञ्चमोऽध्यायः ॥

No. 14775. रामकवचम्.
RĀMAKAVACAM.

Pages, 4. Lines, 8 on a page

Begins on fol. 366*a* of the MS. described under No. 3722.

Wants the beginning; otherwise complete.

Same work as that described under No. 7023 ante.

Fol. 368*a* contains a small portion in the end of the tenth Adhyāya of the Śrīraṅgamāhātmya.

No. 14776. ऋग्वेदानुक्रमणिका.
ṚGVĒDĀNUKRAMAṆIKĀ.

Pages, 34. Lines, 7 on a page

Begins on fol. 31*a* of the MS. described under No. 881.

Complete.

Same work as that described under No. 14083 ante, wherein see for the beginning.

End:

उत्थितं द्वैपदं जिज्यासत आरुषी जोषयन्तं त्वाविसर्गेण दस्युहन्तम मकृणोरु लोकं कल्पयतु पिंशतु सिञ्चतु दधातु ॥

Colophon:

चातुर्ज्ञानं समाप्तम् ॥

Fol. 37*b* contains the Vālakhilyānukramaṇika.

No. 14777. ऋग्वेदपरिभाषा.
ṚGVĒDAPARIBHĀṢĀ.

Pages, 5. Lines, 7 on a page.

Begins on fol. 48*a* of the MS. described under No. 881.

Complete.

Same work as that described under No. 886 ante, wherein see for the beginning.

End:

अथ ऋग्वेदाम्नाये शाकलके । अथ ऋग्वेदाम्नाये अथ प्रगाथास्त्रयः ॥

Colophon:

इति (ऋग्वेद)परिभाषा ॥

No. **14778.** **ऋग्वेदानुक्रमणिका.**

ṚGVĒDĀNUKRAMAṆIKĀ.

Pages, 49. Lines, 7 on a page.

Begins on fol. 50*b* of the MS. described under No. 881.

Complete.

Same work as that described under No 889 ante.

Colophon:

इति सर्वानुक्रमणिका समाप्ता ॥

Foll. 75*a*—76*a* contain the Ṛkchandōbhēdas with illustrations.

No. **14779.** **पदरत्नपरिभाषा.**

PADARATNAPARIBHĀṢĀ.

Pages, 2. Lines, 7 on a page.

Begins on fol. 76*a* of the MS. described under No. 881.

Complete.

Same work as that described under No. 14081 ante.

No. **14780.** **क्रमरत्नपरिभाषा.**

KRAMARATNAPARIBHĀṢĀ.

Pages, 5. Lines, 7 on a page.

Begins on fol. 76*b* of the MS. described under No. 881.

Complete.

Similar to the above with reference to Krama in the combination of two words, i.e., the first with the second, the second with the third, etc., in the course of the repetition of the Taittirīya-Saṁhitā on certain occasions.

Beginning:

गणनाथं नमस्कृत्य वक्ष्ये द्वादशलक्षणम् ।
कादीनां पञ्चवर्गाणां वर्णैराद्यतृतीयकैः ॥

अष्टौ वर्गा यरलवैः शसहैः द(ङ)नमैरिह ।

End:

इदं सप्ताक्षरमितं लक्षणन्तु पदादिभिः ।
कृतं विंशतिसङ्ख्याभिः गोपालेन मयाधुना ॥

Colophon:

इति सप्ताक्षरीपरिभाषा ॥

No. **14781.** ऋग्वेदसप्तसङ्ख्यानिरूपणम्.
ṚGVĒDASAPTASAṄKHYĀNIRUPAṆAM.

Pages, 96. Lines, 7 on a page.

Begins on fol. 79*a* of the MS. described under No. 881.

Complete

Same work as that described under No 14082 ante.

No. **14782.** ऋषिदेवताछन्दोविवरणम्.
ṚṢIDĒVATĀCHANDŌVIVARAṆAM.

Pages, 106. Lines, 7 on a page.

Begins on fol 127*a* of the MS. described under No. 881.

Complete

Gives the Ṛṣi (sage), the Dēvatā (presiding diety), the Chandas (metre) of the hymns of the Ṛgvēda.

Beginning:

अग्निं नव वैश्वामित्रो मधुच्छन्दा नाम ऋषिः, अग्निर्देवता, गायत्री छन्दः, अस्य सूक्तस्य विधानम्—

आग्नेयं सूक्तमाद्यं तु मुख्यब्राह्मणि संयुतम् ।
रायस्पोषकरं वश्यं जपाद्विप्रोऽर्थमाप्नुयात ॥

* * * *

Colophon:

इत्याद्यं मण्डलं समाप्तम् ॥

End:

संसमित् चतुष्कमाङ्गिरसः, संवनन ऋषिः संज्ञानं देवता, आद्या आग्नेय्यनुष्टुप्, तृतीया त्रिष्टुप् ॥

Colophon:

इति ऋषिदेवताछन्दोविवरणं समाप्तम् ॥

No. 14783. पञ्चसंस्कारविषयसङ्ग्रहः.
PAÑCASAṀSKĀRAVIṢAYASAṄGRAHAḤ.

Size, 12¾ × 1½ inches. Pages, 28. Lines, 7 on a page.

Begins on fol. 207*a* of the MS. described under No. 881.

Incomplete.

Similar to the work described under No. 3667 ante; but this is intended for the Mādhvas

Beginning:

साधुचातकमेघाय वेदपङ्कजभानवे ।
बोधचम्पकभूषाय वेदव्यासाय ते नमः ॥
अगण्यसुगुणाम्भोधिर्दोषगन्धविवर्जितम् ।
मुमु(क्षु)सेव्यं श्रीरङ्गपतिं नौमि रमाश्रयम् ॥
विघ्नवारणविध्वंसं सदभीष्टफलप्रदम् ।
ववन्दे योगनृहरिं यं देवाद्यभिपूजितम् ॥
तमहं श्रीमदानन्दतीर्थाचार्यं भजेऽनिशम् ।

* * * *

श्रुतिस्मृतिपुराणादीन् समालोक्य यथामति ।
पञ्चसंस्कारविषये सङ्ग्रहः क्रियते मया ॥
तत्रादौ पञ्चसंस्कारे श्रुतयस्समुदाहृताः ।

End:

स्कान्दे—

विष्णुचक्राङ्किता यत्र वसन्ति नरपुङ्गवाः ।
तद्देशोत्पन्नमात्रेण वैष्णवत्वं व्रजन्ति ते ॥ इति ॥

नारदीये—

चक्राङ्कितस्यासान्निध्ये यत्कर्म कुरुते नरः ।

No. 14784. पाद्मतन्त्रम्.
PĀDMATANTRAM.

Size, 12¾ × 1½ inches. Pages, 16. Lines, 7 on a page.

Begins on fol. 221*a* of the MS. described under No. 881.

Contains the Adhyāyas one to five in the Yōgapāda.

Same work as that described under No. 5293 ante.

Fol. 229 gives the Daśāntardaśāphalam.

No. 14785. कालामृतम्.
KĀLĀMṚTAM.

Substance, palm-leaf. Size, 13⅜ × 1¼ inches. Pages, 66. Lines, 3 on a page. Character, Telugu. Condition, much injured. Appearance, old.

Incomplete.

Same work as that described under R. No. 741 of the Triennial Catalogue of Sanskrit MSS, Vol. I, Part 1-C.

No. 14786. कृष्णकर्णामृतम्.
KṚṢṆAKARṆĀMṚTAM.

Substance, palm-leaf Size, 12½ × 1⅝ inches. Pages, 34. Lines, 7 on a page. Character, Grantha. Condition, much injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Śivāṣṭōttaraśatanāmāvali 18*a*.

Contains the first Śataka complete and the second incomplete.

Same work as that described under No. 20 of the Report on a Search for Sanskrit and Tamil MSS., No. 2.

Date of transcription: Tuesday, the 13th of the dark fortnight, i.e. 12th day of Āḍi month in the year Vibhava.

No. 14787. शिवाष्टोत्तरशतनामावलिः.
ŚIVĀṢṬŌTTARAŚATANĀMĀVALIḤ.

Pages, 3. Lines, 7 on a page.

Begins on fol. 18*a* of the MS. described under the previous number.

Wants the beginning and the end.

Same work as that described under No. 9314 ante.

No. 14788. तन्त्रसारसङ्ग्रहः.
TANTRASĀRASAṄGRAHAḤ.

Pages, 33. Lines, 9 on a page.

Begins on fol. 26*a* of the MS. described under No. 2010

Contains the Adhyāyas one to four complete.

Same work as that described under No. 5412 ante and R. No. 573(*l*) of the Triennial Catalogue of Sanskrit MSS., Vol. I, Part 1-B. By Ānandatīrtha.

The scribe adds—

वेङ्कटार्यतनूजेन श्रीमत्तत्पादसेविना ।
लिखितं वेङ्कटदासेन प्रीत्यै माधवमध्वयोः ॥

Fol. 42*b* contains Haṁsamantrajapavidhi.

No. **14789.** पर्यायमञ्जरी.
PARYĀYAMAÑJARĪ.

Substance, Śrītāla. Size, $13\frac{3}{4} \times 1\frac{7}{8}$ inches. Pages, 141. Lines, 9 on a page. Character, Kanarese. Condition, much injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Bhōgyadravyaguṇaviṣaya 71*b*.

Incomplete.

Similar to the work described under No. 13315 ante.

Beginning :

पर्यायमञ्जरीग्रन्थ(:)पुराणागमवेदिनाम् ।
क्रमेण क्रियते तेषां भरणा . . . . . ॥
(पारा)शरिभरद्वाजप्रमुखाणां तपस्विनाम् ।
ज्ञानैश्वर्यविशिष्टानां वैद्यतन्त्रविधायिनाम् ॥
शश्वदभ्यर्चितशिराः पावनैः पदपांसुभिः ।
शास्त्रेष्वमरदत्तादिप्रणीतेषु निषण्णधीः ॥
श्रुताभियोगस्सर्वेषु वैद्यागमनिघण्टुषु ।
सवर्णस्सर्वसन्मात्रं श्रीमान् श्रीकण्ठनन्दनः ॥
बोधिग्रामाह्वयाम्भोधिचन्द्रमाः कविपुङ्गवः ।
अष्टाङ्गसङ्ग्रहोक्तानां द्रव्याणां सुप्रसिद्धये ॥
सद्गुणात्सञ्चिनोत्यत्र पर्यायं पदविस्त(रैः) ।
सर्वेषु वैद्यशास्त्रेषु द्रव्याणां नियता गुणाः ॥
नियता एव सर्वेषु पर्यायाश्च निघण्टुषु ।
ज्ञातुं तद्विनये शक्यं तत्तत्तन्त्राणि योगतः ॥
किमनेन कृतेनेति पृच्छ्यते चेत् भिषग्वरैः ।
सपादोपग्रहं तेषामुत्तरं चात्र दीयते ॥
सर्वतन्त्राभियोगाय न ह्यलं बालशेमुषी ।
तत्समाहृत्य तन्त्राणि तानि तानि यथायथम् ॥

पर्यायमञ्जरी सेयं सञ्चिता सगुणस्थितिः ।
अत्र क्रमात् विचार्याद्य वक्ष्यन्ते प्रथमं गुणाः ॥

*   *   *   *

सिता विदारिका स्वादुः गुरुस्निग्धस्समीरजित् ।
वातास्रनुत् परं वृष्या तृष्णाघ्नी वातपित्तहा ॥

*   *   *   *

वर्गा अमी विदार्यादिप्रमुखाणां च विंशतिः ।
क्रमेण विविधद्रव्यगुणास्सङ्ग्रहसञ्चिताः ॥
गुणैस्तद्रव्यपर्यायैर्यथाम्नायं प्रकीर्तिताः ।
प्रकीर्णकानि द्रव्याणि वक्ष्यन्तेऽतः परं मया ॥

End:

पृश्निपर्णी शालपर्णी बृहतीद्वयगोक्षुरम् ।
बृंहणं वातपित्तघ्नं कनीयं पञ्चमूलकम् ॥
अभयं दशमूलं स्यात् सन्निपातज्वरार्तिहृत् ।
हिक्काकासकफश्वासज्वरवातादिदोषनुत् ॥

मतान्तरे—

बिल्वकाश्मर्यतर्कारिपाटलीडुण्डुभिस्सह ।
हृष्टं बृहत्यंशुमतीद्वयगोक्षुरगस्तथा ॥
दशमूलमिति ख्यातमशीतिवातनाशनम् ।

No. 14790. भोग्यद्रव्यगुणविषयः.
BHŌGYADRAVYAGUṆAVIṢAYAḤ.

Pages, 24. Lines, 9 on a page.

Begins on fol. 71*b* of the MS. described under the previous number. Wants the beginning and the end.

Similar to the work described under R. No. 3057 of the Triennial Catalogue of the Sanskrit MSS., Vol. IV, Part I–A.

Beginning:

पूगं गिरिवनानूपजाङ्गलोद्भवभेदतः ।
चतुर्विधं विनिर्दिष्टं श्रेष्ठं स्यादुत्तरोत्तरम् ॥

End:

सिंहीनागरपुष्करैस्सकटुकैस्साम्नागुडूचीयुतैः
भूर्जीकर्कटिशृङ्गिका शशजमा दुस्स्पर्शवासाघनैः ।

पित्तं जिह्वकहारि वारि भवति ब्रह्मीव भामिश्रितं
युक्तं वैद्यवरस्य पाण्ड्यमुनिभिर्जम्बीरमिश्रं वृतम् ॥

No. **14791.** जानकीपरिणयम्.
JĀNAKĪPARIṆAYAM.

Pages, 18. Lines, 10 on a page.

Begins on fol. 65*a* of the MS. described under No. 1251.

Contains the first Act incomplete.

Same work as that described under No. 12518 ante.

No. **14792.** जिनेन्द्रस्तुतिः, सव्याख्या.
JINENDRASTUTIḤ WITH COMMENTARY.

Pages, 18. Lines, 8 on a page.

Begins on fol. 3*a* of the MS. described under No. 12048.

Complete.

Similar to the work described under No. 9450 ante.

Beginning :

सकलतार्किकचूडामणिः पात्रकेसरिनामा भगवतः जिनेन्द्र(स्य)गुणस्तुतिरत्यादिस्तुतिमाह—

जिनेन्द्र गुणसंस्तुतिस्तव मनागपि प्रस्तुता
भवत्यखिलकर्मणां प्रहतये परं कारणम् ।
इति व्यवसिता मतिर्मम ततोऽहमत्यादरात्
स्फुटार्थनयपेशलां सुगत संविधास्ये स्तुतिम् ॥

तामेव स्तुतिं विदधानो मतिरित्याद्याह ।

* * * *

त्रिभुवनस्य एकोऽद्वितीयः स एवासौ बन्धुश्च अशेषकर्मोन्मूलकः ।

End :

इयत्यपि गुणस्तुतिः परमनिर्वृतेस्साधनी
भवत्यलमतो जिनो व्यवसितश्च तत्काङ्क्षया ।
विरस्यति च सा पुनारुचितलापलोभे सतां(?)
मतोऽभिलषिताप्तिरेव ननु च प्रयासावधीः ॥
इति मम मम वृत्त्या(सं)हतिं त्वद्गुणाना-
मनिशममितशक्तिं संस्तुवानस्य भक्त्या ।

मुखमनघमनन्तं स्वात्मसंस्थं महात्मन्
जिन भवतु महत्या केवलश्रीविभूत्या ॥

No. 14793. आत्मानुशासनम्, अवतारिकासहितम्.
ĀTMĀNUŚĀSANAM WITH INTRODUCTION.

Pages, 66. Lines, 8 on a page.

Bagins on fol 12a of the MS. described under No. 12048.

Complete.

Same text as that described under No. 5158 ante, but this commentary is different.

Beginning :

बृ(ह)द्धर्मभ्रातुर्लोकसेनस्य विषयव्यामुग्धबुद्धेः सम्बोधनव्याजेन सर्वसत्त्वोपकारकं सन्मार्गमुपदर्शयितुकामो गुणभद्रदेवो निर्विघ्नतः शास्त्रपरिसमाप्त्यादिकं फलमभिलषन् इष्टदेवताविशेषं नमस्कुर्वाणो लक्ष्मीत्याद्याह—

लक्ष्मीनिवासनिलयं विलीनविलयं निधाय हृदि वीरम् ।
आत्मानुशासनमहं वक्ष्ये मोक्षाय भव्यानाम् ॥

End :

ग्रन्थकारो ग्रन्थपरिसमाप्तौ स्वगुण(रु)नामपूर्वकमात्मीयमङ्गनकं कुर्वाणो जिनसेनाचार्येत्याद्याह—

जिनसेनाचार्यपादस्मरणादीनचेतसाम् ।
गुणभद्रभदन्तानां कृतिरात्मानुशासनम् ॥
मोक्षोपायमनल्पपुण्यममलज्ञानोदयं निर्मलं
भव्यार्थं परमं प्रभेन्दुकृतिना व्यक्तैः प्रसन्नैः पदैः ।
व्याख्यातं वरमात्मशासनमिदं व्यामोहाविच्छेदनं
सूक्तार्थेषु कृतादरैरहरहश्चेतस्यलं चिन्त्यताम् ॥

No. 14794. समाधिशतकम् , अवतारिकासहितम्.
SAMĀDHIŚATAKAM WITH INTRODUCTION.

Pages, 24. Lines, 9 on a page.

Begins on fol. 45a of the MS. described under No. 12048.

Complete.

A treatise in 100 stanzas by Pūjyapāda, laying down how a man can attain the salvation through soul-emancipation.

Beginning:

श्रीपूज्यपादस्वामी मुमुक्षूणां मोक्षोपायं मोक्षस्वरूपं चोपदेशयितुकामो निर्विघ्नतः शास्त्रपरिसमाप्त्यादिकं फलमभिलषन्निष्टदेवताविशेषं नमस्कुर्वाणो येनात्मेत्याद्याह—

येनात्माबुद्य(ध्य)तात्मैव परत्वेनैव(सा)परम् ।
अक्षयानन्तबोदा(धा)य तस्मै सिद्धात्मने नमः ॥

अथोक्तव्रतसिद्धस्वरूपस्य तत्प्राप्त्युपाय(स्य) चोपदेष्टारं ब(च)सत(क)-लात्मानमिष्टदेवताविशेषं स्तोतुमाह—

जयन्ति यस्यावदतोऽपि भारतीविभूतयस्तीर्थकृ(कृ)तोऽप्यनीहितुः ।
शिवाय दात्रे सुगताय विष्णवे जिनाय तस्मै सकलात्मने नमः ॥

End:

तेषां शरीरयन्त्राणामात्मन्यारोपानारोपौ कृत्वा जडविवेकिनौ किं कुरुत इत्याह—

तान्यात्मनि समारोप(प्य)साक्षाण्यास्ते सुखं जडः ।
त्यक्त्वारोपं पुनर्विद्वान् प्राप्नोति परमं पदम् ॥

कथमसौ तं त्यजेदित्याह, अथवा स्वकृतग्रन्थार्थमुपसंहृत्य फलमुपदर्श-यन् मुक्त्वेत्याह—

मुक्त्वा परत्वपरबुद्धिमहंधियं च
संसारदुःखजननीं जननाद्विमुक्तः ।
ज्योतिर्मयं सुखमुपैति परात्मनिष्ठः
तन्मार्गमेतदधिगम्य समाधितन्त्रम् ॥

Colophon:

इति श्रीपूज्यपादस्वामिविरचितं समाधिशतकं संपूर्णम् ॥

The scribe adds—

पूज्यपादेन रचितं समाधिशतकं मया ।
जिन्नपाख्येन लिखितं दत्तं श्रीब्रह्मसूरिणा ॥

No. **14795.** धर्मामृतम्.

DHARMĀMṚTAM.

Pages, 16. Lines, 9 on a page.

Begins on fol. 57*a* of the MS. described under No. 12048.

Breaks off in the second Adhyāya.

Similar to the work described under No. 14252 ante.

Beginning:

अथ नत्वाभ(र्ह)तोऽक्षूण(क्षुण्ण)चरणान् श्रमणानपि ।
तद्धर्मरागिणां धर्मस्सागाराणां प्रणेष्यते ॥
अनाद्यविद्यादोषोत्थचतुस्संज्ञाज्वरातुराः ।
शश्वत् स्वज्ञानविमुखास्सागारा विषयोन्मुखाः ॥
अनाद्यविद्यानिस्स्यूतां ग्रन्थिसंज्ञामपासितुम् ।
अपारयन्तस्सागाराः प्रायो विषयमूर्छिताः ॥

End:

पाक्षिकादिभिदा त्रेधा श्रावकस्तत्र पाक्षिकः ।
तद्धर्मगृह्यस्तन्निष्ठो नैष्ठिकस्व(कधर्म)युक् ॥

Colophon:

इत्याशाधरविरचिते धर्मामृते सागरधर्मे भव्यकुमुदचन्द्रिकासंज्ञकटीकायां प्रथमोऽध्यायः ॥

त्याज्यानजस्त्रविषयान्पश्यतोऽपि जिनाज्ञया ।
मोहात् त्यक्तुमशक्तस्य गृही धर्मेऽनुमन्यते ॥

* * * *

तपश्श्रुतोपयोगीनि निरवद्यानि भक्तितः ।
मुनिभ्योऽन्नौषधावासपुस्तकादीनि कल्पयेत् ॥
भे . . . . ।

No. 14796. नैषधव्याख्या—जीवातुः.

NAIṢADHAVYĀKHYĀ : JĪVĀTUḤ.

ages, 14. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 4781.

Contains the first Sarga incomplete.

Same commentary as that described under No. 11569 ante.

No. 14797. अष्टाध्यायी.

AṢṬĀDHYĀYĪ.

Pages, 19. Lines, 8 on a page.

Begins on fol. 28*a* of the MS. described under No. 4781.

Breaks off in the third Adhyāya.

Same work as that described under No. 1246 ante.

No. **14798.** ऋक्संहिता.

RKSAMHITĀ.

Pages, 2. Lines, 8 on a page.

Begins on fol. 38*a* of the MS. described under No. 4781.

Contains a small portion of the seventh Sūkta in the sixth Maṇḍala.

Same work as that described under No. 1 ante.

No. **14799.** ऋक्संहिता.

RKSAMHITĀ.

Pages, 14. Lines, 6 on a page. Character, Telugu and Nandināgarī.

Begins on fol. 139*a* of the MS. described under No. 8721.

A small portion of Ṛgvēdasaṁhitā.

Same work as that described under No. 1 ante.

No. **14800.** जयन्तीकल्पः.

JAYANTĪKALPAḤ.

Pages, 2. Lines, 9 on a page.

Begins on fol. 1*a* of the MS. described under No. 4847.

Wants the beginning; otherwise complete.

Similar to the work described under No. 8269 ante.

The procedure herein is intended for the followers of Ānandatīrtha.

Beginning:

रोहिण्यामर्धरात्रे तु यदा कालाष्टमी भवेत् ।
जयन्ती नाम सा प्रोक्ता सर्वपापप्रणाशिनी ॥
यस्यां जातो हरिस्साक्षान्निशीथे भगवानजः ।
तस्मात्तद्दिनमत्यर्थं पुण्यं पापहरं परम् ॥
तस्मात्सर्वैरुपोष्या सा जयन्ती नाम वै सदा ।
द्विजादिभिर्विशेषेण तद्भक्तैश्च विधानतः ॥

End:

सर्वायेति च मन्त्रेण ततः पारणमाचरेत् ।
धर्मायेति ततः स्वस्थो मुच्यते किल्बिषैस्स्वकैः ॥

Colophon:

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितं जयन्तीकल्पं संपूर्णम् ॥

No. 14801. कन्दुकस्तुतिः.
KANDUKASTUTIḤ.

Page, 1. Lines, 9 on a page.

Begins on fol. 1*b* of the MS. described under No. 4847.

A eulogy addressed to God Kṛṣṇa. It is generally repeated by Hindu girls at the time of playing with a ball.

Beginning and the **End:**

अम्बरगङ्गाचुम्बितपादः पदतलविदलितगुरुतरशकटः ।
कालियनागक्ष्वेलनहन्ता सरसिजनवदलविकसितनयनः ॥
कालघनालीकर्बुरकायः शरशतशकलितसुररिपुनिवहः ।
सन्ततमस्मान्पातु मुरारिः सततमसमजवखगपतिनिरतः ॥

Colophon:

कन्दुकस्तुतिः संपूर्णा ॥

No. 14802. ऋग्भाष्यम्.
ṚGBHĀṢYAM.

Pages, 124. Lines, 9 on a page.

Begins on fol. 2*a* of the MS. described under No. 4847.

Complete.

Same work as that described under No. 31 ante.

No. 14803. प्रायश्चित्ताचरणक्रमः.
PRĀYAŚCITTĀCARAṆAKRAMAḤ.

Pages, 2. Lines, 7 on a page. Character, Telugu.

Begins on fol. 108*a* of the MS. described under No. 2759.

Incomplete.

Similar to the work described under No. 3480 ante.

Beginning:

अथैवं निर्णीतस्य सर्वप्रायश्चित्ताचरणक्रमः कथ्यते । प्रायश्चित्ताचरणयोग्यनिर्णीतदिनात्पूर्वेद्युरुपवासः . . . . . प्रातः मलापकर्षणस्नानम्, नित्यकर्मानुष्ठानम्, परिषदुपवेशनम्, प्रायश्चित्तं कर्तुकामः परिषत्सन्निधौ मदीयपापनिवेदनयोग्यतार्थं शरीरशुद्ध्यर्थं मृत्तिकास्नानं करिष्य इति सङ्कल्प्य ।

End:

अशेषे सर्वज्ञे परिषत् गोत्रेण नक्षत्रे राशौ जाते(न)देवदत्तनामधेयेन मया समर्पितां परिषद्दक्षिणां स्वीकृत्य मदीयां विज्ञापनामवधार्य मामनुगृहाणेति.

No. 14804. दम्भोलिशान्तिः.
DAMBHŌLIŚĀNTIḤ.

Pages, 2. Lines, 7 on a page. Character, Telugu.

Begins on fol. 109*a* of the MS. described under No. 2759.

Complete.

Similar to the work described under No. 3536 ante.

Beginning:

अथातस्संप्रवक्ष्यामि दम्भोलेश्शान्तिमुत्तमम् ।
देवालये वा राष्ट्रे वा नगरे वा विशेषतः ॥
ग्रामे वा नगरे वा(पि) आरामे वा गृहेऽथवा ।
दम्भोलिपतनाच्चैव तत्स्थानं स्वविनाशकृत् ॥

End:

दम्भोलिपतनाज्जातः दोषस्तेन न जायते ।
सर्वपापकरं(हरं नृणां) सर्वदा शुभवर्धनम ॥

No. 14805. गीतगोविन्दम्, श्रुतिरञ्जनीव्याख्यासहितम्.
GĪTAGŌVINDAM WITH THE COMMENTARY ŚRUTI-RAÑJANĪ.

Pages, 7. Lines, 9 on a page

Begins on fol. 115*a* of the MS. described under No. 11927.

Wants the introductory verses in the beginning and incomplete in the first Sarga.

Same work as that described under No. 11962 ante.

No. 14806. शान्तिकल्पः.
ŚĀNTIKALPAḤ.

Substance, palm-leaf. Size, $17\frac{5}{8} \times 1\frac{1}{2}$ inches. Pages, 236. Lines, 5 on a page. Character, Nandināgarī and Telugu. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other works herein are Vēdasāraśivasahasranāma 123*a*, Śivavēdapādastava 128*a*, Śaṅkarakavaca 132*b*.

Similar to the work described under R. No. 437 of the Triennial Catalogue of Sanskrit MSS., Vol. I, Part I-B.

Contains the following subjects :—

1*a*—2*a*	सर्पसंस्कारविधिः.
2*a*—4*b*	नागप्रतिष्ठाविधिः.
5*a*—7*b*	वायसशान्तिः.
8*a*—9*b*	गण्डनक्षत्रजननशान्तिः.
9*b*—12*b*, 43*b*—46*a*	व्यतीपातादिशान्तिः.

12*a*—15*a* उलूकादिप्रवेशशान्तिः

15*a*—16*a* विषघटिकाजननशान्तिः.

16*a*—17*a* एकनक्षत्रजननशान्तिः

17*a*—18*a*, 115*a*—116*b* } कदलीशान्तिः.

18*a*—19*b* मधुच्छत्रशान्तिः.

19*b*—22*b* विषनाडीरजस्वलाशान्तिः.

22*b*—24*b* दुष्टवारऋतुमतीशान्तिः

24*b*—28*b* वैधृतिव्यतीपातार्तवशान्तिः.

28*b*—30*b* ग्रहणकालजननशान्तिः

30*b*—31*b* अमावास्याजननशान्तिः.

31*b*—33*a* पल्लीसरटपतनशान्तिः.

33 निमित्तदोषशान्तिः.

33*b*—34*a* पितापुत्रैकमासादिजननशान्तिः.

34*a*—35*a* काकस्पर्शशान्तिः.

35*a*—36*a* कपोतशान्तिः.

36*a*—37*b* तिथ्यादिगण्डशान्तिः.

37*b*—38*a* रोमखण्डशान्तिः.

38*a*—39*b* गजशान्तिः.

39*b*—43*b* अश्वशान्तिः.

46, 105*b*—106*b* } सिनीवालीशान्तिः.

46*b*—51*a* दन्तजननशान्तिः.

51*b*—59*a*, 85*b*—89*b* } कुहूशान्तिः.

59*a*—63*b*, 106*b*—107*a* } गोमुखजननशान्तिः.

63*b*—64*b* कुण्डमण्डपविधिः.

64*b*—65*a* एकदन्तजननशान्तिः.

65*b*—68*b* ग्रहणप्रसूतिरजोदर्शनशान्तिः.

68*b*—69*b*, 104*a*—105*b* } कृष्णचतुर्दशीप्रसूतिशान्तिः.

69*b*—71*a* यमलजननशान्तिः.

71*a*—74*b* ग्रहणस्नानविधिः (incomplete).

75*a*—79*a* षष्टिपूर्तिशान्तिः.

80*a*—81*b* पादपूर्वकादिजननारिष्टशान्तिः.

81*b*—83*b* नालवेष्टनशान्तिः.

83*b*—84*a* नरपतनशान्तिः.

84*b*—85*a* भीमरथशान्तिः.

86*a*—91*b* कौशिकप्रवेशशान्तिः.

93*a*—95*b* ग्रहणशान्तिः.

95*b*—96*b* वैधृतिव्यतीपातादिजननशान्तिः.

96*b*—103*a* आश्लेषामूलानक्षत्रजननशान्तिः.

103*a*—104*a* दिवाजाताश्वशान्तिः.

107 गण्डशान्तिः, प्रतिशुक्रशान्तिः.

107*b*—109*a* सरटशान्तिः.

109*a*—111*b* शान्त्यङ्गदानविधिः.

112 उत्पातशान्तिः.

112*b* सङ्क्रान्तिशान्तिः.

112*b*—114*b* मृत्तिकादानादि.

117*a*—118*b* रोगहरप्रतिमादानम्.

119*a*—122*b* नृसिंहमन्त्रस्तोत्रादि.

No. 14807. वेदसारशिवसहस्रनामस्तोत्रम्.
VĒDASĀRAŚIVASAHASRANĀMASTŌTRAM.

Pages, 10. Lines, 6 on a page.

Begins on fol 123*a* of the MS. described under the previous number.

Complete.

Same work as that described under R. No. 142(*c*) of the Triennial Catalogue of Sanskrit MSS., Vol. I, Part 1-A, wherein see for the end and the colophon.

Wants the middle portion.

Beginning :

अस्य श्रीवेदपादस्तोत्रमन्त्रस्य जैमिनिः ऋषिः, अनुष्टुप्-त्रिष्टुप्-जगत्यः छन्दांसि, चिदम्बरात्मकश्श्रीसाम्बशिवो देवता, श्रीसाम्बशिवप्रसादसिद्ध्यर्थे वेदपादस्तोत्रपठनं करिष्ये ।

* * * *

प्रियंवदाय दक्षाय धन्विने विभवाय च ।
गिरीशाय गिरीन्द्राय गिरिशान्ताय ते नमः ॥

जप्तव्यमिदमुत्तमम् ।
(सप्त)तितमोऽध्यायः ॥

No. 14808. शिववेदपादस्तवः.
ŚIVAVĒDAPĀDASTAVAḤ.

Pages, 9. Lines, 7 on a page.

Begins on fol. 128*a* of the MS. described under No. 14806.

Complete.

Same work as that described under R. No. 488(v) of the Triennia Catalogue of the Sanskrit MSS., Vol. I, Part I-B.

No. 14809. शङ्करकवचः.
ŚAṄKARAKAVACAḤ.

Pages, 3. Lines, 7 on a page.

Begins on fol. 132*b* of the MS. described under No. 14806.

Wants the beginning and the end.

Same work as that described under R. No. 142(*b*) of the Triennial Catalogue of the Sanskrit MSS., Vol. I, Part I-A.

No. **14810.** अङ्गारककवचः.

ANGĀRAKAKAVACAḤ.

Pages, 3. Lines, 5 on a page.

Begins on fol. 16*b* of the MS. described under No. 9532.

Complete.

Same work as that described under No. 5849 ante.

Foll. 16 and 18 contain the Aṅgārakagāyattrī and Stōtra.

No. **14811.** शनैश्चरकवचस्तोत्रम्.

ŚANAIŚCARAKAVACASTŌTRAM.

Pages, 10. Lines, 5 on a page.

Begins on fol. 19*a* of the MS. described under No. 9532.

Complete.

Same work as that described under No. 7313 ante, but with slight difference in the beginning and the end.

No. **14812.** सूर्यकवचः, स्तोत्रसहितः.

SŪRYAKAVACAḤ WITH STŌTRA.

Pages, 5. Lines, 5 on a page

Begins on fol. 23*b* of the MS. described under No. 9532.

Complete.

Similar to the work described under No. 7577 ante.

Beginning :

आकृष्णेन हिरण्यस्तूपसविता त्रिष्टुप् काश्यप ऋषिः, अनुष्टुप् छन्दः, श्रीसूर्यनारायणो देवता ।

* * * *

सूर्यः पातु शिरोदेवं(शं) ललाटं पातु भास्करः ।
आदित्यो मे दृशौ पातु श्रोत्रे पातु दिवाकरः ॥

End :

कल्पवृक्षसमाकीर्णं कदम्बकुसुमप्रभम् ।
अनेकरोगशान्त्यर्थं ध्यायेदादित्यमण्डलम् ॥

Colophon :

इति पाराशर्यपुराणे आदित्यकवचं सम्पूर्णम् ॥

No. **14813.** चन्द्रकवचस्तोत्रमन्त्रः.

CANDRAKAVACASTŌTRAMANTRAḤ.

Pages, 3. Lines, 5 on a page.

Begins on fol. 25*b* of the MS. described under No. 9532.

Complete.

Same work as that described under No. 6282 ante, but the additional Ślōkas are given in the beginning.

No. **14814.** बुधकवचस्तोत्रमन्त्रः.

BUDHAKAVACASTŌTRAMANTRAḤ.

Pages, 4. Lines, 5 on a page.

Begins on fol. 26*b* of the MS. described under No. 9532.

Complete.

Same work as that described under No. 6780 ante, but the additional Stōtras are given in the beginning.

No. **14815.** अङ्गारकार्चना.

AṄGĀRAKĀRCANĀ.

Page, 1. Lines, 5 on a page.

Begins on fol. 28*a* of the MS. described under No. 9532.

On the worship of the planet Aṅgāraka by the repetition of his different names.

Beginning and **End**:

ओं मङ्गलाय नमः.
ओं भूमिपुत्राय नमः.
ओं धनप्रदाय नमः.
ओं स्थिरासनाय नमः.
ओं महाकायाय नमः.
ओं सर्वकर्मोपरोधकाय नमः.
ओं लोहिताय नमः.
ओं लोहिताक्षाय नमः.
ओं सामगानाय नमः.
ओं पारगाय नमः.
ओं धर्मराजाय नमः,

ओं कुजाय नमः.
ओं भौमाय नमः.
ओं भूतिदाय नमः.
ओं भूमिनन्दनाय नमः.
आ अङ्गारकाय नमः.
ओं यमाय नमः.
ओं सर्वकर्मावरोधरा(का)य नमः.
ओं वृष्टिकर्त्रे नमः
ओं हर्त्रे नमः.
ओं सर्वकामफलप्रदाय नमः.

No. **14816.** विष्णुसहस्रनामावलिः.

VIṢṆUSAHASRANĀMĀVALIḤ.

Pages, 22. Lines, 6 on a page.

Begins on fol. 8*a* of the MS. described under No. 7758.

Complete.

Same work as that described under No. 9038 ante, but the additional introductory stanzas in the beginning and Phalaśruti in the end are given.

No. **14817.** रजस्वलाभिगमनादिप्रायश्चित्तम्.

RAJASVALĀBHIGAMANADIPRĀYAŚCITTAM.

Pages, 2. Lines, 6 on a page.

Begins on fol. 38*a* of the MS. described under No. 7758.

Incomplete.

On the expiatory ceremonies to be performed in certain cases of default and irregularities.

Beginning :

रजस्वलाभिगमने पतितसम्भाषणे दिवामैथुने शूद्राभिगमने स्वप्नान्त-रेतस्खलने उदकेषु मूत्रपुरीषगमने कुमारस्य संस्कार

* * * *

उदकुम्भलोपे शुश्रूषालोपे एतैश्चान्यैश्चानाम्नातेषु प्रायश्चित्तकल्पमिष्टम-ग्निमुपसमाधाय संपरिस्तीर्य प्रायश्चित्तं जुहोति ।

End :

प्राजापत्यकृच्छ्रादिकं कृत्वा पञ्चगव्यं प्राश्नीयाद्दक्षिणे कर्णे गोपुच्छं बध्नीयात् । . . . वास्य शासनक्रमेण यथानुपूर्वकरणमविच्छिन्नसन्ततं भवति सन्ततं भवतीत्याह भगवान् बोधायनः ॥

Fol. 39 contains a few Vacanas relating to Śrīrāmanavamī.

No. **14818.** रामाष्टोत्तरशतनामावलिः.

RĀMĀṢṬŌTTARAŚATANĀMĀVALIḤ.

Pages, 6. Lines, 6 on a page.

Begins on fol. 43*a* of the MS. described under No. 7758.

Complete.

Same work as that described under No. 8986 ante, but the additional stanzas (Pūrvapīṭhikā) in the beginning and Phalaśruti in the end are given with colophon.

Colophon :

इति श्रीपाद्मे उमामहेश्वरसंवादे रामाष्टोत्तरं संपूर्णम् ॥

No. 14819. बुधाष्टमीव्रतोद्यापनम्.
BUDHĀṢṬAMĪVRATŌDYĀPANAM.

es, 2. Lines, 6 on a page.

Begins on fol. 60*a* of the MS. described under No. 7758.

Wants the beginning; otherwise complete.

Similar to the work described under Nos. 8391 and 8393 ante.

Beginning:

कुङ्कुमं चन्दनं दिव्यमरुगा(गर्वा)मलसंयुतम् ।
मयानुलेपितं देव चन्दनं प्रतिगृह्यताम् ॥ गन्धम् ।

सुरासुरनमस्कृतायाक्षतान् । सर्वदेवोत्तमाय पुष्पम् । नरकोत्तारणाय धूपम् । ज्ञानप्रदाय दीपम् । सोमपुत्राय नैवेद्यम् ।

* * * *

ततः प्रातस्समुत्थाय प्रतिमां पूर्ववद्यजेत् ।
आचार्योऽग्निमुखं कृत्वा स्वशाखोक्तविधानतः ॥
तद्विष्णोरिति मन्त्रेण उद्बुध्यस्वेति चापरः ।

End:

बुधोऽहं तव दास्यामि द्रव्यस्थोऽत्र बुधः स्वयम् ।
दीयते बुधराजाय तुष्यतां मे बुधग्रहः ॥ वायनदानमन्त्रः ॥

Colophon:

इति श्रीभविष्योत्तरपुराणे बुधाष्टमीव्रतोद्यापनं समाप्तम् ॥

No 14820. नृसिंहाष्टोत्तरशतनामावलिः.
NṚSIṀHĀṢṬŌTTARAŚATANĀMĀVALIḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 66*b* of the MS. described under No. 7758.

Complete.

Same work as that described under Nos. 8946 and 8955 ante.

No. 14821. सर्वदानमन्त्रः.
SARVADĀNAMANTRAḤ.

Pages, 18. Lines, 6 on a page.

Begins on fol. 67*b* of the MS. described under No. 7758.

Incomplete.

On the different Mantras to be repeated in connection with various kinds of gifts to be made to Brahmans

Beginning:

कृतोत्तरीयको विप्रो ह्यन्तर्जानुकरस्तथा ।
उदङ्मुखाय विप्राय प्राङ्मुखो दानमाचरेत् ॥
सोङ्कारं ब्राह्मणे कुर्यात् निरोङ्कारं महीपतौ ।
उपांशु च तथा वैश्ये मनसा स्वतिशूद्रके ॥ १
गोभूतिलहिरण्याज्यधान्यं वासो गुडानि च ।
रौप्यं लवणमित्याहुः दश दानानि वै बुधाः ॥
यज्ञसाधनभूता या विश्वस्याघप्रणाशिनी ।
विश्वरूपधरो देवः प्रीयतामनया गवा ॥
गवामङ्गेषु तिष्ठन्ति भुवनानि चतुर्दश ।
यस्मात्तस्माच्छिवं मे स्यादतश्शान्तिं प्रयच्छ मे ॥ (गोदानमन्त्रौ) ।

End:

नमो महेश विघ्नेश गिरिजानन्दन प्रभो ।
मम विघ्नं निहत्याशु सर्वसिद्धिप्रदो भव ॥
विनायकप्रतिमादानम् ।

No. **14822.** नारायणाष्टोत्तरशतनामावलिः.
NĀRĀYAṆĀṢṬŌTTARAŚATANĀMĀVALIḤ.

Pages, 2. Lines, 7 on a page.

Begins on fol. 84*a* of the MS. described under No. 7758.

Complete.

Similar to the work described under No. 8934 ante.

Beginning:

नारायणाय नमः । नराय (नमः) । शौरये । चक्रपाणये । जनार्दनाय । वासुदेवाय । जगद्योनये न । वामदेवाय ।

End:

ज्ञानानन्दाय । शम्भवे न । तपोमयाय साक्षिणे । सर्वदेहिनां शरण्याय । श्रीविरूपाक्षाय नमः । श्रीनारायणाय नमः । अष्टोत्तरशतपुष्पाणि समर्पयामि ॥

No. 14823. शिवाष्टोत्तरशतनामावलिः.
ŚIVĀṢṬŌTTARAŚATANĀMĀVALIḤ.

Pages, 2. Lines, 7 on a page.

Begins on fol. 85*a* of the MS. described under No. 7758.

Complete.

Same work as that described under No. 9314 ante, but without the last two stanzas found therein.

श्रुतसेनाय । सुराय । सुराधिपाय । प्रणवाय । संहराय । श्रीउमामहेश्वराभ्यां नमः—अष्टोत्तरशतपुष्पाणि समर्पयामि ॥

No. 14824. शिवाष्टोत्तरशतनामावलिः.
ŚIVĀṢṬŌTTARAŚATANĀMĀVALIḤ.

Pages, 3. Lines, 7 on a page.

Begins on fol. 85*b* of the MS. described under No. 7758.

This is also called Rudrāṣṭōttaraśatanāmāvali.

Complete.

Same work as that described under No. 9241 ante, but with the additional names given below:—

महादेवाय । अव्ययाय । हराय . . . .

तारकाय नमः । परमेश्वराय नमः । श्रीसदाशिवाय नमः ॥

शिवाष्टोत्तरशतपुष्पाणि समर्पयामि ॥

No. 14825. कृष्णाष्टोत्तरशतनामावलिः.
KṚṢṆĀṢṬŌTTARAŚATANĀMĀVALIḤ.

Pages, 3. **Lines**, 7 on a page.

Begins on fol. 86*b* of the MS. described under No. 7758.

Complete.

Same work as that described under No. 8909 ante, but with the additional names given below:—

सर्वग्रहरूपिणे न । परात्पराय । संसारवैरिणे । कंसारये । मुरारये । नरकान्तकाय । अनादिब्रह्मचारिणे ॥

No. 14826. शिवसहस्रनामावलिः.
ŚIVASAHASRANĀMĀVALIḤ.

Pages, 15. Lines, 7 on a page.

Begins on fol. 88*a* of the MS. described under No. 7758.

Complete.

Same work as that described under No. 9282 ante.

ओं सर्वसत्त्वावलम्बनाय । श्रीसदाशिवार्पणमस्तु । सहस्रनामपूजां समर्पयामि ॥

Fol. 95*b* contains the Arghyamantra relating to God Śiva.

No. **14827.** शिवरात्रिव्रतकल्पः.

ŚIVARĀTRIVRATAKALPAḤ.

Pages, 16. Lines, 7 on a page.

Begins on fol. 96*a* of the MS. described under No. 7758.

Complete.

Similar to the work described under No. 8535 ante.

Taken from the Skāndapurāṇa.

Beginning :

सूत उवाच—

कैलासशिखरासीनो देवदेवो जगद्गुरुः ।
पञ्चवक्त्रो दशभुजस्त्रिनेत्रः शूलपाशभृत् ॥

* * * *

माघफाल्गुनयोर्मध्ये असिता या चतुर्दशी ।
शिवरात्रिस्तु विज्ञेया सर्वयज्ञोत्तमोत्तमा ॥
दानधर्मैस्तपोयज्ञैः किं वा यज्ञशतैरपि ।
शिवरात्रिसमं नास्ति किं वा यज्ञसहस्रकम् ॥

End:

(अस्य)व्रतस्य माहात्म्यं महापातकनाशनम् ।

सत्यपराः—

एवमेव(हि) भद्राश्वश्श्रुत्वा व्रतमनुत्तमम् ।
स मुक्तस्सर्वपापेभ्यः शिवलोके महीयते ॥
यः पठेच्छृणुयाद्वापि व्रतमाहात्म्यमुत्तमम् ।
स नरो मुच्यते पापात्सत्यमेव नराधिप ॥

Colophon :

इति श्रीस्कान्दपुराणे उमामहेश्वरसंवादे शिवरात्रिव्रतं सम्पूर्णम् ॥

No. 14828. यमलोपनयनविधिः.
YAMALŌPANAYANAVIDHIḤ.

Pages, 2. Lines, 7 on a page.

Begins on fol. 124*a* of the MS. described under No. 7758.

Complete.

On the procedure relating to the performance of Upanayana ceremony to twins.

Beginning:

अथातो यमलोपनयनविधिं व्याख्यास्यामः—

गोमयेन गोचर्ममात्रं स्थण्डिलं कृत्वा पूर्वेद्युर्नान्दीमुखं कृत्वा प्रत्येकमङ्कुरार्पणप्रतिसरबन्धनं कृत्वा श्वो भूते स्नात्वाचम्याथ देवयजनोल्लेखनप्रभृत्यग्निमुखं कृत्वा कुमारौ भोजयित्वा तयोश्चौलवत् केशान् वाप्य स्नातौ कुमारौ यज्ञोपवीताजिनमेखलावाससी तत्तन्मन्त्रेण धार्यमाणौ सोमोऽसीति दण्डे ।

End:

सहैव भैक्षमेकाग्निना समिदाधानमित्याह भगवान् बोधायनः ॥

एककाले प्रसूतत्वादेककर्तृत्वमेव च ।
सर्वमेकाग्निना चैवं व्रतं वैवाहिकं विना ॥

Colophon:

इति यमलोपनयनविधिः ॥

No. 14829. देवपूजाविधिः.
DĒVAPŪJĀVIDHIḤ.

Pages, 2. Lines, 7 on a page.

Begins on fol. 156 of the MS. described under No. 7758.

Complete.

Taken from Gṛhyapariśiṣṭa.

Deals with the daily worship in houses of the image of God.

Beginning:

. . . . गृहस्थोऽहरहरिष्टान् देवान् . . . . स्थण्डिले वा प्रतिमासु वा यजेत । . . . . नावाहनविसर्जने भवतः । स्वाकृतिषु हि शस्तासु देवता नित्यं सन्निहिता इति प्रतिमाः प्राङ्मुख उदङ्मुखः

यजेत । अन्यत्र प्राङ्मुखः संभृतसंभारो यजनभवनमेत्य द्वारदेशे स्थित्वा हस्ततालत्रयेण—

अपसर्पन्तु ये भूता ये भूता भुवि संस्थिताः ।
ये भूता विघ्नकर्तारः ते नश्यन्तु शिवाज्ञया ॥

इति विघ्नानुद्वास्य ।

End:

एवमहरहः कुर्वीत । तमेवं वैश्वदेवशेषेण वा पृथगन्नेन वा कुर्यात् । नास्य शेषेण वैश्वदेवं कुर्यात् ॥

Colophon:

इति गृह्यपरिशिष्टोक्तदेवपूजाविधिः ॥

No. 14830. केरलीयदेवपूजाविधिः.
KĒRALĪYADĒVAPŪJĀVIDHIḤ.

Pages, 2. Lines, 7 on a page.

Begins on fol. 157*a* of the MS. described under No. 7758.

Complete.

On the ceremonial worship of God as conducted in the Kērala country.

Beginning:

पञ्च पुष्पाञ्जलिमन्त्रा उच्यन्ते—

गं अं रजउपाधये स्थूलविराट्शरीराय विश्ववैश्वानरात्मने सर्वजगत्स्रष्ट्रे ब्रह्मणे सरस्वतीसहिताय सर्वज्ञाय सदात्मने असङ्गाखण्डसंविदे नारायणाय दक्षिणामूर्तिपरशिवाय परमात्मने साङ्गाय सायुधाय सपरिवाराय नमः ।

End:

एतेषु पञ्चम अपवादमन्त्रः, चतुर्थः समष्ट्यध्यारोपमन्त्रः, अन्ये व्यष्ट्यध्यारोपाः ॥

Colophon:

इति केरलीयदेवपूजाविधिः ।

No. 14831. गृहदेवतासंप्रोक्षणविधिः.
GṚHADĒVATĀSAMPRŌKṢAṆAVIDHIḤ.

Pages, 3. Lines, 7 on a page.

Begins on fol. 160*b* of the MS. described under No. 7758.

Incomplete.

Same work as that described under No. 5243 ante.

No. 14832. जैनमहापुराणसङ्ग्रहः.
JAINAMAHĀPURĀṆASAṄGRAHAḤ.

Pages, 15. Lines, 14 on a page.

Begins on fol. 1*a* of the MS. described under No. 1269.

Breaks off in the third Parvan.

Same work as that described under R. No. 137(*b*) of the Triennial Catalogue, Vol. I, Part I-A. This work is also called Triṣaṣṭilakṣaṇa-purāṇa. By Jinasēnācarya.

Beginning:

श्रीमते सकलज्ञानसाम्राज्यपदमीयुषे ।
धर्मचक्रभृते भर्त्रे नमस्संसारभीमुषे ॥

* * * *

जयत्यजय्यमाहात्म्यं निशासितकुशासनम् ।
शासनं जैनमुद्भासि मुक्तिलक्ष्म्येकशासनम् ॥
रत्नत्रयमयं जैनं जैत्रमस्त्रं जयत्यदः ।
येनाव्याजं व्यजेष्टाहं(यं) दुरितारातिवाहिनीम् ॥

* * * *

यमनुप्राव्रजन् भूरि सहस्राणि महीक्षिताम ।
इक्ष्वाकुभोजमुख्यानां स्वामिभक्त्यैव केवलम ॥
शब्दाद्या यस्य सद्वृत्तं निर्वोढुमसहिष्णवः ।

* * * *

अजितादिमहावीरपर्यन्तान् परमेश्वरान् ।
जिनेन्द्रान् पर्युपासेऽहं धर्मसाम्राज्यनायकान् ॥
सकलज्ञानसाम्राज्ययौवराज्यपदे स्थितान् ।
तोष्टवीमि गणाधीशानात्मसंज्ञानकण्ठिकान् ॥

* * * *

इत्याप्तवचनस्तोत्रैः कृतमङ्गलसत्क्रियः ।
पुराणं सङ्ग्रहीष्यामि त्रिषष्टिपुरुषाश्रितम् ॥
तीर्थेशामपि चक्रेशां हलिनामर्धचक्रिणाम् ।
त्रिषष्टिलक्षणं वक्ष्ये पुराणं तद्विदामपि ॥

* * * *

महापुरुषसम्बन्धि महाभ्युदयशासनम् ।
महापुराणमाम्नातमत एतन्महर्षिभिः ॥

Colophon:

इत्यार्षे भगवज्जिनसेनाचार्यप्रणीते त्रिषष्टिलक्षणमहापुराणसङ्ग्रहे कथामुखवर्णनं नाम प्रथमं पर्व.

See under R. No. 137(*b*) of the Triennial Catalogue, Vol. I, Part I-A, for the end.

No. **14833.** चाटुश्लोकाः.
CĀṬUŚLŌKĀḤ.

Pages, 6. Lines, 6 on a page.

Begins on fol. 19 of the MS. described under No. 1534.

Incomplete.

Similar to the work described under No. 12016 ante.

Beginning:

अद्य धारा निराधारा निरालम्बा सरस्वती ।
पण्डिताः खण्डिताः सर्वे भोजराजे दिवं गते ॥
यौवनं धनसम्पत्तिः प्रभुत्वमविवेकिता ।
एकैकमप्यनर्थाय किमु यत्र चतुष्टयम् ॥
आदिकाले भवेच्छत्रुः कार्यार्थे मित्रबान्धवाः ।
उभयोः कार्यसिद्ध्यर्थं यूयं यूयं वयं वयम् ॥

End:

द्यूतं मांसं सुरा वेश्याखेटे जाया पराङ्गना ।
महापापानि सप्तति व्यसनानि त्यजेद्बुधः ॥

No. **14834.** प्रक्रियासङ्ग्रहः.
PRAKRIYĀSAṄGRAHAḤ.

Pages, 6. Lines, 6 on a page.

Begins on fol. 3*b* of the MS. described under No. 1534.

Incomplete.

Same work as that described under No. 1534 ante.

No. **14835.** कृष्णजयन्तीव्रतपूजाविधानम्.
KṚṢṆAJAYANTĪVRATAPŪJĀVIDHĀNAM.

Pages, 4. Lines, 6 on a page.

Begins on fol. 21*a* of the MS. described under No. 4168.

Complete.

Same work as that described under No. 8267 ante.

No. **14836.** कारिकावलीव्याख्या—मुक्तावली.
KĀRIKĀVALĪVYĀKHYĀ : MUKTĀVALĪ.

Substance, palm-leaf. Size, $18\frac{1}{2} \times 1\frac{1}{4}$ inches. Pages, 72. Lines, 8 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Complete.

Same work as that described under No. 3939 ante.

No. **14837.** कारिकावलीव्याख्या—मुक्तावली.
KĀRIKĀVALĪVYĀKHYĀ : MUKTĀVALĪ.

Substance, palm-leaf. Size, $16\frac{3}{4} \times 1\frac{1}{4}$ inches. Pages, 42. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

Contains the Pratyakṣakhaṇḍa incomplete.

Same work as that described under No. 3939 ante.

No. **14838.** तर्कसङ्ग्रहचन्द्रिका.
TARKASAṄGRAHACANDRIKĀ.

Substance, palm-leaf. Size, $17 \times 1\frac{1}{2}$ inches. Pages, 34. Lines, 9 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other work herein is Dharmaśāstravacanāni 18*a*.

Breaks off in the Anumānakhaṇḍa.

Same work as that described under No. 4153 ante.

No. **14839.** धर्मशास्त्रवचनानि.
DHARMAŚĀSTRAVACANĀNI.

Pages, 2. Lines, 9 on a page.

Begins on fol. 18 of the MS. described under the previous number.

Incomplete.

An example to illustrate the validity of a deathbed gift made by a person to his sister's son of the ancestral kingdom partitioned by him from his step-brother.

Beginning:

इह खलु कश्चिद्वैमात्रेयेण भ्रात्रा विभक्तराज्यस्स्वकीयं राज्यं भागिनेयाधीनं कृत्वा (त्रि)विष्ट(पं) गतः ; तत्र वैमात्रेयो भ्राता विवदते—क्रमायाते राज्ये मयि सन्निहिते तिष्ठति मद्भ्रातुरन्याधीनत्वकरणेऽन्यस्य तद्ग्रहणे च नाधिकार इति ।

End:

तस्मात्प्रकृत भागिनेयस्य मातुलस्वामिकराज्ये स्वाम्यं शास्त्रसम्मतमेवेति सुधीभिर्विभावनीयम् ॥

No. **14840.** अन्यापदेशः.
ANYĀPADĒŚAḤ.

Pages, 5. Lines, 5 on a page.

Begins on fol. 52*a* of the MS. described under No. 4005.
Incomplete.
Similar to the work described under No. 11992 ante.

Beginning :

किञ्चित्तं मामकं चित्तं हारिणं चिद्धिहारिणम् ।
निर्मलं भजताद्येन मत्कृतिस्सचमत्कृतिः ॥

* * * *

युष्मद्योगे मध्यमं विद्धि स त्वमस्मद्योगे तूत्तमं वेद्मि सोऽहम् ।
शेषाशेषश्रीभवन्मुख्ययोगे विन्दन्त्वाद्यं पूरुषं मां भवन्तः ॥

* * * *

गतसत्प्रत्ययो विद्वान् परेण वसुना भवेत् ।
सत्सङ्गेऽपि गुणाभावे ह्यसत्सङ्गे गुणः कुतः ॥

End :

गुणवति गुणि(ण)मात्रग्राहकत्वेन लोके गणयति च रसज्ञन्यायतस्त्वं गृहाण ।
सरसपदनिरूढं वृत्तमास्ते रसालं परिणतसहकारं चानयोस्तत्त्वमन्तः ॥

No. **14841.** जैनमन्त्रः.
JAINAMANTRAḤ.

Pages, 2. Lines, 8 on a page. Character, Kanarese.

Begins on fol. 138*a* of the MS. described under No. 1535.
Incomplete.
A Mantra in praise of Jina.

Beginning :

ओं ह्रीं अष्टमनन्दीश्वरद्वीपे पूर्वदिशा वराञ्जनगिरिस्थितजिनचैत्यचैत्यालयेभ्यो जलं निर्वपामीति स्वाहा ।

ओं अष्टमनन्दीश्वरद्वीपे पूर्वाञ्जनपूर्वदधिमुखगिरिस्थित जिनचैत्य—नि ।

End :

ओं अष्टमनन्दीश्वरदीपे दक्षिणाञ्जन दक्षिणविरजस्सरोवरबाह्यकोणप्रथमरतिकर गिरिस्थित ।

ओं अष्टमनन्दीश्वरद्वीपे दक्षिणाञ्जन दक्षिणविरजस्सरोवरबाह्यकोणद्वितीयरतिकर गिरिस्थित.

No. 14842. समासवादार्थः. SAMĀSAVĀDĀRTHAḤ.

Pages, 38. Lines, 6 on a page.

Begins on fol. 13*a* of the MS. described under No. 3927.

Complete.

A discussion on the nature of compounds in Sanskrit: by Jayarāmapañcānana, who has also written the Padārthamālā (D.C.S. No. 4267) and the Kārakavādārtha (R. No. 114(*c*) of the Sanskrit Triennial Catalogue of MSS., Vol. I, Part A).

Beginning:

न्यायपञ्चाननः श्रीमान् जयरामस्समासतः ।
समासतत्त्वमाचष्टे विबुधानां सुधोपमम् ॥

तत्र समासत्वं विभक्तिशून्यपूर्वपदकनामसमुदायत्वम् । दधि मधुरमित्यादौ भावनान्वये प्रथमान्तपदोपस्थितेः प्रयोजकत्वेन लुप्तविभक्तेरसत्त्वाददोषः । नीलोत्पलमित्यादिसमासे तु विभक्तिर्व्यर्था । न हि राजपुरुष इत्यादौ लुप्तषष्ठ्यादिस्मृत्या शाब्दबोधः ।

End:

विभक्तिरेव वा लक्षणया स्त्रीत्वस्यापि बोधिका । ब्राह्मणपदमव वा शक्त्या ब्राह्मणत्वेन लक्षणया ब्राह्मणीत्वेन बोधकमेवं हरीत्यादावपि । शिवौ नमस्कुर्यादिति पदो(पात्त) शिवपदं लक्षणया शिवदुर्गान्यतरत्वेन, किं वा शक्त्या शिवत्वेन, लक्षणया दुर्गात्वेन बोधकमेवमन्यत्राप्यूह्यमिति गतिः ॥

Colophon:

समासवादार्थस्समाप्तः ॥

No. 14843. कारणतावादार्थः. KĀRAṆATĀVĀDĀRTHAḤ.

Pages, 24. Lines, 6 on a page.

Begins on fol. 30*a* of the MS. described under No. 3927.

Incomplete.

A discussion on the nature of causation in Nyāya philosophy.

Beginning:

ननु घटत्वावच्छिन्नकार्यतानिरूपितकरणतावच्छेदकत्वं दण्डत्वस्य न सम्भवति । स्वरूपायोग्यातिकोमलदण्डादावपि घटोत्पत्त्यापत्तेः । न च स्व-

दण्डत्वेन कारणत्वं वक्तव्यमिति वाच्यम् । दार्ढ्यस्य निर्वक्तुमशक्यत्वात् । ननु चात्र अभिजनकत्वमेव दार्ढ्यं तथा च तेनैव रूपेण कारणत्वमस्तु बाधकाभावात् ।

End:

क्लृप्तेनाक्लृप्तेन वा गुरुधर्मेण कारणत्वे सुवदे बहुतराजनकसाधारणधर्मेण कारणत्वकल्पनानुदयवदल्पतरकार्य

* * * *

गुरुधर्मेण कार्यत्वस्याप्यकल्पनाद्युक्तिसामान्यादिति समासः ॥

No. 14844. गदाधरीयव्याख्या.
GADĀDHARĪYAVYĀKHYĀ.

Pages, 2. Lines, 9 on a page.

Begins on fol. 62*a* of the MS. described under No. 4053.

Contains the Pañcalakṣaṇī incomplete.

Same work as that described under No. 4077 ante.

No. 14845. ज्यौतिषविषयः.
JYAUTIṢAVIṢAYAḤ.

Page, 1. Lines, 10 on a page.

Begins on fol. 44*a* of the MS. described under No. 4423.

Incomplete.

Similar to the work described under No. 13746 ante.

Beginning:

अश्वीमृगशिरो रज्जुः हस्तामित्रं तथैव च ।
वैश्यं(श्वं) शतभिषं चैव रव्यादीनां यथा क्रमः(म्) ॥
आनन्दः कालदण्डश्च धूम्रः प्राजापतिस्तथा? ।
साम्यो ध्वाङ्क्षो ध्वजश्चैव श्रीवत्सो वज्रमुन्नतौ ॥

End:

शुभम्, रोगम्, घोरम्, अमृतम्, रोगम्, शुभम्, रोगम्, लाभम् ।

No. 14846. अध्वरदीक्षाप्रायश्चित्तम्.
ADHVARADĪKṢĀPRĀYAŚCITTAM.

Pages, 8. Lines, 4 on a page.

Begins on fol. 71*a* of the MS. described under No. 4457

Incomplete.

On the expiatory ceremony to be performed by one who has undertaken to perform a certain Yajña. This procedure is intended to avert all the sins caused by uttering falsehood, etc.

Beginning :

अध्वरदीक्षा—तस्यामनृतवचनादिनिमित्तकप्रायश्चित्तानि व्याख्यास्यामः । यद्यप्यत्र शिवाः प्रीता इत्येवमादीनां केषाञ्चिन्मन्त्राणां नित्यत्वेन न प्रायश्चित्तरूपत्वं ; तथापि प्रायश्चित्तार्थानां मन्त्राणां बहुत्वात् प्रायश्चित्तानि व्याख्यास्याम इत्युक्तम् । दीक्षितश्चेदनृतं वदेत् । अनृतशब्देन शब्दानृतमर्थानृतमपि संगृहीतम् । यदि प्रमादादनृतं वदेत् । तदेमं मे वरुणेत्यादिवरुणदेवताकाः चतस्र ऋचो जपेत् ।

End :

अत्र राजासन्द्याहवनीयान्तरालगमनमृत्विजां परिकर्मिणां संभवतीति तान् प्रत्ययं निषेधः । आयुधपाण्यभिसर्पणनिषेधस्तु यज्ञविघ्नकारिचोरादिनिवर्तकराजकीयपुरुषाभिप्रायेण ; सदण्डसच्छत्रसोष्णीषसोपानत्कानुप्रपदननिषेधस्तु . . . . . .

No. 14847. शक्तिपदार्थखण्डनव्याख्या.

ŚAKTIPADĀRTHAKHAṆḌANAVYAKHYĀ.

Pages, 2. Lines, 11 on a page.

Begins on fol. 18*a* of the MS. described under No. 4 ı 11.

Wants the beginning and the end.

A commentary on a work which unfavourably criticises the theory that Śakti is a separate category.

Beginning :

प्रसङ्गादाह । कार्येणेति । यथा क्षित्यादिलक्षणकार्यानुपपत्तिः ईश्वरानुमानम् । तथा दाहादिलक्षणकार्यानुपपत्तिः शक्तौ मानमित्यर्थः । अनुमीयतइति नैयायिकदृशा उपदर्शिता । अर्थापत्तेः स्वयं तेन स्वीकारादिति ध्येयम् । नन्वेवं न कार्येण तदुन्नयनं किन्तु कार्याभावेनेत्यत आह । व्यतिरेकेति ।

End :

उभयसत्त्वे उत्तेजकप्रतिबन्धकसत्त्वे । तच्चेति । कारणत्वमित्यर्थः । मणिसद्भाव इति । उत्तेजकाभावविशिष्टमणिसद्भाव इत्यर्थः । प्रतियोगीति ।

यद्यपि प्रतियोगिभेदस्थले प्रतियोगितावच्छेदकभेदस्यावश्यकत्वात् तद्भेदादेव भेदः, तथापि प्रतियोगिभेदो यथा अभावभेदव्याप्यः तथा प्रतियोगितावच्छेदकभेदोऽपीत्यर्थः । केवलदण्डसत्त्वे उभयाभावः दण्डपुरुषसद्भावे विशेषणाभाव उभयाभावे.

No. 14848. योगरूढिनिरूपणम्.
YŌGARŪḌHINIRŪPAṆAM.

Pages, 2. Lines, 11 on a page.

Begins on fol. 19*a* of the MS. described under No. 4411.

Wants the beginning and the end.

Similar to the work described under No. 4277 ante.

Beginning:

एवं पङ्कजपदान्नियमेन प्रतीयमानपद्मत्वविशिष्टे पङ्कजपदशक्तिरिति स्थिते विप्रतिपत्तिः—पद्मत्वविशिष्टशक्तत्वं पङ्कजपदसमुदायवृत्ति न वेति । तत्र समुदायशक्त्यनङ्गीकारे योगेन पङ्कजनिकर्तृत्व(विशिष्ट)विषयकेण पद्मत्वविशिष्टोपस्थित्ययोगात् कुमुदादिसाधारण्य(ण्येन)योगार्थान्वयबोधप्रसङ्गाच्च रूढिरभ्युपेया ।

End:

पङ्कजपदस्य पद्मत्वविशिष्टे किं स्मरणार्थमनुभवार्थं वा शक्तिः? नाद्यः संस्कारं विनैव स्मृतेरभावात् । पदजन्यत्वस्य तत्र तन्त्रत्वात्, नान्त्यः । अवयवैरेव तत्सम्भवात् । अत एव घटादिप्रतिबन्दी नानुभवार्थं तत्र शक्त्यावश्यकत्वात् । नन्वनुभवार्थे . . . .

No 14849. शुक्लयजुस्संहिता (काण्वशाखीया).
ŚUKLAYAJUSSAṀHITĀ (KĀṆVAŚĀKHĪYĀ).

Substance, pam-leaf. Size, $17\frac{5}{8} \times 1\frac{1}{2}$ inches. Pages, 254. Lines, 5 on a page. Character, Oriya. Condition, slightly injured. Appearance, old.

Contains the Adhyāyas 1 to 41 complete.

Sāyaṇācārya's Kāṇvasaṁhitābhāṣya, described under R. No. 2396(*b*) of the Triennial Catalogue, Vol. II, Part I-B, is a commentary upon this work.

No. 14850. याज्ञवल्क्यस्मृतिः.

YĀJÑAVALKYASMṚTIḤ.

Substance, palm-leaf. Size, 16 × 1½ inches. Pages, 110. Lines, 7 on a page. Character, Oriya. Condition, slightly injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Pañcākṣarīmantrakalpa 56*a*.

Complete in three Kāṇḍas.

Same work as that described under No. 2676 ante.

No. 14851. पञ्चाक्षरीमन्त्रकल्पः.

PAÑCĀKṢARĪMANTRAKALPAḤ.

Pages, 3. Lines, 7 on a page.

Begins on fol. 56*a* of the MS. described under the previous number.

Incomplete.

Same work as that described under Nos. 6571 to 6574 ante.

No. 14852. सरस्वतीस्तोत्रम्.

SARASVATĪSTŌTRAM.

Pages, 5. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 411.

Wants the beginning; otherwise complete.

Same work as that described under No. 11306 ante.

No. 14853. मातङ्गीस्तोत्रम्.

MĀTAṄGĪSTŌTRAM.

Page, 1. Lines, 5 on a page.

Begins on fol. 3*a* of the MS. described under No. 411.

Similar to the work described under No. 10810 ante.

Beginning and End:

मातङ्गीं मधुपानमत्तनयनां मातङ्गसञ्चारिणीं
कुम्भीकुम्भविवृत्तपीवरकुचां कुम्भादिपात्राञ्चिताम् ।
ध्यायेऽहं मधुमारणैकसहजां ध्यातुस्सुपुत्रप्रदां
शर्वाणीं सुरसिद्धसाध्यवनितासंसेविता पादुकाम् ॥

मातङ्गी महिषादिराक्षसकृतध्वान्तैकदीपो मणिः
मन्वादिस्तुतमन्त्रराजविलसत्सद्भक्तचिन्तामणिः ।
श्रीमत्कौलिकदानहास्यरचनाचातुर्यराकामणिः
देवि त्वं हृदये वसाद्य महिमे मद्भाग्यरक्षामणिः ॥

No. **14854.** कौलाचारविषयः.
KAULĀCĀRAVIṢAYAḤ.

Pages, 2. Lines, 5 on a page.

Begins on fol. 4*a* of the MS. described under No. 411.

Incomplete.

On the procedure to be adopted by the Kaula sect of Śāktas in connection with the worship of the goddess Śakti.

Beginning:

अत्रेदमनुसन्धेयम्—प्रधानकाल्युपासकानां मते—

कौलिकान् शतचन्द्रेण पिधाय च निधाय च ।
खड्गशूलगदाभिश्च पशून् हत्वा वशङ्करी ॥ इत्युक्तम् ।

तद्वामाचारप्रयुक्तध्यानम् । तस्मादेव प्रधान . . . - . . . वा राध्य इति प्रसिद्धम् । अत एव कौलास्त्रिकोणे नित्यं बिन्दुं समर्चयन्ति.

End:

प्रधानप्रकृतिरूपाः श्रीविद्याप्रधानाः काल्यादयः अङ्गत्वेनोपास्याः । तत्रापि वैदिकमार्गेण तदेव प्रधानं चेद्वेदमार्गं भवति । वाममार्गस्याति-हेयताप्रसङ्गात् सर्वतन्त्रस्वतन्त्रानुक्तत्वाच्च । चतुष्षष्टित . . . . अङ्गत्वेनोपास्या । चतुष्षष्टितन्त्राणि तु ।

No. **14855.** शिवस्तोत्रम्.
ŚIVASTŌTRAM.

Page, 1. Lines, 5 on a page.

Begins on fol. 5*a* of the MS. described under No. 411.

Similar to the work described under No. 11222 ante.

Beginning and **End**:

बिभ्रद्दोर्भिः कुठारं मृगमभयवरौ सुप्रसन्नो महेशः
सर्पालङ्कारदीप्तः सरसिजनिलयः पार्वतीवामभागः ।

पेये(ध्येयो) मुक्ताकलापामृतरसरजताद्रिप्रभः पञ्चवक्त्रः
त्र्यक्षः कोटीरकोटीघटिततुहिनरोचिष्णुगृत्तुङ्गमौलिः ॥
वामाङ्कन्यस्तवामेतरकरकमलायास्तथा वामबाहुं
कृत्वा रक्तोत्पलायास्स्तनविधृतलसद्धामबाहु(:) प्रियायाः ।
सर्वाकल्पाभिरामो धृतपरशुमृगेष्वाश्व(स)नः काञ्चनाभः
ध्येयः पद्मासनस्थः स्मरललितवपुः सम्पदे पार्वतीशः ॥

No. 14856. शिवार्चनाश्लोकाः.
ŚIVĀRCANAŚLŌKĀḤ.

Page, 1. Lines, 5 on a page.

Begins on fol. 5*b* of the MS. described under No. 411.

Incomplete.

Verses giving the manner of worshipping Śiva conceived as having five faces and names called Tatpuruṣa, Aghōra, Sadyōjāta, Vāmadēva and Īsāna, in the quarters east, south, west, north and upper region or sky.

Beginning:

तत्पुरुषेणेति पूर्वं च अघोरेति च दक्षिणम् ।
सद्योजातं पश्चिमं च वामदेवं तथोत्तरम् ॥
ईशानं मूर्धनीत्याहुः मुखाः पञ्च इति स्मृताः ।
नार्चयेदग्रतश्शम्भोश्चोत्तरे दोषिताश्रयम् ॥
पश्चिमे पृष्ठभागं स्याद्दक्षिणेऽभीष्टमर्चयेत् ।

End:

चरे स्थिरे वा लिङ्गे वा सोमसूत्रमुदङ्मुखम् ।
अन्यथा अर्चनं कुर्यात्स नरः पतितो भवेत् ॥
अधमो मृगतृष्णावत् मध्यमो रज्जुसर्पवत् ।
उत्तमस्त्वधिकं दृश्यं खपुष्पमिति मन्यते ॥

No. 14857. चित्ररत्नाकरः.
CITRARATNĀKARAḤ.

Pages, 4. Lines, 5 on a page.

Begins on fol. 9*a* of the MS. described under No. 411.

Incomplete.

Same work as that described under No. 12045 ante.

No. **14858.** कालाग्निरुद्रोपनिषत्.
KĀLĀGNIRUDRŌPANIṢAḌ.

Pages, 2. Lines, 8 on a page.

Begins on fol. 39*a* of the MS. described under No. 534.

Complete.

Same work as that described under No. 356 ante.

No. **14859.** माण्डूक्योपनिषत्.
MĀṆḌŪKYŌPANIṢAD.

Pages, 3. Lines, 8 on a page.

Begins on fol. 396 of the MS. described under No. 534.

Complete.

Same work as that described under No. 694 ante.

No. **14860.** दृग्दृश्यविवेकः.
DṚGDṚŚYAVIVĒKAḤ.

Pages, 3. Lines, 8 on a page.

Begins on fol. 42*b* of the MS. described under No. 534.

Incomplete.

Same work as that described under No. 4608 ante.

No **14861.** अतिवर्णाश्रमिव्याख्यानम्.
ATIVARṆĀŚRAMIVYĀKHYĀNAM.

Pages, 2. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 4579.

Incomplete.

A commentary on the work Ativarṇāśramī which is a treatise on the duties of a peculiar ascetic order which is not bound by any hard and fast rules ordinarily enjoined to be observed by ascetics.

Beginning:

अतिवर्णाश्रमीति प्रतिज्ञातं तस्य सर्वोत्कर्षमुपपादयितुं तल्लक्षणमाह—शरीरेति । विजानाति विशेषेण जानाति साक्षात्करोतीत्यर्थः । इत्थंभूतो हि लोकसंग्रहाय वर्णाश्रमधर्मादीनाचरन्ननाचरन्वा सर्वोत्तमत्वेन गुरोर्वेत्यर्थः । तादृशस्यापि तदाचरणं संभवति ।

सक्ताः कर्मण्यविद्वांसो यथा कुर्वन्ति भारत ।
कुर्याद्विद्वांस्तथासक्तश्चिकीर्षुर्लोकसंग्रहम् ॥ इति ॥

यो वेदान्तेति । तं त्वौपानिषदामिति श्रुतेः परतत्त्वसाक्षात्कारस्य मनन-निदिध्यासनाङ्गनिबन्धनत्वाद्वेदानधिकृतानां भाषादिमुखेन ज्ञानमपि क्रमेण वेदाधिकारप्राप्तिद्वारेणैवोपकारकमितीदं प्रागुक्तम् ।

End:

ननु वर्णाश्रमाचारा(ति)क्रमश्चेदित्थमुत्कर्षकारणे जितं पाषण्डैरित्यत आह—यस्य वर्णाश्रमेति । तत्त्वसाक्षात्कारेण विगलितदेहाद्यात्मत्वाभिमानो देहेन सहैव तद्धर्माणां वर्णाश्रमाणामतिक्रमादतिवर्णाश्रमी.

No. **14862.** पञ्चीकरणम्.
PAÑCĪKARAṆAM.

Pages, 2. Lines, 7 on a page.

Begins on fol. 94*a* of the MS. described under No. 4753.

Incomplete.

Same work as that described under No. 4635 ante.

No. **14863.** शरभमालामन्त्रः.
ŚARABHAMĀLĀMANTRAḤ.

Pages, 6. Lines, 5 on a page.

Begins on fol. 93*b* of the MS. described under No. 4369.

Complete.

Similar to the work described under No. 7330 ante.

Beginning:

ओं ह्रीं वीरशरभाय उग्ररूपाय उग्रमाताय उग्रदंष्ट्राय उग्रनेत्राय दक्षध्वंसनाय नागसिंहहरणाय शतसहस्रकोटिब्रह्मकपालप्रज्वलिताचिताय

End:

आवेशय आवेशय हिङ्कारभूतप्रेतपिशाचग्रहसंहरणाय त्रिषहस्रनेत्राय ध्वजसहस्रभुजाय हुं फट् स्वाहा ।

No. **14864.** दक्षिणकालिकामन्त्रः.
DAKṢIṆAKĀLIKĀMANTRAḤ.

Pages, 3. Lines, 5 on a page.

Begins on fol. 97*a* of the MS. described under No. 4369.

Complete.

Similar to the work described under No. 6355 ante.

Beginning:

अस्य श्रीदक्षिणकालिकामन्त्रस्य महाकालभैरव ऋषिः, त्रिष्टुप् छन्दः, अनिरुद्धसरस्वतीश्रीदक्षिणकालिका देवता । ह्रीं बीजं, हूं शक्तिः, क्रीं कीलकं, प्रसादसिद्ध्यर्थे जपे विनियोगः.

End:

विपरीतरता तत्र कालिका हृदयोपरि ।
पेयं खाद्यं च चोष्यं च तान्दत्वा(द्या)त्तु परस्परम् ॥

ओं क्रीं हूं ह्रीं दक्षिणकालिके क्रीं हुं ह्रीं स्वाहा ।

अथ महाकालमन्त्र —

ओं ह्रीं क्ष्रीं हूं महाकालाय ह्रौं महादेवाय क्रौं कालिकायै ह्रूं नमः.

No. 14865. गुरुपादुकापञ्चकस्तोत्रम्.

GURUPĀDUKĀPAÑCAKASTŌTRAM.

Pages, 2. Lines, 4 on a page.

Begins on fol. 10a of the MS. described under No. 4369.

Complete.

Same work as that described under No. 10882 ante, but with the additional stanzas and different colophon as given below:—

श्रीसाम्बगुरुवर्याद्यां शङ्कराचार्यमध्यमाम् ।
अस्मदाचार्यपर्यन्तां वन्दे गुरुपरम्पराम् ॥

पाशाङ्कुशधनुर्बाणपाणिमर्कायुतप्रभाम् ।
किंशुकाभांशुकां देवीं देशिकावलिमाश्रये ॥

* *

नित्यानन्दं परमसुखदं केवलं ज्ञानमूर्तिं
विश्वातीतं गगनसदृशं तत्त्वमस्यादिलक्ष्यम् ।
एकं नित्यं विमलमचलं सर्वधीसाक्षिभूतं
भावातीतं त्रिगुणरहितं सद्गुरुं तं नमामि ॥

इति गुरुपादुकां स्मृत्वा अजपां कुर्यात् ॥

No. 14866. अजपागायत्री.
AJAPĀGĀYATTRĪ.

Pages, 8. Lines, 7 on a page.

Begins on fol. 99*b* of the MS. described under No. 4543.

Complete.

Same work as that described under No. 5852 ante, but with slight difference in the beginning and the end.

Beginning:

अस्य श्री अजपागायत्रीमन्त्रस्य हंस ऋषिः, अव्यक्तगायत्री छन्दः, परमहंसो देवता, हं बीजम्, सः शक्तिः, सोऽहं कीलकम्, मम स्वरूपस्फूर्तिप्रतिबन्धकमूलाज्ञाननिवृत्त्यर्थे जपे विनियोगः । हं सां सूर्यात्मने हृदयाय नमः । हं सीं वह्न्यात्मने शिरसे स्वाहा । हं सूं सोमात्मने शिखायै वषट्, हं सैं प्रत्यग्ज्योतिरात्मने कवचाय हुम् । हं सौं विज्ञानज्योतिरात्मने नेत्रत्रयाय वौषट् । हं सः परमात्मने अस्त्राय फट् । ध्यानम्—

अग्निष्टोमगरुद्द्वयं प्रणवकं काल(बिन्दु)त्रिनेत्रोज्वलं
भास्वद्रुद्रमुखं शिवाङ्घ्रियुगलं पार्श्वस्थसोमानलम् ।
उद्यद्भास्करकोटिकोटिसदृशं हंसं जगद्व्यापिनं
शब्दब्रह्ममयं हृदम्बुजपुटे ईडे सदा संस्मरे ॥

End:

आं ह्रीं क्रों यरलवशषसहों मम सर्वेन्द्रियाणि वाङ्मनश्चक्षुःश्रोत्रजिह्वाघ्राणवाक्पाणिपादपायूपस्थतद्विषयास्सुखं चिरं तिष्ठन्तु स्वाहा । इति प्राणप्रतिष्ठामन्त्रः । अथाग्निप्रकारास्सप्त कुर्वाणाः रमिति सप्तवारमभिमन्त्र्यात्मनस्सप्तप्रकारवेष्टनं कुर्यात् ॥

No. 14867 अन्तर्मातृकासरस्वतीमन्त्रः.
ANTARMĀTṚKĀSARASVATĪMANTRAḤ.

Pages, 2. Lines, 7 on a page.

Begins on fol. 103*a* of the MS. described under No. 4543.

Complete.

Slightly different from the work described under No. 5872 ante, but with different Dhyānaślōkas.

Beginning :

अथ मातृकान्यासाः ।

अस्यान्तर्मातृकासरस्वतीमन्त्रस्य ब्रह्मा ऋषिः, गायत्री छन्दः, अन्तर्मातृकासरस्वती देवता । हलो बीजानि, स्वराश्शक्तयः, मम समस्तपापक्षयार्थे अन्तश्शुद्ध्यर्थे विनियोगः ।

End :

शुद्धं बिन्दुयुतं विसर्गसहितं ह्लेखया श्रीयुतं
बालासंपुटितं तथैव परया श्रीविद्ययालङ्कृतम् ।
आरोहादवरोहतश्च कुरुते न्यासं पुनर्हंसकं
मालिन्या दशधा विभज्य क्रमशस्स्यात्सृष्टिविध्वंसकः ॥

No 14868. शुद्धमातृकामन्त्रः.
ŚUDDHAMĀTṚKĀMANTRAḤ.

Pages, 2. Lines, 7 on a page.

Begins on fol. 103*b* of the MS. described under No. 4543.

Complete.

Similar to the work described under No. 7407 ante.

Beginning

अस्य शुद्धमातृकामन्त्रस्य ब्रह्मा ऋषिः, गायत्री छन्दः, शुद्धमातृका देवता । हलो बीजानि, स्वराश्शक्तयः, आत्मशुद्धौ विनियोगः । अं कं ङं आं हृदि, इं चं ञं ईं शिरसि ।

End :

षं मज्जात्मने नमः । सं शुक्रात्मने नमः । हं प्राणात्मने नमः, ळं जीवात्मने नमः । क्षं परमात्मने नमः । इति व्यापयेत् ॥

No. 14869. बिन्दुमातृकामन्त्रः.
BINDUMĀTṚKĀMANTRAḤ.

Page, 1. Lines, 7 on a page.

Begins on fol. 104*a* of the MS. described under No. 4543.

Complete.

Similar to the work described under No. 6778 ante.

Beginning :

अस्य बिन्दुमातृकायाः ब्रह्मा ऋषिः, देवी गायत्री छन्दः, बिन्दुमातृकासरस्वती देवता । हलो बीजानि, स्वराश्शक्तयः । विनियोगः ।

End :

अं अं नमः । आं आं नमः । कं कं नमः । मं मं नमः । यं त्वगात्मने नमः । क्षं परमात्मने नमः । इति व्यापयेत् ॥

No. 14870. विसर्गमातृकामन्त्रः
VISARGAMĀTṚKĀMANTRAḤ.

Page, 1. Lines, 7 on a page.

Begins on fol. 104*a* of the MS. described under No. 4543.

Complete.

Similar to the work described under No. 7246 ante.

Beginning :

अस्या विसर्गमातृकायाः, ब्रह्मा ऋषिः, गायत्री छन्दः, मातृका देवता । हलो बीजानि, स्वराश्शक्तयः, विनियोगः, शेषं पूर्ववत् ।

End :

मः मः नमः । यः त्वगात्मने नमः । क्षः परमात्मने नमः ॥

No. 14871. हृल्लेखामातृकामन्त्रः.
HṚLLEKHĀMĀTṚKĀMANTRAḤ.

Page, 1. Lines, 7 on a page.

Begins on fol. 104*b* of the MS. described under No. 4543.

Complete.

Similar to the work described under No. 7729 ante.

Beginning and the **End** :

अस्य हृल्लेखामातृकायाः शक्तिः ऋषिः, गायत्री छन्दः, मातृका देवता, हलो बीजानि, स्वराश्शक्तयः, विनियोगः । ह्रां हृत् । ह्रीं शिरः । ह्रूं शिखायै । ह्रैं कवचं, ह्रौं नेत्रं, ह्रः अस्त्रम् । दिग्बन्धः । शेषं पूर्ववत् । ह्रीं अं नमः । ह्रीं कं नमः । ह्रीं मं नमः । ह्रीं यं त्वगात्मने नमः । ह्रीं क्षं परमात्मने नमः ॥

No 14872. कमलामातृकामन्त्रः.
KAMALĀMĀTṚKĀMANTRAḤ.

Page, 1. Lines, 7 on a page

Begins on fol. 104*b* of the MS. described under No. 4543.

Complete.

Similar to the work described under No 7435 ante.

Beginning :

अस्याः कमलामातृकायाः भृगुः ऋषिः, पङ्क्तिश्छन्दः, कमलामातृका देवता, श्रां बीजम्, श्रीं शक्तिः, श्रूं कीलकम्, विनियोगः ।

End:

श्रीं कं नमः, श्रीं मं नमः, श्रीं यं त्वगात्मने नमः । श्रीं क्षं परमात्मने नमः । इति व्यापयेत् ॥

No. **14873.** बालासंपुटितमातृकामन्त्रः.

BĀLĀSAMPUṬITAMĀTṚKĀMANTRAḤ.

Pages, 2. Lines, 7 on a page.

Begins on fol. 104*b* of the MS. described under No. 4543.

Complete.

Similar to the work described under No. 6773 ante.

Beginning:

अस्या बालासंपुटितमातृकायाः दक्षिणामूर्तिः ऋषिः, पङ्क्तिश्छन्दः, बाला सरस्वती देवता । हलो बीजानि, स्वराः शक्तयः, बिन्दवः कीलकम्, विनियोगः ।

End:

यं ऐं क्लीं सौः यं त्वगात्मने नमः, रं ऐं क्लीं सौः रं असृगात्मने नमः, क्षं ऐं क्लीं सौः क्षं परमात्मने नमः ॥

No. **14874.** परामातृकामन्त्रः.

PARĀMĀTṚKĀMANTRAḤ.

Page, 1. Lines, 7 on a page.

Begins on fol. 105*a* of the MS. described under No. 4543.

Complete.

Similar to the work described under No. 6593 ante.

Beginning:

अस्य श्रीपरामातृकायाः ब्रह्मा ऋषिः, गायत्री छन्दः, परासरस्वती देवता, सां बीजम्, सौः शक्तिः, सूं कीलकम्, सकलेष्टार्थसिद्ध्यर्थे जपे विनियोगः ।

End:

सौः अं नमः, सौः आं नमः, सौः कं नमः, सौः मं नमः, सौः यं त्वगात्मने नमः, सौः क्षं क्षं परमात्मने नमः ॥

No. **14875.** श्रीविद्यामातृकामन्त्रः.

ŚRĪVIDYAMĀTṚKĀMANTRAḤ.

Page, 1. Lines, 7 on a page

Begins on fol. 105*a* of the MS. described under No. 4543.

Complete.

Similar to the work described under No. 7271 ante.

Beginning :

अस्याः श्रीविद्यामातृकायाः आनन्दभैरव ऋषिः, गायत्री छन्दः, श्रीविद्यासरस्वती देवता, ऐं कएईलह्रीं बीजम् , क्लीं हसकहलह्रीं शक्तिः, सौः सकलह्रीं कीलकम् , जपे विनियोगः ॥

End :

कएईलह्रीं हसकहलह्रीं सकलह्रीं यं त्वगात्मने नमः । कएईलह्रीं हसकहलह्रीं सकलह्रीं क्षं परमात्मने नमः ॥

No **14876.** आरोहावरोहश्रीविद्यामातृकामन्त्रः.

ĀRŌHĀVARŌHAŚRĪVIDYĀMĀTṚKĀMANTRAḤ.

Page, 1. Lines, 7 on a page.

Begins on fol. 105*b* of the MS. described under No. 4548.

Complete.

On the ceremonial touching of certain parts of the body while repeating the Mantra-formulas relating to Goddess Śakti, along with the successive letters of the alphabet in the natural as well as in the reverse order.

Beginning and the **End :**

अस्या आरोहावरोहमातृकायाः स्वच्छन्दभैरव ऋषिः, अव्यक्तगायत्री छन्दः, मातृका देवता, हलो बीजानि, स्वराश्शक्तयः, ... विनियोगः । शेषं पूर्ववत् । अं . . . क्षं, क्षं . . . अं नमः—इति व्यापयेत् ॥

No. **14877.** हंसमातृकामन्त्रः.

HAṀSAMĀTṚKĀMANTRAḤ.

Page, 1. Lines, 7 on a page.

Begins on fol. 105*b* of the MS described under No. 4548.

Complete.

Similar to the work described under No 7619 ante.

Beginning :

अस्या हंसमातृकायाः ब्रह्मा ऋषिः, देवी गायत्री छन्दः, हंसमातृकासरस्वती देवता, हं बीजं, सः शक्तिः, सोहं कीलकम् , ओङ्कारस्तात्पर्यम् , नभस्थानमुदात्तस्वरः । विनियोगः ।

End:

हंसस्सोहं क्ष्र परमात्मने नमः । इति व्यापयेत् । अं मध्यमाभ्यां नमः । आं अनामिकाभ्यां नमः, सौः कनिष्ठिकाभ्यां नमः,

* * *

इति करशुद्धिं कृत्वा संविदं स्वीकृत्य जपं कुर्यात् ॥

No. **14878.** महात्रिपुरसुन्दरीमहामन्त्रः.

MAHĀTRIPURASUNDARĪMAHĀMANTRAḤ.

Pages, 2. Lines, 7 on a page.

Begins on fol. 106*a* of the MS. described under No. 4543.

Complete.

Similar to the work described under No. 6890 ante.

Beginning:

अस्य श्रीमहात्रिपुरसुन्दरीमहामन्त्रस्य आनन्दभैरव ऋषिः, देवी गायत्री छन्दः, ऐं बीजम्, क्लीं शक्तिः, सौः कीलकम्, मम मोक्षार्थे जपे विनियोगः ।

End:

जपान्ते च ऋषिच्छन्दोदेवताबीजशक्तिकीलककराङ्गन्यासध्यानादिकं कृत्वा दशपञ्चमुद्राः प्रदर्श्य निर्याणमुद्रया जपं समाप्य पीठपूजामारभेत् ॥

No. **14879.** वैश्वदेवप्रयोगः.

VAIŚVADEVAPRAYŌGAḤ.

Pages, 4. Lines, 6 on a page.

Begins on fol. 6*a* of the MS. described under No. 211.

Complete.

Similar to the work described under No. 3795 ante.

Beginning:

वैश्वदेवे विश्वे देवा इत्यत्र वैश्वदेवपञ्चमहायज्ञानां प्रयोगो वक्ष्यते—समाप्ते पुण्याह उपक्रमः । तेषां मन्त्राणामु . . . . मधश्शय्या ब्रह्मचर्यमष्टाङ्गं मधुमांसं मैथुनदन्तधावनाभ्यञ्जनानुलेपना . . स्रग्धारणवर्जम् । उत्तमस्यैकरात्रमुपवासः । त्रयोदशाहमेतद्व्रतम् । सपत्नीकस्य सिद्धेऽन्ने तिष्ठन् पत्न्याथ भूतमिति स्वामिने . . . . त् । तत्सुभूतं विराडन्नं तन्मा क्षायीति प्रतिवचनम् ।

End:

तेभ्यो बलिं पुष्टिकाभो हरामि मयि पुष्टिं पुष्टिपतिर्ददातु स्वाहेति बलिहरणम् । स्नानादूर्ध्वं पञ्च महायज्ञाः कर्तव्या इत्युपदेशः ।

देशान्तरे चान्यगृहे च भुङ्क्ते होमस्वधाकारबलिक्रिया च ।
एकेन चाग्निना तु लौकिकाग्नौ कुर्याद्बलिं काकगृहाङ्गणं विना ॥

No. 14880. ब्रह्मयज्ञप्रयोगः.

BRAHMAYAJÑAPRAYŌGAḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 8*a* of the MS. described under No. 211.

Complete.

Similar to the work described under No. 2848 ante.

This procedure is intended for the followers of Āpastamba.

Beginning:

देशकालौ सङ्कीर्त्य माध्याह्निकसन्ध्यावन्दनानन्तरमेवंगुणेत्यादिपुण्य(शुभ)-तिथौ देवर्षिपितृतुष्ट्यर्थं नित्यब्रह्मयज्ञेन सद्यो यक्ष्ये—विद्युदसि.

End:

नमो ब्रह्मणे—करोमि इति त्रिः पठेत् । ओं वृष्टिरसि वृश्च मे पाप्मा-नमृतात्सत्यमुपागाम् ॥

Colophon:

इति ब्रह्मयज्ञः ॥

No. 14881. ब्रह्मयज्ञाङ्गदेवर्षिपितृतर्पणप्रयोगः.

BRAHMAYAJÑĀṄGADĒVARṢIPITṚTARPAṆAPRAYŌGAḤ.

Page, 1. Lines, 6 on a page.

Begins on fol. 8*b* of the MS. described under No. 211.

Complete.

Similar to the work described under No. 2843 ante

The procedure herein laid down is intended for Telugu and Kanarese Brahmans of the Āpastamba school.

Beginning:

एवङ्गुणविशेषणविशिष्टायां पुण्य(शुभ)तिथौ ब्रह्मयज्ञाङ्गदेवर्षिपितृतर्पणं करिष्ये—

ब्रह्मादयो ये देवास्तान्देवांस्तर्पयामि, सर्वान्देवांस्तर्पयामि, सर्वान्देवगणां-स्तर्पयामि, सर्वा देवपत्नीस्तर्पयामि ।

End:

सर्वान् पितृपौत्रान् स्वधा नमस्तर्पयामि, भूः पितॄन् स्वधा . . . मि,

भुवः पितॄन् स्वधा . . . मि, सुवः पितॄन् स्वधा . . . . मि, भूर्भुवस्सुवस्स्वधानमस्तर्पयामि ।

आदौ पिता तथा माता सपत्नी जननी तथा ।
मातामहास्सपत्नीका आत्मपत्न्यस्तथोत्तरे ॥
सुतभ्रातृपितृव्याश्च मातुलास्सहभार्यकाः ।
दुहिता भगिनी चैव दौहित्रो भागिनेयकः ॥
पितृष्वसा मातृष्वसा श्वशुरो गुरुरिक्थिनः ।

एतेषां नित्यतर्पणं कर्तव्यम् । तीर्थश्राद्धमहालयादौ एवं . . . .

No. **14882.** वैश्वदेवप्रयोगः.

VAIŚVADĒVAPRAYŌGAḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 9*a* of the MS. described under No. 211.

Complete.

Slightly different from the work described under No. 3793 ante.

No. **14883.** चतुर्वर्गचिन्तामणिः.

CATURVARGACINTĀMAṆIḤ.

Pages, 5. Lines, 5 on a page.

Begins on fol. 71*a* of the MS. described under No. 211.

A small portion of the Caturvargacintāmaṇi, which work has been described under Nos. 2744—2756 ante.

Incomplete.

Beginning:

देवलः—

ब्राह्मणो मदलोभेन विधवां विप्रनन्दिनीम् ।
यभेत्कामातुरः पश्चात् ज्ञात्वासौ पतिवर्जिता ॥
इति मत्वा व्रजेद्गन्धमादनं पर्वतोत्तमम् ।
तत्र चापाग्रमासाद्य प्रातस्स्नानाद्दिनेदिने ॥
माससमात्रेण शुद्धिस्स्या(त्सगु)द्धोऽभून्न चान्यथा ॥

End:

क्षत्रियवैश्यपुरुषे गमने द्विगुणं प्रायश्चित्तम । क्षत्रियादीनां विप्रप्रायश्चित्तं द्विगुणम् ॥

Colophon:

इति हेमाद्रिविरचिते धर्मशास्त्रे प्रायश्चित्ताध्याये विधवागमनप्रायश्चित्तम् ॥

No. **14884.** दशाहमध्ये दर्शादिश्राद्धविषयः.

DAŚĀHAMADHYE DARŚĀDIŚRĀDDHAVIṢAYAḤ.

Pages, 2. Lines, 4 on a page.

Begins on fol. 74*a* of the MS. described under No. 211.

Incomplete.

Similar to the work described under No. 3060 ante.

Beginning:

दशाहमध्ये दर्शः प्राप्तश्चेत्तस्मिन्नेव[सकल]श्राद्धजातं समाप्याशौचापगम एव कर्तव्यः । तत्र भविष्यत्पुराणे—

प्रवृत्ताशौचतन्त्रस्तु यदि दर्शं प्रपद्यते ।
समाप्य सोदकं पिण्डान् स्नानमात्रं समाचरेत् ॥ इति ॥

End:

तस्मात्पितृव्यतिरिक्तसपिण्डमात्रस्य दशाहमध्ये दर्श एव[सकल]श्राद्धजातं समाप्य तूष्णीमवशिष्टाशौचापगम एव कर्तव्य इति सिद्धम् ।

No. **14885.** अनाहिताग्निसंस्कारवचनानि.

ANĀHITĀGNISAṀSKĀRAVACANĀNI.

Page, 1. Lines, 4 on a page.

Begins on fol. 75*a* of the MS. described under No. 211.

Incomplete.

Similar to the work described under No. 3519 ante.

Beginning:

अनाहिताग्नेर्देहस्तु दाह्यो गृह्याग्निना द्विजैः ।
तदलाभे पलाशोत्थैः पत्रैः कार्यः पुमानपि ॥
सुपिष्टैर्जलसंमिश्रैर्दग्धव्यश्च तथाग्निना ।
असौ स्वर्गाय लोकाय स्वाहेत्युक्त्वा तु बान्धवैः ॥

End:

तथा च याज्ञवल्क्यः—

अस्थ्नामलाभे पालाशीं प्रकृतिं चापि कारयेत् ।
इति त्रिरात्रमशुचिर्भवेदिति च सपिण्डविषयम् ॥

No. 14886. आशौचविषयः.
ĀŚAUCAVIṢAYAḤ.

Pages, 2. Lines, 5 on a page.

Begins on fol. 75b of the MS. described under No. 211.

Incomplete.

Similar to the work described under No. 14529 ante.

Beginning :

शावेऽपि तुल्यं न्यून वा शावं पूर्वेण शुध्यति ।
अधिकं तु स्वकालेन रात्रिशेषादि पूर्ववत् ॥

मृतकेऽपि पूर्वेण मृतकेन । अत्र शावेन अपरेण तुल्यं वा न्यूनं वा मध्ये प्राप्तं तथा पूर्वेण द्वितीयशुद्धिः पूर्वस्मादधिकं चेत्स्वकालेन शुध्यति । रात्रिशेषादिकं जातकवद्विज्ञेयम् ।

End :

न सूतिजं शावविशोधनं स्यान्न मातृकं पैतृकशुद्धिहेतुः ।
यत्पैतृकं मातृमृते प्रजाते तत्पैतृकस्योपरि पक्षिणी स्यात् ॥

No. 14887. सपिण्डीकरणविषयः.
SAPIṆḌĪKARAṆAVIṢAYAḤ.

Page, 1. Lines, 5 on a page.

Begins on fol. 76b of the MS. described under No. 211.

Incomplete.

Similar to the work described under No. 14730 ante.

Beginning and the **End :**

अपुत्रवतामक्रममृतानां च सापिण्ड्यमेव नास्ति । तथा च स्कान्दवचनम् ।

अक्रमेण मृतानां न सपिण्डीक्रितिरिष्यते ।
यदि माता यदि पिता भर्ता नैव विधिः स्मृतः ॥ इति ।

विशेषतो ब्रह्मचारिणां तु दाहादि षोडशान्तमेव कार्यम् । न तु सपिण्डता ।

तथोक्तं वसिष्ठेन—

सपिण्डीकरणं चैव मृतानां ब्रह्मचारिणाम् ।
दाहादिषोडशान्तं च निर्वृत्यैव यथाविधि ॥
द्वादशेऽहनि संप्राप्ते नैव कार्या सपिण्डता । इति ॥

No. 14888. गीतासारः.
GĪTĀSĀRAḤ.

Pages, 4. Lines, 10 on a page.

Begins on fol. 22*a* of the MS. described under No. 2014.

Complete.

Same work as that described under No. 14272 ante, but with slight difference in the beginning in Ṛṣicchandō-dēvatā, etc.

Beginning :

अस्य श्रीगीतासारस्य ब्रह्मविष्णुमहेश्वरा ऋषयः, अग्निर्वायुस्सूर्यो देवता, गायत्र्युष्णिगनुष्टुभश्छन्दांसि, आहवनीयगार्हपत्यदक्षिणाग्निस्थानानि, ऋग्यजुस्सामवेदानि, नीलपीतश्वेतवर्णानि, अकारो बीजम्, उकारश्शक्तिः, मकारः कीलकम्, प्रणवादिसम्पुटम्, श्रीमहाविष्णुप्रीत्यर्थे जपे विनियोगः।

No. 14889. पाण्डवगीता.
PĀṆḌAVAGĪTĀ.

Pages, 5. Lines, 10 on a page.

Begins on fol. 32*b* of the MS. described under No. 2022.

Complete.

Same work as that described under R. No. 271(*b*) of the Triennial Catalogue of the Sanskrit MSS., Vol. III, Part I-A.

No. 14890. उत्तरगीता.
UTTARAGĪTĀ.

Pages, 20. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 2021.

Contains one to three Adhyāyas complete.

Same work as that described under No. 2372 ante, but with additional stanzas in the beginning as given below.

Beginning :

नारायणं पद्मभुवं वसिष्ठं शक्तिं च तत्पुत्रपराशरं च ।
व्यासं शुकं गौडपदं महान्तं गोविन्दयोगीन्द्रमथास्य शिष्यम् ॥
श्रीशङ्कराचार्यमथास्य पद्मपादं च हस्तामलकं च शिष्यम् ।
तं तोटकं वार्त्तिककारमन्यानस्मद्गुरून् सन्ततमानतोऽस्मि ॥
यत्पादपङ्कजध्यानाल्लक्ष्मणाद्या यतीश्वराः ।
बभूवुस्तादृशं वन्दे शङ्करं षण्मतेश्वरम् ॥

No. 14891. श्रुतिगीता.
ŚRUTIGĪTĀ.

Pages, 6. Lines, 8 on a page.

Begins on fol. 7*a* of the MS. described under No. 2372.

Contains 50 Ślōkas only.

Same work as that described under No. 2570 ante.

No. 14892. छायापुरुषलक्षणम्.
CHĀYĀPURUṢALAKṢAṆAM.

Pages, 2. Lines, 8 on a page.

Begins on fol. 21*a* of the MS. described under No. 2372.

Complete.

Similar to the work described under No. 2544 ante. This work is taken from the Haṭhapradīpikā.

Beginning:

भगवन् देवदेवेश सर्वागमविशारद ।
नराणां पापिनां लोके पापनिर्मोचनं कथम् ॥
कालज्ञानं कथं वास्य सूक्ष्मोपायेन तद्वद ।
श्रुतानि साधनानीश त्वयानेकानि भूरिशः ॥
तथापि तानि मनुजैः न शक्यान्यल्पबुद्धिभिः ।
प्रायेण मनुजा लोके कलौ स्वल्पायुषो ध्रुवम् ॥
अनेकवर्षसाध्येऽस्मिन्योगाभ्यासे प्व(त्व)शक्तयः ।

ईश्वर उवाच—

साधु देवि त्वया पृष्टं लोकानां हितकाम्यया ।
तादृशं साधकं वक्ष्ये सर्वसाधारणं लघु ॥

* * * *

स्वच्छायापुरुषं पश्येद्गगने शुद्धि(द्ध)मानसः ।
तस्यावलोकनात्सद्यः पापराशिर्विनश्यति ॥

End:

य एतच्छृणुयान्नित्यं छायापुरुषलक्षणम् ।
दीर्घायुष्यमवाप्नोति ज्ञानं चापि सुनिर्मलम् ॥

Colophon:

इति हठप्रदीपिकायां उमामहेश्वरसंवादे छायापुरुषलक्षणं सम्पूर्णम् ॥

No. **14893.** वेदान्तविषयः
VĒDĀNTAVIṢAYAḤ.

Pages, 4. Lines, 8 on a page.

Begins on fol. 22*a* of the MS. described under No. 2372.
Contains the Adhyāyas one to three only.
Same work as that described under No. 4743 ante.

No. **14894.** नवरत्नमालिकास्तोत्रम्.
NAVARATNAMĀLIKĀSTŌTRAM.

Pages, 2. Lines, 6 on a page.

Begins on fol. 138*a* of the MS. described under No. 2068.
Complete.
Same work as that described under No. 9603 ante.

No. **14895.** कृष्णस्तवः.
KṚṢṆASTAVAḤ.

Page, 1. Lines, 6 on a page.

Begins on fol. 138*b* of the MS. described under No. 2068.
Similar to the work described under No. 9906 ante.

Beginning and the **End**:

वन्दे नन्दव्रजवधूबृन्दोपवनदेवताः ।
यत्पयोधरशैलेषु कृष्णः कृष्णघनायते ॥
निगमशिखरगेयं नित्यकल्याणकायं
श्रितपुरुषविधेयं श्रीधरित्रीसहायम् ।
भवुकगुणनिकायं भावुकानामुपायं
परविगलितहेयं बालकृष्णं भजेयम् ॥
चोरोऽसि नवनीतानां जारोऽसि व्रजयोषिताम् ।
ध्येयोऽसि योगिनां नित्यं जारचोर नतोऽस्म्यहम् ॥

No. **14896.** कविलक्षणम्.
KAVILAKṢAṆAM.

Page, 1. Lines, 6 on a page.

Begins on fol. 139*a* of the MS. described under No. 2068.
Incomplete.

Purports to describe the characteristics and the attainments necessary for a good poet.

Beginning:

अत्र कविप्रसङ्गादिदं बोध्यम्—

शुचिर्दक्षश्शान्तस्सुजनविनुतस्सूनृतरतः
कलावेदी विद्वान् कलमृदुपदैः काव्यरचनः ।
कृतज्ञो दैवज्ञस्सहृदय[हृ]दयस्सत्कुलभवः
शुभाकारश्छन्दोगणगुणविवेकी स हि कविः ॥

End:

शास्त्रालङ्कारसंस्कारी विवेकी कविपुङ्गवः ।
अलङ्कारैकनिष्ठो यो भूषणार्थी बुधैर्मतः ॥

No. 14897. वैयासिकन्यायमालाधिकरणश्लोकानुक्रमणिका. VAIYĀSIKANYĀYAMĀLĀDHIKARAṆAŚLŌKĀNUKRAMAṆIKĀ.

Pages, 2. Lines, 5 on a page.

Begins on fol. 85*a* of the MS. described under No. 4651.

Contains one to three Pādas in the first Adhyāya.

An index of the verses contained in the Adhikaraṇas or topical subdivisions of the Vaiyāsikanyāyamālā, which work has been described under No. 4751 ante.

No. 14898. अगस्त्याष्टकश्लोकानुक्रमणिका. AGASTYĀṢṬAKAŚLŌKĀNUKRAMAṆIKĀ.

Page, 1. Lines, 5 on a page

Begins on fol. 86*a* of the MS. described under No. 4651.

Complete.

An index of eight stanzas contained in the Agastyāṣṭaka, which work has been described under No. 10899 ante.

No. 14899. वैयासिकन्यायमालाधिकरणश्लोकाः. VAIYĀSIKANYĀYAMĀLĀDHIKARAṆAŚLŌKĀḤ.

Pages, 8. Lines, 5 on a page.

Begins on fol. 87*a* of the MS described under No. 4651.

Contains the Pādas one to three only in the first Adhyāya.

Same work as that described under No. 4751 ante.

No. 14900. ऐतरेयोपनिषद्.
AITARĒYŌPANIṢAD.

Page, 1. Lines, 16 on a page.

Begins on fol. 1*b* of the MS. described under No. 4375.

Incomplete.

Same work as that described under No. 326 ante.

No. 14901. नाडीग्रन्थः.
NĀḌĪGRANTHAḤ.

Pages, 2. Lines, 16 on a page.

Begins on fol. 2*a* of the MS. described under No 4375.

Wants the beginning and the end.

Similar to the work described under No. 13813 ante.

Beginning:

एकवर्षे एकमासे अग्निभित्तिभयं ह(प)रम् ।
द्विअब्दे च द्विमासे च बालारिष्टभयं ह(प)रम् ॥
त्रिअब्दे च त्रिमासे च बालारिष्टभयं ह(प)रम् ॥
चतुरब्दे चतुर्मासे मातापित्रोस्सुखं तथा ।
पञ्चाब्दे पञ्चमासे च परं तु विद्यालाभतः? ॥

End:

गमनं पुनरागम्य सेतुस्नानफलं लभेत् ।
देवतार्चनविज्ञानं सौख्यं वा सुखम् . . . ? ॥

No. 14902. न्यायामृतकारिका.
NYĀYĀMṚTAKĀRIKĀ.

Pages, 4. Lines, 9 on a page.

Begins on fol. 97*b* of the MS. described under No. 4796.

Incomplete.

A work in verse giving the summary of the Nyāyāmṛta, which work has been described under No. 4796 ante.

Beginning:

प्रणम्य चरणद्वन्द्वं मापतेर्लेखनं त्वहम् ।
कुर्वे न्यायामृतस्थानां कारिकाभिर्यथामति ॥
स्वरूपेण त्रिकालस्य निषेधो नास्ति ते मते ।
रूप्यमिथ्यात्मकत्वेन निषेधस्त्वात्मनोऽपि च ॥

ज्ञातृज्ञेयविहीनं ते ब्रह्मज्ञानात्मकं यदि ।
भोक्तृभोज्यविहीनापि भवेत्तर्हि भुजिक्रिया ॥
कालादिर्न परिच्छिन्न अग्र आसीदथामृतः ।
इत्यादियुक्तिभिर्नो चेद्वोरा व्याप्तिर्भवेत् ॥

End:

बन्धस्य तदपायेन कृतेस्तत्फलभाक्तया ।
सामानाधिकरण्याच्च न बुद्धेः . . . . . ॥
कर्मत्वकरणत्वादीनां म . . . . ।

No. **14903.** रामायणव्याख्यानम्—वाल्मीकिहृदयम्.

RĀMĀYAṆAVYĀKHYĀNAM : VĀLMĪKIHṚDAYAM.

Substance, palm-leaf. Size, 18¼ × 1½ inches. Pages, 286. Lines, 8 on a page. Character, Nandināgarī. Condition, very much injured. Appearance, old.

Begins on fol. 1*a*. The other works herein are Brahmasūtrabhāṣyārthatattvadīpikā 26*a*, Yamakabhāratatīkā 50*a*, Pārijātaharaṇaṭikā 77*b*, Prakriyākaumudī 98*a*, Mīmāṁsākaustubha 106*a*.

Contains the Bālakāṇḍa complete and the Ayōdhyākāṇḍa incomplete and in disorder.

Same work as that described under No. 11889 ante

Beginning:

शम्पामध्यस्फुरन्नीलनीरदद्युतिविग्रहम् ।
सातयालिङ्गितं रामं कलयेऽभीष्टसिद्धये ॥

* * * *

तपस्स्वाध्यायेत्यादि । तपो निदिध्यासनं, ब्रह्मैतदुपास्यं तत्तपः इति श्रुतेः

* * * *

आत्रेयाहोबलकृते वाल्मीकिहृदयाह्वये ।
श्रीबालकाण्डव्याख्याने सर्गोऽयं प्रथमो गतः ॥

* * * *

End:

विश्वं बिभर्ति भुवनस्य नाभिः । तदेवाग्निस्तद्वायुस्तत्सूर्यस्तदु चन्द्रमाः—इति श्रुतेः ॥

No. **14904.** ब्रह्मसूत्रभाष्यार्थतत्त्वदीपिका.

BRAHMASŪTRABHĀṢYĀRTHATATTVADĪPIKĀ.

Pages, 48. Lines, 6 on a page.

Begins on fol. 26*a* of the MS. described under the previous number.

Contains the first Pāda of the first Adhyāya, but wants the beginning.

Similar to the commentary described under No. 4814 ante: by Kuṇḍalagiri, son of Kaudibhaṭṭa and disciple of Lakṣmīnāthapūjyapāda.

Beginning:

ज्ञोऽत इति सूत्रे भाष्यम् । द्वादशाहः क्रत्वात्मकस्सत्रात्मकश्च भवतीति लिङ्गभूयस्त्वात्ताद्धि बलीयस्तदपीति सूत्रे श्रवणगुरुप्रदानयोः प्रधानेतिकर्तव्यतास्वरूपयोः गुरुप्रदानं प्रबलमित्युपपादनार्था तत्त्वप्रकाशिका । न चेति . . . . दौर्बल्यं यागीयहिंसायामितिकर्तव्यतायामेव प्राबल्यदर्शनादिति । भूम्नः क्रतुवज्ज्यायस्त्वं तथाहि (च) दर्शयतीति सूत्रात्तत्त्वप्रकाशिका ।

* * * *

जिज्ञासासूत्रे च प्रथमसंहिताया ओङ्कारनिर्देशं सूत्रावयवभूतमङ्गीकृत्य संहिताप्रयोजनमुत्तरसूत्रेष्वनतिसूचनं प्रतिसूत्रं ब्रह्मविद्यात्वादाद्यन्तपरो . . . . इति गम्यते । नचोह्यमानं वाक्याद्यङ्गमन्त्रेष्वप्यूह्यमानस्य मत्वानवयवत्वप्रसङ्गादिति । आनन्दमयाधिकरणे च न्यायसुधा । ज्योतिषां स्तोमो हि ज्योतिष्टोम इति ।

End:

विशिष्टज्ञानेन च त्वन्मते सर्वकर्मालेपाभावात् । एवं लिङ्गान्तरमपि दूष्यम् । एवं परमधिकरणं जीवत्वनिषेधेन ब्रह्मत्वविधानादभेदप्रतिकूलमेवेति ।

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यपदवाक्यप्रमाणपारावारपारीणसर्वतन्त्रस्वतन्त्रश्रीमद्वैष्णवसिद्धान्तप्रतिष्ठापनाचार्यश्रीमद्व्यासरायतीर्थश्रीमच्चरणविद्यासिंहासनाधीश्वरश्रीलक्ष्मीनाथपूज्यपादानां शिष्येण पश्चिमरङ्गराजधानीप्रधानिसोदर्यराजपण्डितमान्येन कौडिभट्टोपाध्यायतनुभुवा कुण्डलिगिरिसूरिणा कृतायां श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितब्रह्मसूत्रभाष्यार्थतत्त्वदीपिकायां प्रथमस्याध्यायस्य प्रथमः पादः ॥

No. 14905. यमकभारतटीका.
YAMAKABHĀRATAṬĪKĀ.

Pages, 54. Lines, 6 on a page.

Begins on fol. 50*a* of the MS. described under No. 14903.

Complete.

Similar to the work described under No. 11890 ante.

Beginning:

श्रीकृष्णं रुक्मिणीसत्यासहितं पाण्डवप्रियम् ।
नत्वा श्रीपूर्णबोधार्यान् (जयतीर्थ)गुरूनपि ॥
(अन्यान्) व्याख्याकृतो नत्वा बालबोधाय सादरम् ।
व्याख्यास्यामि यथाबोधमहं यमकभारतम् ॥
बह्वर्थं पूर्णबोधार्यकृतं यमकभारतम् ।
दुर्गमार्थं मन्दधियां नानावि(चित्र)पदास्पदम् ॥
तथापि स्वल्पमेवार्थं गुरूणां करुणाबलात् ।
प्रकाशयेऽन्वयमुखं सद्भिस्तदनुमोद्यताम् ।

इह खलु संसारक्लेशसन्तप्तान (प्तमान) सान् सज्जनानुद्दिधीर्षुः परमकारुणिकः श्रीमदानन्दतीर्थभगवत्पादाचार्यवर्यः तेषामखिलक्लेशनिवृत्तिविशिष्टपरमानन्दावाप्तये तदुपायभूतं भगवन्माहात्म्यप्रतिपादकं विचित्रपदसन्दर्भात्मकं भारतार्थसङ्ग्राहकं यमकभारतं चिकीर्षुर्निर्विघ्नपरिसमाप्त्यादिप्रयोजकत्वेन शिष्टाचारपरम्परावगतस्व . . . . न्तरायविधुरोऽपि शिष्याननुग्राहयन्नारायणस्तुतिरूपं मङ्गलं ग्रन्थतो निबध्नाति—ध्यायेदिति ।

End:

इयं पूर्वोक्ता कृष्णकथा कृष्णावतारकथा उदिता उक्ता ! वद व्यक्तायां वाचि । कर्मणि क्तः । इति नारायणनामा सुखतीर्थपूजितः नारायणनामा । पूर्णगुणैरधिकपूर्णज्ञानेच्छाभक्तिभिरत्वधिकपूर्णः ॥

Colophon:

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यकृतश्रीयमकभारतव्याख्यानं संपूर्णम् ॥

No. 14906. पारिजातहरणटीका.
PĀRIJĀTAHARAṆAṬĪKĀ.

Pages, 42. Lines, 6 on a page.

Begins on fol. 77*b* of the MS. described under No. 14903.

Complete.

Same commentary as that described under No. 11860 ante.

No. **14907.** प्रक्रियाकौमुदी.

PRAKRIYĀKAUMUDĪ.

Pages, 56. Lines, 6 on a page.

Begins on fol. 98*a* of the MS. described under No. 14903.

Breaks off in the Śabdādhikāra.

Same work as that described under No. 1357 ante.

No. **14908.** मीमांसाकौस्तुभः.

MĪMĀṀSĀKAUSTUBHAḤ.

Pages, 36. Lines, 6 on a page.

Begins on fol. 126*a* of the MS. described under No. 14903.

Contains the third Pāda of the third Adhyāya complete, and fourth Pāda incomplete.

Same work as that described under No. 4446 ante and R. No. 1224 of the Triennial Catalogue of the Sanskrit MSS., Vol. II, Part I-A.

No. **14909.** कृष्णयजुर्वेदसंहिताभाष्यम्.

KṚṢṆAYAJURVĒDASAṀHITĀBHĀṢYAM.

Pages, 4. Lines, 8 on a page.

Begins on fol. 188*a* of the MS. described under No. 110.

Contains the first Praśna of the second Kāṇḍa incomplete

Same work as that described under No. 97 ante.

No. **14910.** नवग्रहमङ्गलाष्टकम्.

NAVAGRAHAMAṄGALĀṢṬAKAM.

Pages, 3. Lines, 6 on a page.

Begins on fol. 230*a* of the MS. described under No. 4842

Wants the beginning; otherwise complete.

Same work as that described under No. 9529 ante.

No. **14911.** दशावतारमङ्गलाष्टकम्.

DAŚĀVATĀRAMAṄGALAṢṬAKAM.

Pages, 2. Lines, 6 on a page.

Begins on fol. 231*b* of the MS. described under No. 4842.

Contains six stanzas only.

Eight eulogistic stanzas exhorting the ten incarnations of God Viṣṇu to confer prosperity on the supplicant.

Beginning:

आदावम्बुजसंभवादिविनुतः शान्तोऽच्युतश्शाश्वतः
उत्फुल्लामलपुण्डरीकनयनः पुण्यः पुराणः पुमान् ।
लोकेशः श्रुतिचोदितो मुरहरो मत्स्यावतारो हरिः
श्रीमत्सिंहगिरीश्वरः करुणया दद्यात्सदा मङ्गलम् ॥

End:

सद्यः खण्डितराजमङ्गलशरीरोद्भूतरक्तापगा-
सन्तर्पी पितृपैतृकः पितृवचो बालस्तपोनिष्ठितः ।
वेदज्ञो जमदग्निजः परशुभृद्रामावतारो हरिः
श्रीमत्सिंहगिरीश्वरः करुणया दद्यात्सदा मङ्गलम् ॥

No. **14912.** ऋग्वेदसंहिता.
ṚGVĒDASAṀHITĀ.

Pages, 34. Lines, 10 on a page.

Begins on fol. 37*a* of the MS. described under No. 4814.

Wants the beginning in the first Adhyāya of the first Aṣṭaka and second Adhyāya incomplete.

Same work as that described under No. 1 ante.

No. **14913.** मीमांसाविषयः.
MĪMĀṀSĀVIṢAYAḤ.

Pages, 12. Lines, 9 on a page. Character, Telugu.

Begins on fol. 8*a* of the MS described under No. 4916.

Wants the beginning and the end.

Similar to the work described under No. 1464 ante.

Beginning:

हविष एव चतुरवदानमुपांशुयाजी आज्ये तूपस्तरणादभावेन तत्संख्यासंपत्त्यभावात् । आज्ये देवी चतुरवदेयम् । वस्तुतस्तु . . . . विधिनैव चतुर्ग्रहणप्राप्तिरित्याहुः । पुरोडाशाभ्यामित्यादिकृतानां पुरोडाशयोरुपदेशस्तच्छ्रुतित्वाद्दैश्यस्तो[ता]मवदिति ।

End:

अमृताहुतिमेवैनां करोतीत्युपस्तरणाभिघारणयोश्च हविरम् . . सार्धं शर्करेकघृता तस्माद्वा पुरोडाशायामप्युपांशुयाजी स्यादिति सर्वमनवद्यम् ।

No. **14914.** श्वेतार्ककल्पः.

ŚVETĀRKAKALPAḤ.

Pages, 4. Lines, 18 on a page.

Begins on fol. 172*a* of the MS. described under No. 5593.

Complete.

On the process of preparing a useful medicine from the white Arka plant called Calatropis Gigantea.

Beginning:

पार्वत्युवाच—

नमस्ते योगिसंसेव्य योगारूढ नमो नमः ।
अधुना मालिकायोगं वद मे करुणाकर ॥

ईश्वर उवाच—

श्वेतार्ककल्पमनघे वक्ष्येऽहं तव सुव्रते ।
गोपयेत्सर्वदा देवि गुप्तात्सिद्धिमवाप्नुयात् ॥
हस्तायामर्कवारे तु नक्ति(क्तं) पूर्वदिनेऽर्चिते ।
प्रातरुत्थाय देवेशि सौरमन्त्रं जपेत्ततः ॥
सहस्रं [वा] त्रिसहस्रं वा बलिपूर्वं सुबुद्धिमान् ।
समूलं संग्रहेत्सम्यक् छायाशुष्कं तु कारयेत् ॥
छायाशुष्कं तु कृत्वा तु सूक्ष्मचूर्णं तु कारयेत् ।
तच्चूर्णं शोधयेत्सम्यक् वस्त्रेणैव सुबुद्धिमान् ॥
मन्त्रयेच्च सहस्रैकं स्पृष्ट्वा तच्चूर्णमेव च ।
सङ्ग्रहे नूतनं भाण्डं देवतार्चनपूर्वकम् ॥
पुनरेकादिने देवि चन्द्रताराानुकूलके ।
भक्षयेन्मधुना सार्धं बिडालपदमात्रकम् ॥

End:

रात्रौ तु ध्यानं कृत्वा तु साधयेत्साधकोत्तमः ।
एवं कृत्वा भवेत्सिद्धिर्नान्यथा निष्फलं भवेत् ॥

एतद्योगं कुलेशानि लभेद्भाग्यवशान्नृणाम् ।
गोपनं कुरु देवेशि न वक्तव्यं कदाचन ॥

Colophon:

इति श्रीयोगसारागमे सिद्धजीवनतन्त्रे पञ्चमः पटलः ॥

No. **14915.** गोपालपूजाविधिः.
GOPĀLAPŪJĀVIDHIḤ.

Pages, 5. Lines, 16 on a page.

Begins on fol. 7*a* of the MS. described under No. 424.

Complete.

Similar to the work described under R. No. 3067 of the Triennial Catalogue of the Sanskrit MSS., Vol. IV, Part I-A.

Beginning:

श्रीशः (प्रदे)यान्मुकुन्दो मनस्यानन्दकन्दलम् ।
इन्दिराकुचशैलाभ्रमीलदानीलनीरदः ॥

मूलमन्त्रेण त्रिषट्द्वादशावृत्त्या रेचकपूरककुम्भकैः क्रमेण प्राणानायम्य, देवं विभाव्य, मण्डूकाय नमः, कालाग्निरुद्राय नमः, आधारशक्तये नमः, प्रकृत्यै कूर्मायानन्ताय, पृथिव्यै, क्षीरसिन्धवे श्वेतद्वीपाय, मणिमण्टपाय, कल्पवृक्षाय, रत्नपीठाय नमः

* * * *

ओं नमो भगवते विष्णवे सर्वभूतात्मने वासुदेवाय, सर्वात्मसंयोगयोगपीठात्मने नमः इति पुष्पाञ्जलिं दद्यात् ।

End:

कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वा प्रकृतेः स्वभावात् ।
करोमि यद्यत्सकलं परस्मै नारायणायेति समर्पयामि ॥

अपराधसहस्राणि क्रियन्तेऽहर्निशं मया ।
दासोऽहमिति मां मत्वा क्षमस्व पुरुषोत्तम ॥

इत्युपसंहारमुद्रया पूजामुपसंहरेदिति मङ्गलम् ॥

Colophon:

इति गोपालपूजाविधिः ॥

No. 14916. श्रीचक्रावलिस्तोत्रम्.
ŚRĪCAKRĀVALISTŌTRAM.

Pages, 8. Lines, 18 on a page.

Begins on fol. 156 of the MS. described under No. 424.

Complete.

Similar to the work described under No. 5732 ante.

Beginning:

पाशिनि पाशच्छेदिन्यङ्कुशिनि निरङ्कुशप्रभे ललिते ।
चापिनि चापलरहिते बाणिनि बाणारिसेविते जीयात् ॥
ब्रह्मबिलोदितनिर्मलसहस्रपत्राब्जकर्णिकान्तस्था(स्थे) ।
हंसमयरत्नपीठे रक्तं शुक्लं गुरोः पदं वन्दे ॥
तस्य परितो निविष्टान्यमितामृतपुञ्जतर्पितजगन्ति ।
विमृशामि मनसि नियतं वीरावधिपादुकासहस्राणि ॥

End:

श्रीनगर(वर)गतानां शक्तीनामेकनायका च स्यात् ।
श्रीललिता परमेशि संविर्त्सिहासनैकसाम्राज्ञि ।
इत्थं महाचक्रपुरस्थदेवताचक्रावलिस्तोत्रमशेषसिद्धिदम् ।
प्रातः पठन्तः प्रभवन्ति साधकाः सर्वेषु साध्येषु फलेष्वखण्डिताः॥

Colophon:

इति श्रीचक्रावालिस्तोत्रम् ॥

No. 14917. सौभाग्यहृदयस्तोत्रम्.
SAUBHĀGYAHṚDAYASTŌTRAM.

Pages, 4. Lines, 16 on a page.

Begins on fol. 41*b* of the MS. described under No. 424.

Complete.

A hymn in praise of Śakti, the repetition of which is considered to be efficacious in removing all sins and diseases of the devotee: by Śivānandayōgi.

Beginning:

विचिनोमि महापूजां विमर्शो यातिदुर्लभः ।
स्वातन्त्र्यभाषिताशेषतत्त्वव्रातस्वरूपिणि ॥
भीरताकारतामा(मात)स्ते नमस्त्रिपुरसुन्दरि ।
कामेश्वर्यादिचित्रान्तविचित्रतनुमध्यमे ॥

महादेवमहाभागे नमस्त्रिपुरसुन्दरि ।
शिलादिगुरुहृत्पद्मसहस्रकिरणप्रभे ॥

End :

सौभाग्यहृदयं गुह्यं शिवानन्देन योगिना ।
समाराधनभूत्यर्थं स्मृतं सकलकामदम् ॥

इति विरचितमेतत्त्रैपुरस्तोत्रमाद्यं प्रकटितपरमार्थं योगिवर्योपयि(दि)ष्टम् ।
सकलदुरितरोगध्वंसन . . न कार्यं प्रतियजनविधानं सेव्यतां भक्तियुक्तैः ॥

Colophon :

इति सौभाग्यहृदयस्तोत्रं संपूर्णम् ॥

No. 14918. पक्षिराजसालुवतन्त्रम्.
PAKṢIRĀJASĀLUVATANTRAM.

Pages, 10. Lines, 16 on a page.

Begins on fol. 84*a* of the MS. described under No. 424.
Complete, as found in the second Paṭala of the Vātūlāgama.
Slightly different from the work described under No. 8098 ante.

Beginning :

श्रृण्वन्तु ऋषयस्सर्वे सालुवस्य महात्मनः ।
तस्य दर्शनमात्रेण पलायन्ते च शत्रवः ॥
जापकस्य विशेषेण दर्शनात्तस्य शत्रवः ।
पादौ प्रणम्य शिरसा दासोऽहमिति भाषितम् ॥
पूजाप्रकारं मे ब्रूहि देवदेवमुमापतिम् ।
ओं आधारशक्त्यै नमः । कूर्माय नमः । अनन्ताय नमः

* * * *

एवमालिख्य यन्त्रे च तालपत्रे प्रयत्नतः ।
स्नुहिक्षीरं जले क्षिप्त्वा यन्त्रं पत्रं च निक्षिपेत् ॥
चुल्ल्योपरि घटं स्थाप्य क्वाथयेत सर्वशत्रवः ।
गृहं त्यक्त्वा पलायन्ते प्रसादात्सालुवस्य च ॥
साधकस्सर्वमाप्नोति रिपुर्देशेचरो भवेत् ।
सालुवं पक्षिराजानं यो ध्यात्वा लोकपूजितः ॥

End :

मूलेन राजवृक्षस्य समिद्धोमो विधीयते ।
अष्टोत्तरसहस्रं च शतमष्टोत्तरं तु वै ॥
हुनेच्च विधिवद्यन्त्रं कुण्डे यन्त्रं विलिख्य च ।
विदिनान्ते च विद्वेषं शत्रूणां च परस्परम् ॥

Colophon:

इति वातूलाख्ये दिव्यागमे ब्रह्माणं प्रति उमामहेश्वरसंवादे पक्षिराजसालुवतन्त्रे प्रतिपक्षसङ्घदर्श(ल)ने द्वितीयः पटलः ।,

---

No. **14919.** पञ्चाक्षरीमन्त्रन्यासः.
PAÑCĀKṢARĪMANTRANYĀSAḤ.

Pages, 11. Lines, 16 on a page.

Begins on fol. 93*b* of the MS. described under No. 424.

Incomplete.

On the ceremonial touching of certain specified parts of the body while repeating at the same time the letters of five-syllabled prayer-formula relating to God Śiva.

Beginning :

अस्य श्रीपञ्चाक्षरीमन्त्रस्य वामदेव ऋषिः, पङ्क्तिः छन्दः, श्रीसदाशिवो देवता । ओं नमिति बीजम्, मेति शक्तिः, ब्रह्मबीजमित्यादि परमेश्वरप्रीत्यर्थे विनियोगः, श्रीपञ्चाक्षरीमन्त्रे प्रथम(न)कारस्य गौतम ऋषिः, गायत्री छन्दः, इन्द्रो देवता, पीतवर्ण उदात्तस्वरः । द्वितीयवर्णस्य मकारस्य ओं अनु प् छन्दः, रुद्रो देवता, कृष्णवर्णः, स्वरितस्वरः ।

End :

इत्युक्तयावकुण्ठ(न)मुद्रया शीर्षादिपादाङ्गुष्ठपर्यन्तमवकुण्ठनं कृत्वा, मूलमन्त्रमुच्चार्य, सर्वात्मन् भगवन्नमृताप्लुतो भवेति पूर्वोक्तधेनुमुद्रां शीर्षोपरि दर्शयन् तत्स्रुताः अमृतधाराः सर्वाङ्गान्याप्लावयन्ति ? रीतीर्भावयन्नमृतीकरणं कृत्वा.

No. **14920.** राजराजेश्वरीयोगनिर्णयः.
RĀJARĀJEŚVARĪYŌGANIRṆAYAḤ.

Pages, 3. Lines, 16 on a page.

Begins on fol. 153*a* of the MS. described under No. 424.

Complete.

A Yōgic treatise giving a brief description of the subtle form of Brahman, as abiding in the eyes.

Beginning:

ईश्वर उवाच—

चक्षुर्मध्ये स्थितं गुह्यमङ्गुष्ठे पर्वमात्रकम् ।
तदर्धं चापि पर्वाधं तस्याग्रे सूक्ष्मकं ध्रुवम् ॥
गुह्याद्गुह्यतमं गुह्यं चक्षुस्स्थानेषु तिष्ठति ।
तन्मूर्तिर्लक्ष्यते दृश्यमापादतलमस्तकम् ॥
अचलं निर्मलं शान्तं कायस्थं तेज उच्यते ।
अमलं निर्मलं देवं शून्यं व्यापि निरञ्जनम् ॥

End:

काली(शी)पुरनिवासस्थो विश्वनाथो जगद्गुरुः ।
देहान्ते चोपदिश्येत दक्षिणे कर्णसंपुटे ॥
राजराजेश्वरं योगं शेषमार्गः प्रशस्यते ।
यः पठेत्सततं भक्त्या स मुक्तो नात्र संशयः ॥

Colophon:

इति श्रीमद्गुरुप्रसादे राजराजेश्वरयोगं संपूर्णम् ॥

No. **14921.** शरभकालीसालुवपक्षिराजमालामन्त्रः.

ŚARABHAKĀLĪSĀLUVAPAKṢIRĀJAMĀLĀMANTRAḤ.

Page, 1. Lines, 16 on a page.

Begins on fol. 205*b* of the MS. dessribed under No. 424.

Complete.

Similar to the work described under No. 7325 ante

Beginning:

ओं शरभकालच्यै नमः ओं आं एहि एहि शरभसाल्वाय स्फुर स्फुर पक्षिराजाय प्रस्फुर प्रस्फुर ह्रीं खे खे बडवानलसाल्वाय ज्वल ज्वल पक्षिराजाय।

End:

खे खे रक्तं पिब शीघ्रं कृत्रिमान् खादय हुं फट् स्वाहा ॥

No. **14922.** शरभसालुवपक्षिराजमालामन्त्रः.

ŚARABHASĀLUVAPAKṢIRĀJAMĀLĀMANTRAḤ.

Pages, 2. Lines, 16 on a page.

Begins on fol. 205*b* of the MS. described under No. 424.

Complete.

Similar to the work described under No. 7341 ante.

Beginning:

ओं प्रलयकालवीरशरभाय नमः । ओं नमो भगवते अषां रवि(वीर)-शरभाय अनन्तसूच्य(र्य)प्रकाशाय नारसिंहक्रोधनाशनाय ।

End:

आवेशयावेशय फट् फट् मारय मारय सर्वग्रहानुच्चाटयोच्चाटय हूं हूं फट् स्वाहा ॥

No. **14923.** गर्भकुलार्णवः.

GARBHAKULĀRṆAVAḤ.

Pages, 9. Lines, 16 on a page.

Begins on fol. 212*b* of the MS. described under No. 424.

Contains the second Adhyāya of Rahasyajīvatantra.

Same work as that described under No. 5603 ante.

No. **14924.** वेदान्तविषयकारिकाः.

VĒDĀNTAVIṢAYAKĀRIKĀḤ.

Pages, 3. Lines, 16 on a page.

Begins on fol. 234*b* of the MS. described under No. 424.

Wants the beginning and the end.

Similar to the work described under No. 4743 ante.

Beginning:

ब्रह्मा ब्रह्म वसिष्ठश्च शक्तिश्चैव पराशरः ।
व्यासः शुको गौडपदो गोविन्दस्वामिशङ्कराः ॥
शङ्कराचार्यशिष्यास्तु चत्वारो लोकविश्रुताः ।
पद्मपादः सुरेशश्च हस्तामलकत्रोटकाः ॥
तीर्थाश्रमौ पद्मपादशिष्यौ द्वौ च सरस्वती ।
पुरी च भारती चैव सुरेशश्वा(स्या)नुयायिनौ ॥

* * * *

अहमस्मि सदा भामि कदाचिन्नाहमप्रियः ।
ब्रह्मैवाहमतस्सिद्धं सच्चिदानन्दलक्षणम् ॥

काके शौचं द्यूतकार्येषु सत्यं क्लीबे धैर्यं मद्यपे तत्त्वचिन्ता ।
सर्पे शान्तिः स्त्रीषु कामोपशान्ती राजा मित्रं केन दृष्टं श्रुतं वा ॥

End :

ईश्वरे हृदधी(हितदी)नेषु बालिशेषु द्विषत्सु च ।
प्रेममैत्रीकृपोपेक्षाः यः करोति स मध्यमः ॥
अर्चायामेव हरये पूजां यः श्रद्धयेहते ।
न तद्भक्तेषु चान्येषु स भक्तः प्राकृतः स्मृतः ॥

No. **14925.** तैत्तिरीयोपनिषद्भाष्यव्याख्या—दीपिका.

TAITTIRĪYŌPANIṢADBHĀṢYAVYĀKHYĀ : DĪPIKĀ.

Pages, 16. Lines, 16 on a page.

Begins on fol. 240*a* of the MS. described under No. 424.

Contains the Brahmavallī and Bhṛguvallī complete, but wants the beginning.

A commentary on the Taittirīyōpaniṣadbhāṣya of Śaṅkarācārya, which work has been described under No. 505 ante.

Beginning :

नचैतदचेतनं कारणं कामयितृत्वात् । न च कामादिना विकारित्वं कामानामपि स्वरूपाभिन्नत्वेन विशुद्धत्वात् । स आत्मा यस्मादाकाशः संभूतः अकामयत कामितवान् कथं बहुः प्रभूतः स्यां भवेयम् । कथमेकस्यार्थान्तराननुप्रवेशे बहुत्वं स्यादत आह—प्रजायेयेति । उत्पद्येय नहि पुत्रोत्पत्त्येवार्थान्तरविषयं बहुभवनं कथं तर्ह्यात्मस्थानाभिव्यक्तनामरूपाभिव्यक्त्या, यदात्मस्थेऽनभिव्यक्ते नामरूपे व्याक्रियेते ।

* * * *

Colophon :

ब्रह्मवल्ली समाप्तम्(प्ता) ॥

समाप्ता ब्रह्मविद्या तत्साधनं तपो वक्तव्यमन्नादिविषयाणि चोपासनानीत्युत्तरो ग्रन्थः । आख्यायिका विद्यास्तुतये ।

End :

सूर्यश्च ज्योतिः स्वप्रकाशोऽस्मि । सकृद्विभातमस्मदीयं ज्योतिरित्यर्थः । य **एवं** वेद तस्यैवं यथोक्तं फलमिति शेषः । इति वल्लीद्वयमुपनिषद्रहस्यज्ञानम् ।

नारायणेन रचिता शङ्करोक्त्युपजीविना ।
अस्पष्टपदवाक्यानां वल्लीत्रितयदीपिका ॥

No. 14926. बालामालामन्त्रः.
BĀLĀMĀLĀMANTRAḤ.

Pages, 2. Lines, 16 on a page.

Begins on fol. 261*b* of the MS. described under No. 424.

Complete.

Similar to the work described under No. 6772 ante.

Beginning:

अस्य श्रीबालामालामहामन्त्रस्य दक्षिणामूर्तिः ऋषिः, गायत्री छन्दः, बालापरमेश्वरीप्रसादसिद्ध्यर्थे जपे विनियोगः । मूलेन न्यासः ।

End:

सर्वमृत्युनिवारिणि सर्वदारिद्र्यनाशिनि सर्वजनरञ्जिनि ओं बाले जगन्मोहिनि जगद्वंशिनि जगद्रक्षिणि जगदानन्दे ओं नमो भगवति बालापरमेश्वरि नमस्ते नमस्ते स्वाहा ॥

No. 14927. बालापरमेश्वरीमालामन्त्रः.
BĀLĀPARAMEŚVARĪMĀLĀMANTRAḤ.

Pages, 3. Lines, 16 on a page.

Begins on fol. 262*a* of the MS. described under No. 424.

Complete.

Same work as that described under No. 6770 ante, but slightly different in the beginning.

Beginning:

अस्य श्रीआदिशक्तिमालामहामन्त्रस्य दक्षिणामूर्तिः ऋषिः, गायत्री छन्दः । श्रीबालापरमेश्वरीप्रसादसिद्ध्यर्थे जपे विनियोगः ।

ओं आर्यी आनन्दवल्ली अमृतकरतली आदिशक्तिः परायी
मायी मायास्वरूपी स्फटिकमणिमयी मामतङ्गी षडङ्गी ।
ज्ञानी ज्ञानार्थसिद्धी ललितपरिमली नादओङ्कारमूर्ति-
र्भोगी योगासनस्था भुवनवशकरी सुन्दरी ओं नमस्ते ॥

No. **14928.** धर्मशास्त्रवचनानि.

DHARMAŚĀSTRAVACANĀNI.

Pages, 2. Lines, 16 on a page.

Begins on fol. 275*a* of the MS. described under No. 424.

Incomplete.

Six stanzas taken from various texts stating that a bachelor, widow or a widower is not fit for the repetition of certain Mantras, etc.

Beginning:

स्मृतिसंग्रहे—

दन्तधावनताम्बूलं क्षौराभ्यङ्गं परान्नभुक् ।
वर्जयेन्मन्त्रसिद्धिस्स्यात्फलप्राप्तिर्न संशयः ॥

सुमन्तुः—

पतिहीनस्तु(ना तु) या नारी पत्नीहीनस्तु यो नरः ।
वर्जयेत्सर्वकार्येषु तत्सज्यं(र्वं) दग्धकाष्ठवत् ॥

End:

तज्जपं निष्फलं तस्य कर्ताचार्यः कुलक्षयः? ।
सिद्धचक्रं न जानाति मङ्गलपादौ मूर्तिं वदेत् ॥

No. **14929.** कामकलापूजाविधिः.

KĀMAKALĀPŪJĀVIDHIḤ.

Pages, 2. Lines, 16 on a page.

Begins on fol. 278*a* of the MS. described under No. 424.

Incomplete.

Deals with the manner of conducting the worship of the goddess Kāmakalā who is a manifestation of Śakti.

Beginning:

सर्वे प्रसिद्धिमायान्ति क्रोधदोषादिवर्जिताः ।
स्मरणादेव जायन्ते त्रैलोक्योत्पादनक्षमाः ॥

* * * *

अं सुधाकलायै नमः, आं प्रीतिकलायै नमः, इं रतिकलायै नमः, ईं धृतिकलायै नमः, उं कीर्तिकलायै नमः, ऊं मनोहरकलायै नमः ।

End:

विसर्जनं पिबेत्सिद्धिः पुनः पात्रं पिबेत्सुखम् ।
रजस्वलामहास्तोत्रं पठते प्रत्यहं सदा ॥

* * * *

सर्वेशाक्तमहामन्त्रं तिलक . . . स्तवम् ।
एतत्पर इत्यादि.

No. 14930. कामरत्नम्.
KĀMARATNAM.

Substance, paper. Size, 11 × 7½ inches. Pages, 100. Lines, 28 on a page. Character, Telugu. Condition, good. Appearance, old.

Breaks off in the 14th Upadēśa.

Begins on fol. 1*a*. The other work herein is Abhidhānacūḍāmaṇi 51*a*.

Foll. 1—2 contain the index of this work.

Similar to the work described under No. 3888 ante. By Śrīnātha. Deals with the following subjects :—

१. वशीकरणम्.
२. आकर्षणम्.
३. विजयादिव्याघ्रनिवारणम्.
४. स्तम्भनम्.
५. केशादिरञ्जनम्.
६. वीर्यवर्धनम्.
७. गाढीकरणलोमशातनादि.
८. दृढीकरणकलहकरणादि.
९. अरिष्टनाशनादिसस्योपद्रवनाशनगोमहिष्यादिदुग्धवर्धनम्.
१०. उच्चाटनादिव्याधिकरणम्.
११. नानाकौतुकम्.
१२. कामसिद्ध्याद्यनावृष्टिनिवारणम्.
१३. निधिदर्शनाञ्जनादिमृत्युसंजीविनी.
१४. विषनिवारणम्.

Beginning :

यस्येश्वरस्य विमलं चरणारविन्दं संसेव्यतो विबुधसिद्धमधुव्रतेन ।
निर्वाणसूचकगुणाष्टकवर्णपूर्णं तं शङ्करं सकलदुःखहरं नमामि ।
कामरत्नमिदं चित्रं नानातन्त्रार्णवान्मया ।
वश्यादियक्षिणीमन्त्रसाधनान्तं समुद्धृतम् ॥

वश्याकर्षणकर्माणि वसन्ते योजयेत्प्रिये ।
ग्रीष्मे विद्वेषणं कुर्यात्प्रावृषि स्तम्भनं तथा ॥
शिशिरे मारणं चैव शान्तिकं शरदि स्मृतम् ।
हेमन्ते पौष्टिकं कुर्यात्कृतकर्मविशारदः ॥
* * * *

अथ वश्यादिकर्मणामृतु(णां तिथि)निर्णयः—

वशीकरणकर्माणि दशम्यां धारयेद्बुधः ।
तृतीयायां त्रयोदश्यान्तथाकर्षणकर्म वै ॥
उच्चाटनं द्वितीयायां षष्ठ्यां चैव प्रकारयेत् ।
द्वादश्यां मारणं शस्तमेकादश्यां तथैव च ॥
पञ्चम्यां पौर्णमास्यां च यो जपेच्छक्तिकादिकम् ।
सर्वविद्याप्रसिद्ध्यर्थं तिथयः कथिताः क्रमात् ॥

इति विधितिथिनिर्णयः ।

* * * *

Colophon :

इति श्रीनाथविरचिते कामरत्ने वशीकरणं नाम प्रथमोपदेशः ॥

End :

उक्तयोगानामयमेव मन्त्रः । इति मृत्युसंजीवनी ॥

Colophon :

इति श्रीनाथविरचिते कामरत्ने निधिदर्शनाञ्जनादिमृत्युसंजीवनी नाम त्रयोदश उपदेशः ॥

अथ विषनिवारणम्—

शम्भुनोक्तं समासेन विषं स्थावरजङ्गमम् ।
कृत्रिमं स्थावरं चैव वृश्चिकाद्यं च सत्त्वजम् ॥
क्रमाल्लक्षणमेतेषां मन्त्रमुक्तं वदाम्यहम् ।
नाम वक्ष्ये विषाणां च शम्भुना कीर्तितं पुरा ॥
* * * *

ओं नमो भगवती स्वच्छन्दभैरवी कालकूटविष स्फोटय अवतारयावतारय नास्ति विषहलाहलविपकृत्रिमविपसंसो(यो)गविषत्यु(मृ)त्युविषस्थावरविषजङ्गमविषकालचुचु(न्दरी)यापरादष्टमन्त्ररूप्येन अव(र)य अव(र)य ! ॥

No. 14931. अभिधानचूडामणिः.

ABHIDHĀNACŪḌĀMAṆIḤ.

Pages, 2. Lines, 28 on a page.

Begins on fol. 51*a* of the MS. described under the previous number.

Incomplete.

Same work as that described under No. 13254 ante.

No. 14932. सौन्दर्यलहरी, आन्ध्रटीकासहिता.

SAUNDARYALAHARĪ WITH TELUGU MEANING.

Substance, paper. Size, $8\frac{7}{8} \times 7\frac{1}{4}$ inches. Pages, 46. Lines, 18 on a page. Character, Telugu. Condition, good. Appearance, old.

Complete.

Same work as that described under No. 48 of M. Seshagiri Sastri's Report on a search for Sanskrit and Tamil MSS., No. 2, and R. No. 946*b* of the Triennial Catalogue of MSS., Vol. II, Part I-A.

No. 14933. ख्रिष्टुगीता.

KHRISṬUGĪTĀ.

Pages, 122. Lines, 17 on a page.

Begins on fol. 306*b* of the MS. described under No. 1782.

Complete in 14 Adhyāyas.

This work deals with the creation of the universe according to the Holy Bible and with the events and incidents that took place prior to and after the birth of Jesus Christ.

Contains the following subjects :—

१. शब्दावतारः.
२. धन्यनमस्कारः.
३. महामोहाग्निजन्मोपाख्यानम्.
४. पैतृकसंवित्कथनम्.
५. दाविद्वंशकथनम्.
६. कुमारीप्रसवनम्.
७. यिम्मनूयेलप्रतिष्ठा.
८. लोकनायकनक्षत्रादयः.
९. दाविद्राजविद्रावणम्.
१०. राज्याधिकारः.
११. शास्त्रोपाख्यानम्.
१२. प्रभुयात्राकथनम्.
१३. पर्ववर्णनम्.
१४. ईशपुत्रस्तोत्रम्.

Beginning :

पित्रे पुत्राय च सदात्मने नमः—शिष्य उवाच—

भूमण्डलस्थास्सकला मनुष्या मज्जन्ति पापाब्धितरङ्गमध्ये ।
जीवन्ति ते केन गुरो वदस्व तन्मां दयालो कृपया विमूढम् ॥
पृष्टा मयैवान्यबुधास्समस्ताः परस्परं भिन्नमतास्त एव ।
नानोपदेशं कथयन्ति तस्मात्तेषां मते नास्ति रुचिर्मदीया ॥
मद्भाग्यतस्त्वं समुपस्थितो हि यथार्थशास्त्रार्थपथानुयायी ।
दयां विधायाथ वदस्व मह्यमाराधनात्कस्य भवेद्विमुक्तिः ॥

गुरुरुवाच—

साधु पृष्टं त्वया शिष्य धर्ममार्गानुसारिणा ।
इदानीं त्वां प्रवक्ष्यामि परित्राणपथं नृणाम् ॥
खृष्टाराधनतो मुक्तिस्तत्तु विश्वासरूपकम् ।
ईशे चैवेशपुत्रे चाभेदो विश्वास उच्यते ॥

* * * *

गुरुरुवाच—

अथ वक्ष्ये तव स्नेहाद्यत्सर्वं पृष्टमुत्तमम् ।
शृण्वनन्यमना भूत्वा गदतो विस्तरान्मम ॥
आदौ बभूव शब्दस्स चेशेन परात्मना ।
सहासीन्न पृथक् सोऽपि स्वयमीशो न संशयः ॥
ईश्वरीयगुणास्सर्वे यस्मात्तत्र व्यवस्थिताः ।
अतस्सशब्द एवेशो भेदलेशो न विद्यते ॥

* * * *

Colophon :

इति श्रीखिष्टुगीतायां येशूत्पत्तिपर्वणि शान्तयोहन्निराचितमङ्गलसमाचारस्य प्रथमसर्गादुद्धृतः शब्दावतारो नाम प्रथमोऽध्यायः ॥

End :

साह्यं ममेतान्यपि शत्रुमुक्त्या तं स्वर्गसैन्यैस्सह संस्तवानि ।
अत्यूर्ध्वलोकेषु महेशकीर्तिः कौशल्यमुर्व्यां सुनृषु प्रसादः ॥
इति प्रगीतं त्रिजगत्सु सर्वे येशूद्भवादस्तु सदापि भूतैः ॥

Colophon:

इति श्रीख्रिष्टुसङ्गीतायां येशूत्पत्तिपर्वणीश्वरपुत्रस्तोत्रं नाम चतुर्दशोऽ-
ध्यायः ॥

समाप्तं चेदं षष्ट्यूनसहस्रश्लोकात्मकं येशूत्पत्तिनामकं प्रथमं पर्व ॥

No. **14934.** ख्रिष्टुगीता.
KHRISṬUGĪTĀ.

Substance, paper. Size, $8\frac{1}{3} \times 6\frac{7}{8}$ inches. Pages, 79. Lines, 18 on a page. Character, Telugu. Condition, good. Appearance, old.

The pages herein are written on only one side.

Breaks off in the eighth Adhyāya.

Same work as that described under the previous number.

No. **14935.** दक्षिणामूर्तिवन्दनस्तोत्रम्.
DAKṢIṆĀMŪRTIVANDANASTŌTRAM.

Pages, 3. Lines, 15 on a page.

Begins on fol. 77*a* of the MS. described under No. 5568.

Complete.

Same work as that described under No. 10978 ante, but wants the first stanza in the beginning.

No. **14936.** गर्भकौलागमः.
GARBHAKAULĀGAMAḤ.

Pages, 12. Lines, 14 on a page.

Begins on fol. 205*a* of the MS. described under No. 5709.

Contains the Āścaryāṣṭōttaraśatanāmastōtra only.

Same work as that described under Nos. 5599 and 5606 ante.

No. **14937.** मातृकापुष्पमालिकास्तोत्रम्.
MĀTṚKĀPUṢPAMĀLIKĀSTOTRAM.

Substance, paper. Size, $7 \times 3\frac{1}{4}$ inches. Pages, 25. Lines, 6 on a page. Character, Telugu. Condition, fair. Appearance, old.

Complete.

Same work as that described under No. 9617 ante, but with the additional stanzas given in the end with the colophon. By Śaṅkarācārya.

Colophon:

इति श्रीभगवच्छङ्कराचार्यविरचिता मातृकापुष्पमाला समाप्ता ॥

त्रिपुरापादकञ्जातिनतिपूतान्तरात्मनः ।
किमलभ्यमसाध्यं किं त्रिषु लोकेषु विद्यते ॥
कल्याणवृष्टिभिरिवामृतपूरिताभिः
लक्ष्मीस्वयंवरणमङ्गलदीपिकाभिः ।
सेवाभिरम्ब तव पादसरोजमूले
नाकारि किं मनसि भक्तिमतां जनानाम् ॥

* * * *

फट्कार्यान्वितमन्त्रजालरहिते फालस्फुरल्लोचने
स्वीकुर्वप्रतिकर्मनर्मफलदे फुल्लन्मुखाम्भोरुहे ।
स्नातं कुङ्कुमपङ्किलस्तनतटे स्फूर्जत्कलाभूषणैः
फट्कारद्विपदानगन्धसुलभे स्फातिं मम प्रापय ॥

No. **14938.** प्राणप्रतिष्ठामन्त्रः.

PRĀṆAPRATIṢṬHĀMANTRAḤ.

Pages, 2. Lines, 10 on a page.

Begins on fol. 1*a* of the MS. described under No. 5780.

Incomplete.

Same work as that described under No. 6677 ante.

No. **14939.** गायत्रीरामायणम्.

GĀYATTRĪRĀMĀYAṆAM.

Pages, 3. Lines, 16 on a page.

Begins on fol. 4*a* of the MS. described under No. 5780.

Complete.

Same work as that described under No. 14559 ante.

No. **14940.** भगवद्विषयगुरुपरम्परास्तोत्रम्.

BHAGAVADVIṢAYAGURUPARAMPARĀSTŌTRAM.

Pages, 4. Lines, 16 on a page.

Begins on fol. 5*a* of the MS. described under No. 5780.

Incomplete.

Similar to the work described under No. 5329 ante.

This procedure is intended for the sect of Teṅgalai Śrī-Vaiṣṇavas.

Beginning :

श्रीस्तनाभरणं तेजः श्रीरङ्गेशयमाश्रये ।
चिन्तामणिमिवोद्भ्रान्तमुत्सङ्गेऽनन्तभोगिनः ॥
नमः श्रीरङ्गनायक्यै यद्भ्रूविभ्रमभेदतः ।
ईशेशितव्यवैषम्यनिम्नोन्नतमिदं जगत् ॥

End :

नमः श्रीशैलनाथाय कुन्तीनगरजन्मने ।
प्रसादलब्धपरमप्राप्यकैङ्कर्यशालिने ॥
श्रीशैलेशदयापात्रं धीभक्त्यादिगुणान्वितम् ।
यतीन्द्रप्रवणं वन्दे रम्यजामातरं मुनिम् ॥

No. 14941. अष्टोत्तरशतदिव्यदेशनामानि.
AṢṬŌTTARAŚATADIVYADĒŚANĀMĀNI.

Pages, 6. Lines, 16 on a page.

Begins on fol. 6*a* of the MS. described under No. 5780.
Wants the beginning; otherwise complete.
Same work as that described under No. 5200 ante.

No. 14942, सुदर्शनप्रपत्तिः.
SUDARŚANAPRAPATTIḤ.

Pages, 2. Lines, 14 on a page.

Begins on fol. 7*b* of the MS. described under No. 5780.
Complete.
Same work as that described under No. 10643 ante.

No. 14943. वेङ्कटेशदयितासुप्रभातानि.
VEṄKAṬĒŚADAYITĀSUPRABHĀTĀNI

Pages, 9. Lines, 16 on a page.

Begins on fol. 8*a* of the MS. described under No. 5780.
Complete.
Same work as that described under R. No. 488(q) of the Triennial Catalogue of the Sanskrit MSS., Vol. 1, Part I-B.

No. 14944. वृत्तिसङ्ग्रहः.
VṚTTISAṄGRAHAḤ.

Substance, paper. Size, $6\frac{1}{4} \times 4$ inches. Pages, 14. Lines, 20 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Complete.

A grammatical treatise dealing with the different kinds of compounds Taddhita suffixes, nominal and desiderative verbs, etc.

Beginning :

परार्थाभिधानं वृत्तिः । सा च वृत्तिः पञ्चविधा—समासवृत्तिः, एकशेषवृत्तिः, तद्धितवृत्तिः, कृद्वृत्तिः, सनादिवृत्तिश्चेति । तत्र समासवृत्तिश्चतुर्विधा— अव्ययीभावतत्पुरुषबहुव्रीहिद्वन्द्वभेदात् । तत्र पूर्वपदार्थप्रधानोऽव्ययीभावः, उत्तरपदार्थप्रधानस्तत्पुरुषः, अन्यपदार्थप्रधानो बहुव्रीहिः उभयपदार्थप्रधानो द्वन्द्वः । एतत् सर्वं प्रायोऽभिप्रायेण ।

End :

सत्यं करोति—सत्यापयति, सत्यापयते । घटं करोति—घटयति घटयते । पटं करोति—पटयति, पटयते । कुर्वन्तं प्रेरयति—कारयति, कारयते । ददतं प्रेरयति—दापयते । रममाणं प्रेरयति—रमयति, रमयते । चरन्तं प्रेरयति—चारयति, चारयते । तिष्ठन्तं प्रेरयति—स्थापयति, स्थापयते—इत्यादि ॥

इति सनादिवृत्तिः ॥

Colophon :

इति समासादिवृत्तिसङ्ग्रहः ॥

No. 14945. मनीषापञ्चकम्.
MANĪṢĀPAÑCAKAM.

Pages, 1. Lines, 14 on a page.

Begins on fol. 1*a* of the MS. described under No. 9542.

Complete.

Same work as that described under No. 4705 ante.

No. 14946. अद्वैतवेदान्तविषयः.
ADVAITAVEDĀNTAVIṢAYAḤ.

Pages, 2. Lines, 14 on a page.

Begins on fol. 6*a* of the MS. described under No. 9542.

Incomplete.

Deals with Advaita-Vēdānta. The name of the work cannot be made out as there is only a small portion in the MS.

Beginning :

यश्चैतन्यमनुच्यु(स्यू)तिः जाग्रत्स्वप्नसुषुप्तिषु ।
तदेव त्वमिदं तत्त्वमतो नास्त्यधिकं परः(म्) ॥
जाग्रत्स्वप्नसुषुप्तिं च गुणतो बुद्धिनिश्चयः ।
तदेव त्वमिदं तत्त्वमतो नास्त्यधिकं परम् ॥

End :

ब्रह्माण्डरूपिणी पृथिनी(थ्वी)तोयमध्ये विलीयते ।
अग्निना पत्स्य(च्य)ते तोयं वायुना ग्रस(स्य)तेऽनलः ॥
आकाशीं(शं)तु पिबेद्वायुर्मनश्चाकाशमेव च ।
मनो बुद्धिरहङ्कारः क्षेत्रज्ञः परमात्मनि ॥

No. **14947**. बगलामुखी-एकाक्षरीमन्त्रः.

BAGALĀMUKHĪ-ĒKĀKṢARĪMANTRAḤ.

Page, 1. Lines, 18 on a page.

Begins on fol. 1*a* of the MS. described under No. 22.

Complete.

Same work as that described under No. 6701 ante.

No. **14948**. बगलामुखीचतुरक्षरीमन्त्रः.

BAGALĀMUKHĪCATURAKṢARĪMANTRAḤ.

Pages, 2. Lines, 18 on a page.

Begins on fol. 1*a* of the MS. described under No. 22.

Complete.

Same work as that described under No. 6704 ante.

No. **14949**. बगालाष्टाक्षरीमन्त्रः.

BAGALĀṢṬĀKṢARĪMANTRAḤ.

Page, 1. Lines, 18 on a page.

Begins on fol. 1*b* of the MS. described under No. 22.

Complete.

Same work as that described under No. 6717 ante.

No. **14950.** बगलाब्रह्मास्त्रमालामन्त्रः.

BAGALĀBRAHMĀSTRAMĀLĀMANTRAḤ.

Pages, 2. Lines, 18 on a page.

Begins on fol. 1*b* of the MS. described under No. 22.

Complete.

Slightly different from the work described under No. 6700 ante.

Beginning :

गम्भीरां च मदोन्मत्तां स्वर्णकान्तिसमप्रभाम् ।
वैरिनिर्मूलनाशाय स्मरेत्तां बगलामुखीम् ॥

ओं ह्रीं बगलामुखि सर्वदुष्टानां वाचं मुखं पदं स्तम्भय स्तम्भय, जिह्वां कीलय, बुद्धिं विनाशय ओं ह्रीं आं स्वाहा । ओंनमो वरिप्रताप-विजय भगवति बगलामुखि सर्वदुष्टानां वाचं मुखं पदं स्तम्भय जिह्वां कीलय ब्राह्मीमुद्रया बुद्धिं विनाशय ।

End :

सर्वरिपूणामुच्चाटनोच्चाटन हुं फट् स्वाहा ॥

No. **14951.** बगलामुखीमहालक्ष्मीमहामन्त्रः.

BAGALĀMUKHĪMAHĀLAKṢMĪMAHĀMANTRAḤ.

Pages, 3. Lines, 18 on a page.

Begins on fol. 2*a* of the MS. described under No. 22.

Complete.

Slightly different from the work described under No. 6713 ante.

Beginning :

अस्य श्रीबगलामुखीमहामन्त्रस्य नारदभगवान् ऋषिः, अनुष्टुप् छन्दः, श्रीबगलामहालक्ष्मीर्देवता, ओं बीजं, ह्रीं शक्तिः, स्वाहा कीलकं, एवं-गुणविशेषणविशिष्टायां शुभतिथौ, ... गोत्रस्य, ... नामधेयस्य [तस्य] शरीरे वर्तमानवर्तिष्यमाणपरमन्त्रपरयन्त्रपरतन्त्रप्रयोगोच्चाटनार्थे सकलशत्रुवाग्बन्धनार्थे श्रीबगलामहालक्ष्मीपरदेवताप्रसादसिद्ध्यर्थे जपे वि-नियोगः ।

End :

मयि सान्निध्यं कुरु कुरु आं ह्रीं मम हृदये चिरं तिष्ठ तिष्ठ आं ह्रीं क्रों हुं फट् स्वाहा ॥

No. **14952.** बगलामुखीकवचः.
BAGALĀMUKHĪKAVACAḤ.

Pages, 2. Lines, 18 on a page.

Begins on fol. 3*a* of the MS. described under No. 22.

Complete.

Same work as that described under No. 6702 ante.

No. **14953.** पीताम्बराबगलामुखीपद्धतिः.
PĪTĀṀBARĀBAGALĀMUKHĪPADDHATIḤ.

Pages, 6. Lines, 18 on a page.

Begins on fol. 3*b* of the MS. described under No. 22.

Complete.

Same work as that described under No. 7918 ante.

No. **14954** बगलानुष्ठानविधिः.
BAGALĀNUṢṬHĀNAVIDHIḤ.

Pages, 3. Lines, 18 on a page.

Begins on fol. 6*a* of the MS. described under No. 22.

Complete.

Same work as that described under No. 6698 ante.

No. **14955.** बगलामुखीमालामन्त्रः.
BAGALĀMUKHĪMĀLĀMANTRAḤ.

Pages, 3. Lines, 18 on a page.

Begins on fol. 7*a* of the MS. described under No. 22.

Complete.

Same work as that described under No. 6715 ante.

No. **14956.** नवरात्रिकल्पः.
NAVARĀTRIKALPAḤ.

Pages, 4. Lines, 18 on a page.

Begins on fol. 8*a* of the MS. described under No. 22.

Complete.

Same work as that drescibed under No. 7889 ante.

No. **14957.** बगलापूजाविधानम्.
BAGALĀPŪJĀVIDHĀNAM.

Pages, 9. Lines, 18 on a page.

Begins on fol. 9*b* of the MS. described under No. 22.

Complete.

Same work as that described under No. 8656 ante.

No. 14958. बगलामन्त्रकल्पः.
BAGALĀMANTRAKALPAḤ.

Pages, 9. Lines, 18 on a page.

Begins on fol. 13*b* of the MS. described under No. 22.

Wants the beginning; otherwise complete.

Same work as that described under No. 7963 ante.

No. 14959. बगलामुखीस्तोत्रम्.
BAGALĀMUKHĪSTŌTRAM.

Pages, 5. Lines, 18 on a page.

Begins on fol. 18*a* of the MS. described under No. 22.

Complete.

Same work as that described under No. 10790 ante.

No. 14960. बगलामुखीमुख्यपूजाविधिः.
BAGALĀMUKHĪMUKHYAPŪJĀVIDHIḤ.

Pages, 6. Lines, 18 on a page.

Begins on fol. 20*a* of the MS. described under No. 22.

Complete.

Same work as that described under No. 8658 ante.

No. 14961. बगलामुखीमालामन्त्रः.
BAGALĀMUKHĪMĀLĀMANTRAḤ.

Pages, 2. Lines, 18 on a page.

Begins on fol. 22*b* of the MS. described under No. 22.

Complete.

Slightly different from the work described under No. 6715 ante.

Beginning:

अस्य श्रीबगलामुखीमालामन्त्रस्य नारदभगवान् ऋषिः, अनुष्टुप् छन्दः, श्रीबगलामुखी महालक्ष्मीर्देवता, ओं बीजम् , ह्रीं शक्तिः, स्वाहा कीलकम् ; मम सर्वेषां दुष्टानां वाचं मुखं पदं स्तम्भनार्थे(र्थं) जपे विनियोगः.

End:

मालामन्त्रः—

ओं ह्रीं बगलामुखि सर्वदुष्टानां वाचं मुखं पदं स्तम्भय, जिह्वां कीलय बुद्धिं विनाशय ह्रीं स्वाहा ॥

No. **14962.** बगलाकल्पः.
BAGALĀKALPAḤ.

Pages, 78. Lines, 18 on a page.

Begins on fol. 25*a* of the MS. described under No. 22.

Complete.

Same work as that described under No. 7949 ante.

This work is also called Sāṅkhyāyanatantra or Ṣaḍvidyāgama.

No. **14963.** भूशुद्धिमन्त्रः.
BHŪŚUDDHIMANTRAḤ.

Pages, 3. Lines, 18 on a page.

Begins on fol. 65*a* of the MS. described under No. 22.

Complete.

Slightly different from the work described under No. 6842 ante.

Beginning :

आचम्य, सङ्कल्प्य, पूर्वोक्तैवङ्गुणविशेषणविशिष्टायां शुभतिथौ श्रीमान् गोत्रः, नामधेयः अनुष्ठानसिद्ध्यर्थं भूशुद्धिं करिष्ये । अस्य श्रीभूशुद्ध्यासनमन्त्रस्य वराहभगवान् ऋषिः, गायत्री छन्दः, श्रीभूनीला देवता, लां बीजम्, लीं शक्तिः, लूं कीलकं भूशुद्ध्यर्थे जपे विनियोगः ।

End :

मां रक्ष रक्ष हुं फट् स्वाहा । ह्रीं स्फुर स्फुर प्रस्फुर प्रस्फुर तनुरूप चट चट प्रचट प्रचट कह कह वम वम बन्ध बन्ध घातय घातय हुं फट् स्वाहा—इति त्रिवारं जपित्वा भूर्भुवस्सुवरोमिति नाराचमुद्रया दशदिग्बन्धनं कुर्यात् ॥

Colophon :

इति भूशुद्धिः ॥

No. **14964.** भूतशुद्धिमन्त्रः.
BHŪTAŚUDDHIMANTRAḤ.

Pages, 4. Lines, 18 on a page.

Begins on fol. 66*a* of the MS. described under No. 22.

Complete.

Similar to the work described under No. 6839 ante.

Beginning :

अव्ययाकारभूतानां भूतानां यदि शोधनम् ।
अव्ययं भूतसम्पर्कभूतसि(शु)द्धिरियं मता ॥
* * * *
तद्भस्मराशिं वायुना सह वामेन विरेचयेत् ।

अस्य श्रीभूतशुद्धिमहामन्त्रस्य पुरुष ऋषिः, देवी गायत्री छन्दः, ब्रह्मा विष्णू रुद्र ईश्वरस्सदाशिवो देवता ।

End:

जीवं सुषुम्नामार्गेण हृदम्बुजं नीत्वा द्वात्रिंशतिवा(द्वा)रं विरेचयेत् ॥

No. **14965.** प्राणप्रतिष्ठामन्त्रः.

PRĀṆAPRATIṢṬHĀMANTRAḤ.

Pages, 2. Lines, 18 on a page.

Begins on fol. 67*b* of the MS. described under No. 22.

Complete.

Same work as that described under Nos. 6677 and 6684 ante.

No. **14966.** अन्तर्मातृकान्यासमन्त्रः.

ANTARMĀTṚKĀNYĀSAMANTRAḤ.

Pages, 4. Lines, 18 on a page.

Begins on fol. 68*a* of the MS. described under No. 22.

Complete.

Slightly different from the work described under No. 5872 ante.

Beginning:

तत्र प्रथमं षोडशस्वरैः पूरकं, कादिपञ्चकैः कुम्भकं, यादिक्षान्तवर्णैः रेचकम् । एवङ्गुणविशेषणविशिष्टायां शुभतिथौ अन्तर्मातृकामहासरस्वतीमन्त्रजपं करिष्ये ।

End:

अथ शिरसि त्रिकोणं विलिख्य तन्मध्ये थ(व)मित्यमृतबीजं विलिख्य तत्रिकोणमध्ये दक्षिणमुष्टिं निधाय थ(व)मित्यमृतबीजं यथाशक्ति जपित्वा तेनैव सर्वाङ्गव्यापकं न्यसेत् ॥

Colophon:

इति अन्तर्मातृकान्यासः ॥

No. **14967.** बाहिर्मातृकान्यासमन्त्रः.

BAHIRMĀTṚKĀNYĀSAMANTRAḤ.

Pages, 2. Lines, 18 on a page.

Begins on fol. 69*b* of the MS. described under No. 22.

Incomplete.

Same work as that described under Nos. 6731 and 6733 ante.

No. **14968.** लक्ष्मीनारायणप्राणप्रतिष्ठामन्त्रः.

LAKṢMĪNĀRĀYAṆAPRĀṆAPRATIṢṬHĀMANTRAḤ.

Pages, 2. Lines, 18 on a page.

Begins on fol 189*a* of the MS. described under No. 22.

Complete.

On the consecration of the image of God Lakṣmīnārāyaṇa for purposes of worship.

Beginning :

अस्य श्रीलक्ष्मीनारायणप्राणप्रतिष्ठामहामन्त्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः, ऋग्यजुस्सामाथर्वाणश्छन्दांसि, प्राणशक्तिः परा देवता, आं बीजं, ह्रीं शक्तिः, क्रों कीलकं, श्रीलक्ष्मीनारायणप्राणप्रतिष्ठार्थे जपे विनियोगः ।

End :

अनुमते मृडया नः स्वस्ति ।

स्वामिन् सर्वजगन्नाथ . . . . बिम्बेऽस्मिन् सन्निधिं कुरु ॥

No. **14969** लक्ष्मीसहस्रनामावलिः.

LAKṢMĪSAHASRANĀMĀVALIḤ.

Pages, 38. Lines, 18 on a page.

Begins on fol. 193*a* of the MS. described under No. 22.

Complete.

Same work as that described under No. 8869 ante.

No. **14970.** सीताष्टोत्तरशतनामावलिः.

SĪTĀṢṬŌTTARAŚATANĀMĀVALIḤ.

Pages, 4. Lines, 18 on a page.

Begins on fol. 212*a* of the MS. described under No. 22.

Complete.

Similar to the work described under No. 88~4 ante.

Beginning :

ओं सीतायै नमः, ओं जनकजायै नमः, ओं रामायै नमः, ओं जानक्यै नमः, ओं मैथिल्यै नमः, ओं इन्दिरायै नमः ।

End :

ओं रामवामाङ्कशोभितायै नमः. ओं कान्तारकामितायै नमः, ओं वेदवेद्यायै नमः, ओं ज्येष्ठायै नमः, ओं वचनव्रतायै नमः ॥

Colophon :

इति सीताष्टोत्तरशतनाम सम्पूर्णम् ॥

No. 14971. ललितासहस्रनामावलिः.
LALITĀSAHASRANĀMĀVALIḤ.

Pages, 90. Lines, 18 on a page.

Begins on fol. 214*a* of the MS. described under No. 22.

Complete.

Same work as that described under R. No. 280(*a*) of the Triennial Catalogue of the Sanskrit MSS., Vol. I, Part I-A.

No. 14972. चन्द्रालोकव्याख्यानम्—शारदागमः.
CANDRĀLŌKAVYĀKHYĀNAM : ŚĀRADĀGAMAḤ.

Substance, paper. Size, $7\frac{3}{4} \times 4\frac{1}{4}$ inches. Pages, 103. Lines, 17 on a page. Character, Telugu. Condition, good. Appearance, old.

Complete.

Same commentary on the Candralōka of Jayadēva as that described under No. 12878 ante.

No. 14973. तत्त्वचिन्तामणिदीधितिप्रकाशिका.
TATTVACINTĀMAṆIDĪDHITIPRAKĀŚIKĀ.

Substance, paper. Size, $11\frac{1}{4} \times 4\frac{1}{2}$ inches. Pages, 51. Lines, 9 on a page. Character, Dēvanāgarī. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other work herein is Māthurapañcalakṣaṇi 27*b*

Wants the beginning and the end in the Sāmānyanirukti portion

Same work as that described under No. 4046 ante.

No. 14974. पञ्चलक्षणी (माथुरी).
PAÑCALAKṢAṆĪ (MĀTHURĪ).

Pages, 12. Lines, 9 on a page.

Begins on fol. 27*b* of the MS. described under the previous number.

Incomplete.

Same work as that described under No. 4019 ante

No. 14975. सिद्धान्तकौमुदीव्याख्या —लघुशब्देन्दुशेखरः.
SIDDHĀNTAKAUMUDĪVYĀKHYĀ : LAGHUŚABDĒNDU-ŚĒKHARAḤ.

Substance, paper. Size, $7\frac{1}{8} \times 5\frac{1}{4}$ inches. Pages, 72. Lines, 16 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Wants the beginning and breaks off in the Visargasandhi.

Same work as that described under Nos. 1414—1422 ante.

No. 14976. रामदुर्गामहामन्त्रः.
RĀMADURGĀMAHĀMANTRAḤ.

Substance, paper. Size, $7\frac{3}{8} \times 4\frac{3}{8}$ inches. Pages, 3. Lines, 14 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Begins on fol. 1*a*. The other works herein are Bhagavaddhyānasōpāna 3*a*, Prāṇapratiṣṭhāmantra 5*a*, Raṅganāthakavaca 7*a*, Vyāsastuti, Haristōtra 10*a*, Prātassmaraṇīyaślōkapañcaka 11*a*, Rāmanāmastuti 12*a*, Hanumaddvādaśanāmastōtra 12*b*, Rāmasaptarṣistōtra 12*b*, Kṛṣṇastavarāja 15*a*, Bhagavadyāthātmyavarṇana 16*b*, Lakṣmīnṛsiṁhakarāvalambanastōtra 20*b*.

Complete.

Slightly different from the work described under Nos. 7041 and 7042 ante.

Beginning:

अस्य श्रीरामदुर्गामहामन्त्रस्य विश्वामित्र ऋषिः, अनुष्टुप् छन्दः, श्रीरामः परमात्मा देवता, ह्रां बीजम्, ह्रीं शक्तिः, ह्रूं कीलकम्, श्रीरामप्रसादद्वारा सर्वाभीष्टसिद्ध्यर्थे जपे विनियोगः ।

* * * *

श्रीरामो रक्षतु प्राच्यां रक्षेद्याम्यां च लक्ष्मणः ।
उदीच्यां भरतो रक्षेत् प्रतीच्यां शत्रुसूदनः ॥

End:

काकुत्स्थः पुरुषः पूर्णः कौसलेयो रघूत्तमः ।
वेदान्तवेद्यो यज्ञेशः पुराणपुरुषोत्तमः ॥

इत्येतानि जपेन्नित्यं तद्भक्तिश्रद्धयान्वितः ।
अश्वमेधायुतं पुण्यं सम्प्राप्नोति न संशयः ॥

Colophon:

इति रामदुर्गास्तोत्रं सम्पूर्णम् ॥

No. 14977. भगवद्ध्यानसोपानम्.
BHAGAVADDHYĀNASŌPĀNAM.

Pages, 3. Lines, 14 on a page.

Begins on fol. 3*a* of the MS. described under the previous number.
Incomplete.

Same work as that described under R. No. 660(*h*) of the Triennial Catalogue of the Sanskrit MSS., Vol. I, Part I-C.

No. 14978. प्राणप्रतिष्ठामन्त्रः. PRĀṆAPRATIṢṬHĀMANTRAḤ.

Pages, 4. Lines, 14 on a page.

Begins on fol. *5a* of the MS. described under No. 14976.

Complete.

Same work as that described under No. 6677 ante.

No. 14979. रङ्गनाथकवचः. RAṄGANĀTHAKAVACAḤ.

Pages, 4. Lines, 14 on a page.

Begins on fol. *7a* of the MS. described under No. 14976.

The repetition of this Kavacamantra addressed to god Raṅganātha, is believed to be efficacious in securing protection and prosperity.

Beginning:

श्रीनारदः—

हिरण्यगर्भ सर्वज्ञ नमस्तेऽस्तु प्रजापते ।
रङ्गनाथस्य कवचं वदास्माकं कृपानिधे ॥

ब्रह्मोवाच—

पुरा तु रङ्गनाथेन ममोक्तं परमात्मना ।
तदद्य सम्प्रवक्ष्यामि आत्मरक्षाकरं परम् ॥

* * * *

रङ्गनाथः शिरः पातु शेषशायी ललाटकम् ।
दक्षिणाभिमुखो नेत्रे श्रुति मे ब्रह्मदैवतम् ॥

End:

सर्वशत्रुक्षयकरं सर्वरोगनिवारणम् ।
ब्रह्महत्यादिपापघ्नं समस्तभयनाशनम् ॥
यः पठेच्छृणुयाद्वापि धारयेद्वा समाहितः ।
तस्य सर्वार्थदं शीघ्रं सत्यमेतन्न संशयः ॥

Colophon:

इति श्रीरङ्गनाथकवचं सम्पूर्णम् ॥

No. 14980. व्याසस्तुतिः.
VYĀSASTUTIḤ.

Pages, 2. Lines, 14 on a page.

Begins on fol. 9*a* of the MS. described under No. 14976.

Incomplete.

Similar to the work described under No. 11184 ante.

Beginning :

व्यासं वसिष्ठनप्तारं शक्तेः पौत्रमकल्मषम् ।
पराशरात्मजं वन्दे शुकतातं तपोनिधिम् ॥
अचतुर्वदनो ब्रह्मा द्विबाहुरपरो हरिः ।
अफाललोचनश्शम्भुः भगवान् बादरायणः ॥

End :

पाराशर्यं परमपुरुषं विश्ववेदैकयोनिं
विद्याधारं विमलहृदयं वेदवेदान्तवेद्यम् ।
शश्वच्छान्तं शमितविषयं शुद्धबुद्धिं विशालं
वेदव्यासं विमलयशसं सर्वदाहं नमामि ॥
तं वेदशास्त्रपरिनिष्ठितशुद्धबुद्धिं चर्माम्बरं शुकमुनीन्द्रनुतं शरण्यम् ।
कृष्णत्विषं कनकपिङ्गजटाकलापं व्यासं नमामि शिरसा तिलकं मुनीनाम् ॥
अभ्रश्यामः पिङ्गजटाबद्धकलापः प्रांशुर्दण्डी कृष्णमृगत्वक्परिधानः ।
साक्षाल्लोकान् पावयमानः कविमुख्यः पाराशर्यः पर्वसु रूपं विवृणोतु ॥
पाराशर्यवचस्सरोजममलं गीतार्थगन्धोत्कटं
नानाख्यान(स)केसरं हरिकथासङ्गानुना बोधितम् ।
लोके सज्जनषट्पदैरहरहः पेपीयमानं मुदा
भूयाद्भारतपङ्कजं कविमलप्रध्वंसि नः श्रेयसे ॥

No 14981. हरिस्तोत्रम्.
HARISTŌTRAM.

Pages, 4. Lines, 14 on a page.

Begins on fol. 10*a* of the MS. described under No. 14976.

Complete.

Similar to the work described under No. 10481 ante.

Beginning :

चक्रं यस्य भुजे गभस्तिललितं विद्युत्प्रभं राजते
शङ्खो यस्य विराजते करतले संपूर्णचन्द्रप्रभः ।
माला यस्य सचम्पका सतिलका साशोकनीलोत्पला
सा नः पातु षडर्थविक्रमगतिस्त्रैलोक्यनाथो हरिः ॥

End :

निगमकल्पतरोर्गलितं फलं शुकमुखादमृतद्रवसंयुतम् ।
पिबत भागवतं रसमालयं मुहुरहो रसिका भुवि भावुकाः ॥
करारविन्देन पदारविन्दं (. .) बालं मुकुन्दं मनसा स्मरामि) ॥
वेदे रामायणे चैव पुराणे भारते तथा ।
आदौ मध्ये तथा चान्ते हरिस्सर्वत्र गीयते ॥

No. 14982. प्रातस्स्मरणीयश्लोकपञ्चकम्.
PRĀTASSMARAṆĪYAŚLŌKAPAÑCAKAM.

Pages, 2. Lines, 14 on a page.

Begins on fol. 11*a* of the MS. described under No. 14976
Complete.
Same work as that described under No. 10163 ante.

No. 14983. रामनामस्तुतिः.
RĀMANĀMASTUTIḤ.

Pages, 2. Lines, 14 on a page.

Begins on fol. 12*a* of the MS described under No. 14976.
Complete.

A eulogy describing the greatness of and the spiritual efficacy of repeating the name of Śrī-Rāma.

Beginning and the **End :**

राशब्दोच्चारणादेव मुखान्निर्यान्ति पातकाः ।
पुनः प्रवेशनभिया मशब्दस्तु कवाटवत् ॥
रामेति वर्णद्वयमादरेण सदा स्मरन् मुक्तिमुपैति जन्तुः ।
कलौ युगे कल्मषमानसानामन्यत्र धर्मे खलु नाधिकारः ॥

जानाति राम तव नामरुचिं महेशो
जानाति गौतमसती चरणप्रभावम् ।
जानाति दोर्बलपराक्रममीशचापो
जानात्यमोघपटुबाणगतिं पयोधिः ॥
जानाति राम तव चित्तगतिं हनूमान्
जानाति राम तव सख्यगतिं कपीशः ।
जानाति राम तव युद्धगतिं दशास्यो
जानाति राम तव मोक्षगतिं गजेन्द्रः (जटायुः) ॥
पटुतरजलधीरध्वानमादाय चापं
पवनजवनमेकं बाणमाकृष्य तूणात् ।
अभयवचनदायी सानुजस्सर्वतो मे
रणहतदनुजेन्द्रो रामचन्द्रस्सहायः ॥

No. **14984.** हनुमद्द्वादशनामस्तोत्रम्.
HANUMADDVĀDAŚANĀMASTŌTRAM.

Page, 1. Lines, 14 on a page.

Begins on fol. 12*b* of the MS described under No. 14976.
Complete.
Same work as that described under No 8785 ante.

No. **14985.** रामसप्तर्षिस्तोत्रम्.
RĀMASAPTARṢISTŌTRAM.

Pages, 4. Lines, 14 on a page.

Begins on fol. 12*b* of the MS. described under No. 14976.
Incomplete.
Same work as that described under No. 10299 ante.

No. **14986.** कृष्णस्तवराजः.
KṚṢṆASTAVARĀJAḤ.

Pages, 3. Lines, 14 on a page.

Begins on fol. 15*a* of the MS. described under No. 14976.

Wants the beginning (commencing with the words ज्ञेनार्चितो देवः प्रीयतां मे जनार्दनः); otherwise complete.

Same work as that described under R. No. 171(*d*) of the Triennial Catalogue of Sanskrit MSS., Vol. I, Part I-A.

No. 14987. भगवद्याथात्म्यवर्णनम्.
BHAGAVADYĀTHĀTMYAVARṆANAM.

Pages, 10. Lines, 14 on a page.

Begins on fol. 16*b* of the MS. described under No. 14976.

Complete.

A eulogy addressed to god Viṣṇu by Śiva; as found in the Harivaṁśa.

Beginning:

व्यासं वसिष्ठनप्तारं (. . .) शुकतातं तपोनिधिम् ॥

श्रीवैशम्पायनः—

इत्युक्त्वा पुनराहेदं याथात्म्यं दर्शयन्निव ।
मुनीनां श्रोतुकामानां देवदेवः कपालधृत् ॥
अञ्जलिं सम्पुटं कृत्वा विष्णुमुद्दिश्य शङ्करः ।
उमया सार्धमीशानो याथात्म्यं वक्तुमुद्यतः ।

* * * *

महेश्वरः—

यत्तत्कारणमाहुस्त्वां साङ्ख्याः प्रकृतिसंज्ञितम् ।
त्रिधाभूतं जगद्योनिं प्रधानं कारणात्मकम् ॥

End:

किमुच्यते मया देव सर्वं त्वं भूतभावन ।
नमस्तस्वार्त्मने देव विष्णो माधव केशव ।
नमस्करोमि सर्वात्मन् नमस्तेऽस्तु सदा हरे ।
नमः पुष्करनामाय वन्दे त्वामहमीश्वर ॥

Colophon:

इति श्रीहरिवंशे कैलासयात्रायां द्विशततमोऽध्यायः ॥

No. 14988. लक्ष्मीनृसिंहकरावलम्बनस्तोत्रम्.
LAKṢMĪNṚSIṀHAKARĀVALAMBANASTŌTRAM.

Page, 1. Lines, 14 on a page.

Begins on fol. 20*b* of the MS. described under No. 14976.

Incomplete.

Same work as that described under No. 324(*p*) of the Triennial Catalogue of the Sanskrit MSS., Vol. I, Part I-A.

No. 14989. सूर्यनमस्कारप्रयोगः.
SŪRYANAMASKĀRAPRAYŌGAḤ.

Substance, paper. Size, 7½ × 4⅝ inches. Pages, 3. Lines, 16 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Begins on fol. 1*a*. The other works herein are Āgnēyahōmaprayōga 3*a*, Śāntihōmaprayōga 9*a*, Aṣṭākṣaramantra 15*a*, Hanumanmālāmantra 16*a*, Viṣṇugadya 17*a*.

Incomplete.

Similar to the work described under No. 7586 ante.

Beginning:

एवङ्गुणविशेषणविशिष्टायामस्यां शुभतिथौ मम दैवभूतात्मककर्मसम्भावितसमस्तदुरितोपशान्तिद्वारा क्षिप्रारोग्यसिद्ध्यर्थं सौराष्टाक्षरीविधानेन सूर्यनमस्कारान् करिष्ये । ओं ह्रां घृणिस्सूर्य आदित्या श्रीं ओंनमो नारायणाय ह्रां नमः ।

End:

ओं ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः घृणिस्सूर्य आदित्यों श्रीं ओं नमो नारायणाय ह्रां नमः ॥

No. 14990. आग्नेयहोमप्रयोगः.
ĀGNĒYAHŌMAPRAYŌGAḤ.

Pages, 11. Lines, 16 on a page.

Begins on fol. 3*a* of the MS. described under No. 14989.

Complete.

Similar to the work described under No. 3539 ante

Beginning:

शुक्लाम्बरधरं विष्णुं (. . .) सर्वविघ्नोपशान्तये ॥

एवङ्गुणविशेषणविशिष्टायां शुभतिथौ गुरु(रो)राग्नेयहोमाख्यं कर्म करिष्यमाणः तदङ्गत्वेन तदादौ शुद्ध्यर्थं वृद्ध्यर्थं शान्त्यर्थमभ्युदयार्थं च महाजनैस्सह विष्वक्सेनपूजां च करिष्ये ।

* * * *

पूर्वोक्तैवङ्गुणविशेषणविशिष्टायां शुभतिथौ गुरोराग्नेयहोमाख्यं कर्म करिष्ये । नमस्सदसे, नमस्सदसस्पतये, नमः सखीनां पुरोगाणां चक्षुषे, नमो दिवे, नमः पृथिव्यै ।

* * * *

निरृतिकोणमारभ्येशान्यकोणपर्यन्तम्(मा)ज्यमाघारयति । अग्नये स्वाहा--अग्नय इदं, सोमाय स्वाहा—सोमायेदम्, अग्नये स्वाहा—अग्नय इदं, रुद्राय तन्तिचराय इदं न मम । पात्रप्रयुक्तदर्भाग्राणि दर्व्यामभ्युज्य स्रुवे मध्यमः(म्) मूले (मूलमाज्यपात्रे) अनक्ति ।

End:

अनेन शान्तिहोमेन भगवान् सर्वात्मकः यज्ञेश्वरः सुप्रीणातु । बृहत्साम क्षत्रभृत्—सगरेण रक्ष । अग्ने नय सुपथा राये अस्मान् । नमस्ते गार्हपत्याय । उत्तमस्समानानाम् । प्रमादात्कुर्वतां कर्म । श्रीकृष्णानुसमर्प-(स्मर)णं(परम्) ॥

No. 14991. शान्तिहोमप्रयोगः.

ŚĀNTIHŌMAPRAYŌGAḤ.

Pages, 10. Lines, 16 on a page.

Begins on fol. 9*a* of the MS. described under No. 14989.

Almost complete.

Similar to the work described above.

Beginning:

एवङ्गुणविशेषणविशिष्टायां शुभतिथौ गुर्वाज्ञया मन्त्रशान्तिहोमाख्यं कर्म करिष्यमाणः तदङ्गत्वेन तदादौ निर्विघ्नपरिसमाप्त्यर्थं विष्वक्सेनपूजां च करिष्ये ।

* * * *

अस्मिन् शान्तिहोमकर्मणि ब्रह्मन् इध्ममाधास्ये । आधत्स्व । प्रजापतय इदम्, (नैरृत्यात्) ईशाना[दिपर्य]न्तं प्रजापतय इदं, वायव्याद्या(दा)ग्नेयान्तमिन्द्राय इदम् । अग्नये स्वाहा—अग्नय इदं, सोमाय स्वाहा—सोमाय इदम्, अग्नये स्वाहा—अग्नय इदं प्राणप्रतिष्ठापनं कुर्यात् । नारायणोपनिषत्पारायणं कुर्यात् । श्रीसूक्तहोमं कुर्यात् ।

End :

ऊर्ध्वायां दिशि यज्ञस्संवत्सरो यज्ञमि(प)ति(:) मार्जयन्ताम् । समुद्रं न (व:) प्रहिणोमि स्वां योनिमभिगच्छत । अच्छिद्रः प्रजया भूयासं मा परा सेचि मत्पयः । अञ्जलौ पूर्णपात्रमानयति । रेत एवास्यां प्रजां दधाति । प्रजया हि मनुष्यः पूर्णः । मुखं विमृष्टे[त्] । अवभृथस्यैव रूपं कृत्वोत्तिष्ठति । एष वै दर्शपूर्णमासयोरवभृथः ॥

No. **14992.** अष्टाक्षरमन्त्रः.

AṢṬĀKṢARAMANTRAḤ.

Pages, 2. Lines, 16 on a page.

Begins on fol. 15*a* of the MS. described under No. 14989.

Complete.

Similar to the work described under No. 6492 ante.

Beginning :

ओं श्रीं ह्रीं क्लीं ओं नमो नारायणाय, ओं नमो नारायणाय, (२) अमुष्यास्सन्तानवृद्धिं कुरु, ओं नमो नारायणाय स्वाहा ।

देवकीसुत गोविन्द वासुदेव जगत्पते ।
देहि मे तनयं कृष्ण त्वामहं शरणं गतः स्वाहा ॥

End :

ओं नमो नारायणाय यणायरानामोन ओम् ॥

No. **14993**· हनुमन्मालामन्त्रः.

HANUMANMĀLAMANTRAḤ.

Page, 1. Lines, 16 on a page.

Begins on fol. 16*a* of the MS. described under No. 14989.

Complete.

Similar to the work described under No. 7678 ante.

Beginning:

ओं ऐं ह्रीं नमो भगवते महावीर हनुमते तत्मकटबलाक्रान्तबलोपेताखिलदिङ्मण्डलयशोवितानधवलीकृतवज्रदेह रुद्रावतार लङ्कापुरीदहन उदधिलङ्घन दशग्रीवकृतान्तक सीताश्वासित(कर) ।

End:

ऐं ह्रीं गम्भीरशब्देन दुष्टप्रयोगप्रतिबन्धग्रहान् उच्चाटयोच्चाटय मां रक्ष रक्ष ऐं ह्रीं हुं फट् स्वाहा ॥

No. 14994. विष्णुगद्यम्.
VIṢṆUGADYAM.

Pages, 2. Lines, 16 on a page.

Begins on fol. 17*a* of the MS. described under No. 14989.

Wants the beginning; otherwise complete.

A eulogy in prose addressed to god Nārāyaṇa, to whom the supplicant surrenders himself.

Beginning:

सरसिरुहशङ्खचक्रध्वजवज्राङ्कुश . . . . नखराजिविराजमानचरणाङ्गुलिमुखभाग, कपोतपोतसदृशचरणभाग, प्रवालपल्लवसदृशप्रपदप्रदेश,

* * * *

श्रीभूनीलाकर[कर]कलितलाक्षारससमुपलालितचरणारविन्दयुगल, कटकमकुटकेयूरहारनूपुराद्याभरणविराजमानदिव्यावयव, श्रीभूनीलालङ्कृतपार्श्वयुगल, सर्वलोकशरण्य, निखिलापराधनिवर्तक, प्रणतार्तिहर, आपद्बान्धव, शरणागतवत्सल, पुराणपुरुष, सर्वलोकशरण्य, अस्मत्स्वामिन्, श्रीमन्नारायण शरणमहं प्रपद्ये ॥

No. 14995. निर्धारणषष्ठ्यर्थविचारः.
NIRDHĀRAṆAṢAṢṬHYARTHAVICĀRAḤ.

Substance, paper. Size, $5\frac{5}{8} \times 3\frac{1}{4}$ inches. Pages, 6. Lines, 10 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other work herein is Evakārārthavicāra 4*a*. Complete.

Same work as that described under R. No. 889(*b*) of the Triennial Catalogue of Sanskrit MSS., Vol. II, Part I-A.

No. **14996.** एवकारार्थविचारः.

ĒVAKĀRĀRTHAVICĀRAḤ.

Pages, 6. Lines, 10 on a page.

Begins on fol. 4*a* of the MS. described under the previous number.

Complete, but in disorder.

Same work as that described under R. No. 2733(*a*) of the Triennial Catalogue of the Sanskrit MSS., Vol. III, Part I-C.

No. **14997.** ब्रह्मसूत्रम्.

BRAHMASŪTRAM.

Substance, paper. Size, 7 × 4¼ inches. Pages, 14 Lines, 11 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other works herein are Tṛcakalpa 8*a*, Praśnōttaraślōkas (Yakṣapraśna) 11*a*, Viṣṇusahasranāmastōtra 12*a*.

Breaks off in the fourth Pāda of the second Adhyāya.

Same work as that described under No. 4649 ante.

No. **14998.** तृचकल्पः.

TṚCAKALPAḤ.

Pages, 6. Lines, 11 on a page.

Begins on fol. 8*a* of the MS. described under the previous number.

Incomplete.

Similar to the work described under No. 7852 ante.

Beginning:

एवङ्गुणविशेषणविशिष्टायां शुभतिथौ अरुणच्छायादेवीसमेतसवितुर्नारा-यणप्रेरणया मह्यन्तर्गतसवितुर्नारायणप्रीत्यर्थं मम मनोऽभीष्टसिद्ध्यर्थं तृच-कल्पोक्तप्रकारेण तृचकल्पोक्तविधिना सूर्यनमस्कारं करिष्ये ।

* * * *

ओं ह्रः ह्रां ह्रें ह्रूं शुक्रेषु मे हरिमाणम् । रोपणाकासुदध्मसि । अथो हारिद्रवेषु मे । हरिमाणं निदध्मसि । खगपूषहिरण्यगर्भमरीच्यादित्येभ्यो नमः ।

End :

उद्यन्नद्य मित्रमहः . . . मो अहं द्विषतो रथम् । मित्ररविसूर्य-भानुखगपूषहिरण्यगर्भमरीच्यादित्यसवित्रर्कभास्करेभ्यो नमः ॥

No. **14999.** प्रश्नोत्तरश्लोकाः.
PRAŚNŌTTARAŚLŌKĀḤ.

Pages, 2. Lines, 11 on a page.

Begins on fol. 11*a* of the MS. described under No. 14997.

Incomplete.

This is also called Yakṣapraśna and is taken from the Āraṇya-parvan of the Mahābhārata. Herein Yudhiṣṭhira got restored to life his seemingly dead brothers by giving suitable replies to certain difficult questions, put by Yama, the god of death, who came in disguise in the form of a Yakṣa.

Beginning and the **End:**

को मोदते ?

पञ्चमेऽहनि षष्ठे वा शाकं पचति स्वे गृहे ।
अनृणोऽह्यप्रवासी च स वारिचर मोदते ॥

किमाश्चर्यम् ?

अहन्यहनि भूतानि प्रविशन्ति यमालयम् ।
शेषाः स्थावरमिच्छन्ति किमाश्चर्यमतः परम् ॥

कः पन्थाः ?

तर्को वितर्कः स्मृतयश्च भिन्ना नैको ऋ(ॠ)षिर्यस्य मतं प्रमाणम् ।
धर्मस्य तत्त्वं निहितं गुहायां महाजनो येन गतस्स पन्थाः ॥

का वार्ता ?

अस्मिन्महत्यण्डकटाहमध्ये सूर्याग्निना रात्रिदिवेन्धनेन ।
मासर्तुदर्वीपरिघट्टनेन भूतानि कालः पचतीति वार्ता ॥

No. **15000.** विष्णुसहस्रनामस्तोत्रम्.
VIṢṆUSAHASRANĀMASTŌTRAM.

Pages, 24. Lines, 11 on a page.

Begins on fol. 12*a* of the MS. described under No. 14997.

Wants a few stanzas in the introduction and the end.

Same work as that described under No. 9008 ante.

GENERAL INDEX.

[*Note* —The names printed in *italics* are those of the works described.]